II. C. 48.

BIBLIOTHECA INDICA;

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED UNDER THE SUPERINTENDENCE OF THE

ASIATIC SOCIETY OF BENGAL.

THE

SANHITA OF THE BLACK YAJUR VEDA,

WITH THE

COMMENTARY OF MÁDHAVA ÁCHÁRYA.

EDITED BY

E. B. COWELL, M.A.

VOL. II.

KÁṆḌA I. PRAPÁṬHAKA VIII.—KÁṆḌA II.

ASIATIC SOCIETY LIBRARY BENGAL

972

CALCUTTA:

PRINTED BY C. B. LEWIS, AT THE BAPTIST MISSION PRESS.

1866.

12610

5967

PREFACE.

THE first volume was edited under the joint superintendence of the late Dr. Röer and the present Editor, but for the second the latter is alone responsible. Dr. Röer's absence from Calcutta, and his subsequent return to Europe, necessarily obliged him to give up his connection with the work.

The same MSS. have been used for the text of the present which were used for that of the former volume, except in the commentary of the second Káṇḍa. Here I have been dependent on two only, *A. C.*,[1] as the MS. *B.* became so hopelessly corrupt that it was quite useless to consult it any longer.

It is not without a feeling of pain that I now sever my connection with this edition of the Black Yajur Veda, which I had hoped to have carried on to its completion. I turn away, like Virgil's ploughman,

> it tristis arator,
> Atque opere in medio defixa relinquit aratra;

but I rejoice to think that the unfinished task will be resumed under other and, I trust, more fortunate auspices; and that the Asiatic Society of Bengal will still have the glory of perpetuating by the press this curious monument of the old Hindú world.

E. B. COWELL.

LONDON, *Aug.* 10, 1866.

---

[1] I may add here that I subsequently discovered that the several portions of the MSS. *C.* and *D.* had been, by accident, intermixed, and that it is *D.*, and not *C.*, which is imperfect in the first Káṇḍa. (see Pref. Vol. I.)

INDEX TO THE SECOND VOLUME.

The First Kâṇḍa of the Taittiríya Sanhitá.

(*Continued*).

Prapáṭhaka VIII.

I.—XXI. *Rájasúyaḥ*... ... ... 1—220.

I.—Ánumatádayo 'shṭau yágáḥ, (Bráhmaṇa, I. vi. 1.) 1

II.—Cháturmásyeshu vaiśwadevákhyam prathamam parva, (Br. I. vi. 2, 3.) 17

III.—Varuṇapraghásákhyam dwitíyam parva, (Br. I. vi. 4, 5.) 33

IV.—Sákamedhákhye tritíyo parvaṇi 'pradhána-havínshi, (Br. I. vi. 6, 7.).. 50

V.—Tadíya-seshas mahá-pitri-yajnaḥ, (Br. I. vi. 8, 9) 65

VI.—Tadíya-seshás tryambaka-puroḍáśáh, (Br. I. vi. 10.) 83

VII.—Śunásíryádi-karma-chatushṭayam, (Br. I. vii. 1.)... 91

VIII.—Devikádi-karma-shaṭkam, (Br. I. vii. 2.) 98

IX.—Ratninám havínshi, (Br. I. vii. 3.) 102

X.—Devasuvám havínshi, (Br. I. vii. 4.) ... 112

XI.—Abhisheka-jala-mantráḥ, (Br. I. vii. 5.) ... 120

XII.—Abhisheka-jala-sanskára-mantráḥ, (Br. I. vii. 6.) 127

XIII.—Dig-vyásṭhápana-mantráḥ, (Br. I. vii. 7.) 137

XIV.—Abhishekaḥ, (Br. I. vii. 8.) 147

XV.—Rathena vijayaḥ, (Br. I. vii. 9.) ... 156

XVI.—Sarvaiḥ sevyatwam, (Br. I. vii. 10.) ... 163

XVII.—Samsṛipám havínshi, (Br. I. viii. 1.) ... 174

XVIII.—Daśapeyaḥ, (Br. I. viii. 2.) 178

XIX.—Diśám aveshṭayaḥ paśudwayam sátyadútánám havínshi cha, (Br. I. viii. 3.) ...
XX.—Prayujám havínshi, (Br. I. viii. 4.) ...
XXI.—*Sautrámanyá mantráḥ paśavo havínshi cha,* (Br. I. viii. 5—10.) ... ...
XXII.—*Kamyeshṭi-yájyáḥ*, (Sanhitá, II. ii. 9, 10.) ...

THE SECOND KÁṆḌA.

Prapáṭhaka I.

I.—X.—Váyavyádi-kámya-paśavaḥ ... ...
XI.—*Kámyeshṭi-yájyáḥ*, (Sanh. II. ii. 11; II. iii. 1.) ...

Prapáṭhaka II.

I.—XI.—Kámyeshṭayaḥ, (Cf. Sanh. I., at the end of each Prapáṭhaka.) ... ...
XII.—*Kámyeshṭi-yájyáḥ*, (Sanh. II. iii. 2.) ... ...

Prapáṭhaka III.

I.—XIII.—Kámyeshṭayaḥ, ... 4
XIV.—*Kámyeshṭi-yájyáḥ*, ... 4

Prapáṭhaka IV.

I.—XIII.—Kámyeshṭayaḥ, ... 4
XIV.—*Kamyeshṭi-yájyáḥ*, ... 5

Prapáṭhaka V.

Dárśyam Bráhmaṇam.

I.—VI.—*Ádhwaryavam*, ... 548—6
I.—Paurṇamásí-gatasyá 'gnishomíya-puroḍáśasyo-'podgháṭaḥ, ... 5
II.—Vidhyupayogaḥ, ... 5
III.—Vaimṛidha-sánnáyye, ... 5
IV.—Sánnáyya-devatá-vyavasthá, ... 5
V.—Abhyudayeshṭyádayaḥ, ... 5

VI.—Darśapúrṇamásayoḥ somayágena saha paurváparyam, ... 601
VII.—XII.—*Hautram*, ... 609—677
VII., VIII.—Sámidhení-mantráḥ, (Br. III. v. 1, 2). 609
IX.—Pravara-nividádayaḥ, (Br. III, v. 3, 4). ... 630
X.—Naimittikyaḥ kámyáś-cha sámidhenyaḥ ... 641
XI.—Hotur niyama-viśesho 'dhwaryor ágharádi-viśeshaś-cha... 650
XII.—*Kámyeshṭi-yájyáḥ*, (Sanh. II. iii. 11, 12, 13; I. v. 2; II. iv. 1, 2.) 667

Prapáṭhaka VI.

Dárśyam Bráhmaṇam (*continued.*)

I—VI.—*Ádhwaryavam*, ... 678—755
I.—Prayájáḥ, (Br. III. v. 5.) 678
II.—Ájyabhágau, (Br. III. v. 6.)... 697
III.—Ágneya-puroḍáśaḥ, ... 717
IV.—Vedi-nirmáṇam, ... 728
V.—Barhir-vishaya-prayogaḥ, ... 733
VI.—Upánśuyája-swishṭakṛitau, ... 742
VII.—XII.—*Hautram*, ... 755—824
VII.—Iḍopáhwána-vidhiḥ 755
VIII.—Iḍá-práśitra-bhakshaṇam, ... 764
IX.—Anuyájáḥ súktaváka-vyákhyá cha, ... 784
X.—Samyuváka-mantra-vyákhyá patní-samyájáś-chá, (Br. III. v. 11, 12, 13.) 794
XI.—Samvargeshṭi-hautra-mantráḥ, ... 804
XII.—Pitṛiyajnasya havishám hautram, ... 813

शुद्धिपत्रम्

अशुद्धं	शुद्धं	पृष्ठा	पङ्क्तिः
दध्यर्षभः	दध्यृषभः *	१	९
ऽभुञ्जन्तः	भुञ्जन्तः	२५	७
भुञ्जन्तः	ऽभुञ्जन्तः	२५	८
धूपायोज्वरति	धूपायज्वरति	८४	१९
शीर्ष्णीः :	शीर्ष्णीः	२९७	१०

* एकस्मिन्नेव पुस्तके शुद्धः पाठो दृश्यते।

श्रीवेदव्यासाय नमः ।

अथ तैत्तिरीयसंहिताभाष्ये

प्रथमकाण्डे ऽष्टमप्रपाठकः ।

हरिः ॐ ।

अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति धेनुर्दक्षिणा ये प्रत्यञ्चः शम्याया अवशीयन्ते तन्नैर्ऋतमेककपालं कृष्णं वासः कृष्णतूषं दक्षिणा वीहि स्वाहाहुतिं जुषाण एष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेममꣳहसः स्वाहा नमो य इदं चकारादित्यं चरुं निर्वपति वरो दक्षिणाग्नावैष्णवमेकादशकपालं वामनो वही दक्षिणाग्नीषोमीयं ॥ १ ॥

एकादशकपालꣳ हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो वही दक्षिणाग्नेयमष्टाकपालमैन्द्रं दध्यृषभो वही दक्षिणैन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुं प्रथ-

मजो वत्सो दक्षिणा सौम्यꣳ श्यामाकं चरुं वा
दक्षिणा सरस्वत्यै चरुꣳ सरस्वते चरुं मिथुनौ गा
दक्षिणा ॥ २ ॥

अग्नीषोमीयं चतुस्त्रिꣳशच्च ॥ १ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपा
प्रथमोऽनुवाकः ॥ * ॥

श्रीगणेशाय नमः।

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ॥
प्रपाठकेऽथाष्टमेऽस्मिन् राजसूयो निगद्यते।
द्वाविंशत्यनुवाकेषु विंशत्या राजसूयके ॥
अनेकानि प्रधानानि कर्माणि विहितान्यथ।
द्वाभ्यां सौत्रामणीमन्त्राः काम्या याज्याश्च वर्णिताः
अष्टमे मन्त्रकाण्डस्थे कर्मणां बहुलत्वतः।
तत्तत्सन्निधये प्रोक्ता मन्त्रा विधिपुरःसराः ॥
अनूद्य तान् विधीनर्थवादो ब्राह्मण ईरितः।
सम्प्रदायविदोऽतोऽत्र ब्राह्मणद्वयमूचिरे ॥
ब्राह्मणं मन्त्रकाण्डस्थविधिजातमितीरितं।
अनुब्राह्मणमन्यत्तु कथितं सार्थवादकं ॥

तत्र प्रथमानुवाके प्रथमं तावद् ब्राह्मणेन कर्मद्वयं वि

यते "अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति धेनुर्दक्षिणा ये प्रत्यञ्चः शम्याया अवशीयन्ते तन्नैर्ऋतमेककपालं कृष्णं वासः कृष्णतूषं दक्षिणा" इति। चतुर्दशीमिश्रितायाः पौर्णमास्या अभिमानिदेवताऽनुमतिः, अमावास्या सिनीवाली पौर्णमास्यनुमतिरिति श्रुतेः। कलाहीने सानुमतिः पूर्णे राका निशाकरे इत्यभिधानात्। सा चानुमतिरत्र देवता। पुरोडाशो द्रव्यमित्येतदेकं कर्म, दक्षिणाभिधानेन वक्ष्यमाणेभ्यः कर्मभ्यो भिन्नाधिकारावगमात्। अस्मिन् कर्मणि पुरोडाशार्थं तण्डुलेषु पिष्यमाणेषु पश्चिमायां दिशि दृषदमभ्याधातुमधःस्थापितायाः शम्यायाः पश्चाद्ये तण्डुलपिष्टलेशा अवशीयन्ते अधःपतन्ति तल्लेशजातं द्रव्यं निर्ऋतिदेवताकं तदिदमपरं कर्म, पृथग् दक्षिणाभिधानात्। कृष्णं वासोऽत्र दक्षिणा, तच्च कृष्णतूषं कृष्णदशान्तं। केषाञ्चिद्वस्त्राणां वैचित्र्याय दशाभागमुपेक्ष्य मध्यमभाग एव काषायहरिद्रादिभीरञ्जिता भवति। तन्मा भूदिति कृष्णतूषत्वेन विशेष्यते। एतस्मिन् मुख्ये ब्राह्मणे प्रधानं कर्म विहितं। अनुब्राह्मणन्तु ग्रन्थान्तरे प्रथमकाण्डे षष्ठसप्तमाष्टमप्रपाठकरूपं। तत्र षष्ठप्रपाठकस्यादौ पूर्वोदाहृतं कर्मविधिमनूद्य प्रशंसति "अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति। ये प्रत्यञ्चः शम्याया अवशीयन्ते तन्नैर्ऋतमेककपालं। इयं वा अनुमतिः। इयं निर्ऋतिः" (ब्रा०१का०।६प्र०।१अ०) इति। भूमिर्द्विविधा शालिगोधूमादिसर्वसस्याढ्या तदयोग्या वा, तत्राद्यभूमिरूपानुमतिर्द्वितीयभूमिरूपा निर्ऋतिः। पश्चा-

भिहृतस्य नैर्ऋतस्यानुमतादुत्तरकाले न्यायप्राप्तं प्रधानयाग-प्रचारं बाधितुं पूर्वकालं विधत्ते "नैर्ऋतेन पूर्वेण प्रचरति। पाप्मानमेव निर्ऋतिं पूर्वां निरवदयते" (ब्रा०) इति। लोके रुग्णानां पुरुषाणां अनिष्टं रोगं प्रथमं निवार्य पश्चा-दिष्टा शरीरपुष्टिः सम्पाद्यते, तद्वदत्रापि पाप्मानं प्रतिकूलां निर्ऋतिं प्रथमतो भागदानेन निवारयति। विधिवाक्यगतं कपालैक्यमनूद्य प्रशंसति "एककपालो भवति। एकधैव निर्ऋतिं निरवदयते" (ब्रा०) इति। एकधैवैकेनैव प्रयत्नेन, कपालबाहुल्ये हि प्रयत्नबाहुल्यं प्रसज्येतेति। तच्चेदमानु-मतनैर्ऋतादिकं अन्वारम्भणीयास्थानीयात् पवित्राख्यादग्नि-ष्टोमादूर्द्धमनुष्ठेयं। तथाचापस्तम्ब आह 'राजा स्वर्गकामो राजसूयेन यजेत गवां शतसहस्रं दक्षिणाग्निष्टोमः पञ्चाप-वर्गः प्रथममहः, पञ्च सहस्राणि पवित्रे ददाति त्रिंशतमभि-षेचनीये त्रिंशतं दशपेये दश केशवपनीये विंशतिं व्युष्टिद्वि-रात्रे पञ्च क्षत्रस्य धृतावपि वा चत्वार्यभिषेचनीये प्रतिसह-स्राणीतराण्यहानि षष्टिं शतानि सहस्राणि ददाति' इति। बहुब्राह्मणं भवति तथा दक्षिणा अतिनयेद्यथास्याहानि समकालानि स्युः। शेषमनुदिशति 'श्वोभूत आनुमतादिभिर-ष्टाभिरन्वहं यजेत त्रिष्वानुमतं पश्चादुत्तरतश्च व्यवशातयति ये प्रत्यञ्चः शम्याया अवशीयन्ते तं नैर्ऋतमेककपालं' इति। 'अत्र च आनुमतमासाद्य नैर्ऋतेन प्रचरति' इति। बोधायनो-ऽप्येतदेव विशदयति 'राजसूयेन यक्ष्यमाणो भवति पुरस्तात्

फाल्गुण्यै पौर्णमास्यै चैत्र्यै वा पौर्णमास्या अमावास्येन हवि-षेष्ट्वा दीक्षते तस्य तिस्रो दीक्षास्तिस्र उपसदः सप्तम्यां प्रसुतः सन्तिष्ठत एष प्रायणीयोऽग्निष्टोमः षतुष्टोमः सहस्रदक्षिण उदवसनीयान्तोऽथाष्टमे ऽन्वानुमतं निर्वपति हविः पेष्ये प्रय-च्छन्नाह प्राचश्च प्रतीचश्च व्यवम्रातयेति ये प्राञ्चः शम्या-या अवशीयन्ते तानध्वर्युः समोप्य संयुत्यानुमतं श्रपयति अथ ये प्रत्यञ्चः शम्याया अवशीयन्ते तान् प्रतिप्रस्थाता समोप्य संयुत्य नैर्ऋतं श्रपयति' इति च। प्रधानकर्ममात्राभिधा-यकेन मुख्यब्राह्मणेनोपेते प्रकृते मन्त्रकाण्डे नैर्ऋतयागविधि-सन्निधौ वीहीत्यादयस्त्रयो मन्त्रा आम्नातास्तेषां विनियोगं बौधायन आह 'गार्हपत्ये स्रुवाहुतिं जुहोति "वीहि स्वा-हाहुतिं जुषाणः" इति। अथ दक्षिणया द्वारोपनिष्क्रम्य तां दिशं यन्ति यत्रास्य स्वकृतमिरिणं स्यष्टं भवति प्रदरो वा। तदेतदेकोल्मुकमुपसमाधायाङ्गुष्ठाभ्यां परिगृह्य नैर्ऋतं जुहो-ति "एष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेममंहसः" स्वाहेति। अत्र कृष्णं वासः कृष्णतूषं निदधाति। अथापो व्यतिषिच्य पराक्ष्य पात्रं निदधात्यनवेक्षमाणा आयन्त्यथ हस्तपादान् प्रक्षाल्यैतेनैव पथा यथेतमेत्य गार्हपत्ये स्रुवाहुतिं जुहोति "स्वाहा नमो य इदं चकार" इति। अथानुमतेन सञ्ज्ञां करोति धेनुं ददाति' इति। हे गार्हपत्य स्वाहा तुभ्यं दत्तामाहुतिं जुषाणः सेवमानो वीहि दक्षिणां दिशं जिगमिषुभिरस्माभिर्विगतो भव मास्माननूत्याय बाधिष्ठाः।

हुतत्वाङ्गविधायके सार्थवादेऽनुब्राह्मणे यथोक्ताहुतिविधिर-न्वयव्यतिरेकाभ्यामुन्नीयते "यदहुत्वा गार्हपत्य ईयुः। रुद्रो भूत्वाग्निरनूत्थाय*। अध्वर्युञ्च यजमानञ्च हन्यात्। वीहि स्वाहाहुतिं जुषाण इत्याह। आहुत्यैवैनꣳ शमयति" (ब्रा०) यत् यदि रुद्रः क्रूरदेवः। रुद्रो वै क्रूर इति श्रुतेः। "नार्ति-मार्च्छत्यध्वर्युर्न यजमानः" (ब्रा०) इति। अध्वर्युयजमानयो-रार्तिनिवारणाय जुहुयादित्यर्थः। दक्षिणाग्नेरुल्मुकनयनं विधत्ते "एकोल्मुकेन यन्ति। तद्धि निर्ऋत्यै भागधेयं" (ब्रा०) इति। उल्मुकेन युक्ता इत्यध्याहारः, निर्ऋतेरेकोल्मुकप्रियत्व-मर्थवादान्तरगतं हिशब्देन सूच्यते। दक्षिणपश्चिमयोरवा-न्तरदेशमङ्गुलिनिर्देशेन विधत्ते "इमां दिशं यन्ति। एषा वै निर्ऋत्यै दिक्। स्वायामेव दिशि निर्ऋतिं निरवदयते" (ब्रा०) इति। नीतस्योल्मुकस्य स्थापनाय देशविशेषं विधत्ते "स्वकृत इरिणे जुहोति प्रदरे वा। एतद्वै निर्ऋत्या आय-तनं। स्व एवायतने निर्ऋतिं निरवदयते" (ब्रा०) इति। इरिणमूषरक्षेत्रं, तच्च स्वकृतं स्वतःसिद्धं न तु यतः कुतश्चिदा-दायोषाः प्रक्षिप्ताः। प्रदरः स्वतःसिद्धं भूच्छिद्रं। द्वितीयमन्त्र-स्यायमर्थः। हे निर्ऋते पापदेवते एष एककपालपुरोडाशस्तव भागः, हे भूते स्वकीयभागे परितोषेणास्मदीयैश्वर्यहेतोः त्वमिदानीं हविष्मत्यसि। अत इमं यजमानमंहसो दारिद्र्य-प्रदात् पापात् मुञ्च। अत्र स्वाहाकारो बोधायनेनाध्याहृतः।

* अनूत्थायेति पाठान्तरः।

निर्ऋतिमुद्दिश्य प्रत्यक्षमेव भागं समर्पयितुमेतच्छब्द इत्यभिप्रेत्य व्याचष्टे "एष ते निर्ऋते भाग इत्याह। निर्दिशत्येवैनां" (ब्रा०) इति। भूतिशब्देन निर्ऋतिपरामर्शस्याभिप्रायमाह "भूते हविष्मत्यसीत्याह। भूतिमेवोपावर्तते" (ब्रा०) इति। प्राप्नोतीत्यर्थः। मन्त्रसामर्थ्यात् सर्वथा मुञ्चतीत्यमुमभिप्रायं दर्शयति "मुञ्चेममꣳहस इत्याह। अꣳहस एवैनं मुञ्चति"(ब्रा०) इति। चोदकप्राप्तं जुह्वा होममपवदितुं विधत्ते "अङ्गुष्ठाभ्यां जुहोति। अन्तत एव निर्ऋतिं निरवदयते"(ब्रा०)इति। अन्तत एव हस्ताग्रेणैव निर्ऋतिमपसारितवान् भवति। मुख्यब्राह्मणे विहितां दक्षिणां प्रशंसति "कृष्णं वासः कृष्णतूषं दक्षिणा। एतद्वै निर्ऋत्यै रूपं। रूपेणैव निर्ऋतिं निरवदयते" (ब्रा०) इति। राक्षसजातेः पापरूपाया निर्ऋतेर्देहः कृष्णवर्णः। पृष्ठभागदर्शनरहितं प्रत्यागमनं विधत्ते "अप्रतीक्षमायन्ति। निर्ऋत्या अन्तर्हित्यै" (ब्रा०) इति। अदर्शनायेत्यर्थः। तृतीयमन्त्रस्यायमर्थः। यो गार्हपत्य इदमस्माभिर्वो होतिशब्देन प्रार्थितमनुष्ठानं तथैव चकार तस्मै स्वाहा हविर्दत्तं नमस्कारश्च कृतः। विधत्ते "स्वाहा नमो य इदं चकारेति पुनरेत्य गार्हपत्ये जुहोति। आहुत्यैव नमस्यन्तो गार्हपत्यमुपावर्तन्ते" (ब्रा०) इति। नैर्ऋतप्रचारादूर्ध्वं लब्धावसरस्यानुमतहविषः प्रचारं विधत्ते "आनुमतेन प्रचरति। इयं वा अनुमतिः। इयमेवास्मै राज्यमनुमन्यते" (ब्रा०) इति। सर्वसम्मत्यां भूमावयमनुमतिशब्दोऽन्वर्थ इत्यभिप्रायः। 'नवस्तृति-

काया गोर्दानं प्रशंसति "धेनुर्दक्षिणा। इमामेव धेनुं कुरुते" (ब्रा०) इति। इमामेवानुमतिरूपां भूमिमेव। आनुमतादिभिरष्टाभिरिति यदुदाहृतं तत्रैकस्मिन् दिनेऽनुष्ठितादानुमतादन्यान् क्रमेण दिनान्तरेष्वनुष्ठेयानादित्यादीन् सप्त मुख्यान् यागान् विधत्ते "आदित्यं चरुं निर्वपति वरो दक्षिणाग्नावैष्णवमेकादशकपालं वामनो वही दक्षिणाग्नीषोमीयमेकादशकपालꣳ हिरण्यं दक्षिणैन्द्रमेकादशकपालमृषभो वही दक्षिणाग्नेयमष्टाकपालमैन्द्रं दध्यृषभो वही दक्षिणैन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुं प्रथमजो वत्सो दक्षिणा सौम्यꣳ श्यामाकं चरुं वासो दक्षिणा सरस्वत्यै चरुꣳ सरस्वते चरुं मिथुनौ गावौ दक्षिणा" इति। गौर्वै वर इति सूत्रकारेणोदाहृतत्वात् वरो गौः, वही भारवाही बलीवर्दः, ऋषभः सेचनसमर्थः षण्डः। आग्नेयैन्द्राभ्यां हविर्भ्यामुपेत एको यागः। ऐन्द्राग्नवैश्वदेवसौम्यैस्त्रिभिर्हविर्भिर्युक्त आग्रयणरूप एक एव यागः। सरस्वतीसरस्वद्देवताभ्यां हविर्भ्यां युक्तो याग एकः। तदेवमादित्यादयः सप्त सम्पद्यन्ते। अदितिदेवताकं कर्म प्रशंसति "आदित्यं चरुं निर्वपति। उभयीष्वेव प्रजास्वभिषिच्यते। दैवीषु च मानुषीषु च" (ब्रा०) इति। अनुमतिर्मानुषभूमिः, अत एव राज्यमनुमन्यत इत्युक्तं भवति। अदितिर्देवभूमिरित्यभिप्रेत्य दैवीषु प्रजास्वभिषेकं दर्शयति। अतः पूर्वराज्येन सह समुच्चित्योभयीष्वित्युच्यते। श्रेष्ठस्य गोर्दानं प्रशंसति "वरो दक्षिणा। वरो हि राज्यꣳ समृद्ध्यै" (ब्रा०) इति। वरः श्रेष्ठो

गोः तस्य राजगृहार्हत्वात् राज्यत्वम्। अग्निं विष्णुञ्च पृथक् प्रशंसति "आग्नावैष्णवमेकादशकपालं निर्वपति। अग्निः सर्वा देवताः। विष्णुर्यज्ञः। देवताश्चैव यज्ञञ्चावरुन्धे" (ब्रा०) इति। अग्नेः सर्वदेवतारूपत्वमन्यत्रोपपादितं। 'ते देवा अग्नौ तनूः सन्न्यदधत। तस्मादाहुरग्निः सर्वा देवताः' इति। पुनरप्यन्यत्राम्नातं 'ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवताः' इति। फलव्यापित्वाद्यज्ञस्य विष्णुत्वं। अग्नेर्विष्णोश्च प्रीतिकरं वडित्वं वामनत्वञ्च दर्शयति "वामनो वही दक्षिणा। यद्वही। तेनाग्नेयः। यद्वामनः। तेन वैष्णवः समृद्ध्यै" (ब्रा०) इति। अग्नीषोमीयस्य वैरिघातित्वं याजमानमन्त्रब्राह्मणयोर्वृत्रवधब्राह्मणे च प्रसिद्धमित्यभिप्रेत्याह "अग्नीषोमीयमेकादशकपालं निर्वपति। अग्नीषोमाभ्यां वा इन्द्रो वृत्रमहन्निति। यदग्नीषोमीयमेकादशकपालं निर्वपति। वार्त्रघ्नमेव विजित्यै" (ब्रा०) इति। तत्कर्म शत्रुघ्नमेव भूत्वा विजयाय पर्याप्तं भवति। हिरण्यस्य समृद्धिहेतुत्वं लोकप्रसिद्धमेव दर्शयति "हिरण्यं दक्षिणा समृद्ध्यै" (ब्रा०) इति। मुख्यब्राह्मणगतेनैन्द्रेण सह विकल्पितमैन्द्राग्नं प्रशंसति "इन्द्रो वृत्रꣳ हत्वा। देवताभिश्चेन्द्रियेण च व्यार्ध्यत। स एतमैन्द्राग्नमेकादशकपालमपश्यत्। तं निरवपत्। तेन वै स देवताश्चेन्द्रियञ्चावारुन्धे" (ब्रा०) इति। व्यार्ध्यत वृद्धो वियुक्तोऽभूत्। विधत्ते "यदैन्द्राग्नमेकादशकपालं निर्वपति। देवताश्चैव तेनेन्द्रियञ्च यजमानोऽवरुन्धे" (ब्रा०) इति। देवद्वयप्रीत्यर्थं गुणद्वयमित्येतद्दर्शयति "ऋषभो वही

दक्षिणा । यद्वही । तेनाग्नेयः । यदृषभः। तेनैन्द्रः समृद्ध्यै''(ब्रा० इति । एकस्मिन् यागे विहितं हविर्द्वयं गोगतं गुणद्वयञ्च पृथक् प्रशंसति "आग्नेयमष्टाकपालं निर्वपति । ऐन्द्रं दधि यदाग्नेयो भवति । अग्निर्वै यज्ञमुखं । यज्ञमुखमेवर्द्धिं पुरस्ताद्धत्ते । यदैन्द्रं दधि । इन्द्रियमेवावरुन्धे । ऋषभो वही दक्षिणा । यद्वही । तेनाग्नेयः । यदृषभः । तेनैन्द्रः समृद्ध्यै'' (ब्रा०) इति । अग्निमन्तरेण यज्ञस्याप्रवृत्तेरग्नेर्यज्ञमुखत्वं, तादृशाग्नेः प्रथमहविःप्रदानेन यागस्यादावेव समृद्धिं धृतवान् भवति हविर्द्वये दक्षिणाद्वये श्रूयमाणेऽपि कर्मैकत्वमिद्ध्यर्थमाग्रयणवती मन्त्ररूपां विधातुं प्रस्तौति "यावतीर्वै प्रजा ओषधीनामहुतानामाश्नन् । ताः पराभवन्'' (ब्रा०) इति । यावत्य ओषधीनां सम्बन्धिन्य इति शेषः । विधत्ते "आग्रयणं भवति हुताद्याय । यजमानस्यापराभवाय'' (ब्रा०) इति । तस्मिन मन्त्रे स्थितस्यैन्द्राग्नस्योपाख्यानेन जयहेतुत्वं दर्शयति "देवा वा ओषधीष्वाजिमयुः । ता इन्द्राग्नी उदजयतां । तावेतमैन्द्राग्नं द्वादशकपालं निरवृणातां । यदैन्द्राग्नो भवत्युज्जित्यै'' (ब्रा०) इति । माससामान्येन कपालसङ्ख्यां प्रशंसति "द्वादशकपालो भवति । द्वादश मासाः संवत्सरः। संवत्सरेणैवास्मा अन्नमवरुन्धे'' (ब्रा०) इति । वैश्वदेवमन्नं रुचिहेतुरित्येतद्दर्शयति "वैश्वदेवश्चरुर्भवति । वैश्वदेवं वा अन्नं । अन्नमेवास्मै स्वदयति'' (ब्रा०) इति । प्रथमजस्य जनिष्यमाणवत्सापेक्षया समृद्धिहेतुत्वमित्याह "प्रथमजो वत्सो दक्षिणा समृद्ध्यै'' (ब्रा०) इति । तृतीय-

हविषः सोमदेवतायाः स्वीकारे कारणमाह "सौम्यꣳ श्यामाकं चरुं निर्वपति। सोमो वा अकृष्टपच्यस्य राजा। अकृष्टपच्यमेवास्मै स्वदयति" (ब्रा०) इति । प्रतिग्रहमन्त्रे सोमाय वास इति श्रुतिमनुसन्धाय दक्षिणां प्रशंसति "वासो दक्षिणा। सौम्यꣳ हि देवतया वासः समृद्ध्यै" (ब्रा०) इति। समृद्धिहेतुत्वेन सरस्वतीसरस्वतो चरुमिथुनदक्षिणाश्च प्रशंसति "सरस्वत्यै चरुं निर्वपति। सरस्वते चरुं। मिथुनमेवावरुन्धे। मिथुनौ गावौ दक्षिणा समृद्ध्यै" (ब्रा०) इति। अत्र द्रव्यदेवतासम्बन्धानामष्टभ्योऽधिकत्वाद् यागेष्वप्याधिक्यशङ्काभ्रमवारणायाष्टसङ्ख्यां विधातुं प्रस्तौति "एति वा एष यज्ञमुखादृद्ध्याः। योऽग्नेर्देवताया एति" (ब्रा०) इति। एति पृथग्भवत्यपगच्छतीत्यर्थः। वक्ष्यमाणप्रकारेणाग्नेरष्टत्वसङ्ख्यात्मकत्वात् तत्सङ्ख्याया अपगम एवाग्निसकाशादपगमः, योऽग्नेरपगच्छति स यज्ञमुखाद्यज्ञप्रारम्भादृद्ध्या यज्ञसमाप्तेश्चापगच्छति। विधत्ते "अष्टावेतानि हवीꣳषि भवन्ति। अष्टाक्षरा गायत्री। गायत्रोऽग्निः। तेनैव यज्ञमुखादृद्ध्या अग्नेर्देवतायै नैति" (ब्रा०) इति। गायत्र्या अग्नेश्च मुखजत्वेन सहोत्पन्नत्वलक्षणः सम्बन्धः। तेनैव तेषां हविःशब्दवाच्यानां कर्मणामष्टत्वेन यज्ञप्रारम्भसमाप्तिभ्यामग्निदेवतायाश्च नापगच्छति।

तत्र विधिविवेकसहितो विनियोगसङ्ग्रहः।

"आदावानुमतं तस्य मध्ये नैर्ऋतमत्र च।
वीहीत्याद्यास्त्रयो मन्त्रा विनियोगस्तु वर्ण्यते॥
वीह्येष नम इत्यग्निप्रदराग्निषु हूयते।

सहैवानुमतेनाष्टौ यागाः प्रथम ईरिताः॥ इति।

अथ मीमांसा। चतुर्थाध्यायस्य चतुर्थपादे चिन्तितं।

“राजसूयेऽनुमत्यादि देवनादि च, ते उभे।
मुख्ये उतैकमुख्यत्वं स्यादाद्यः प्रक्रियैक्यतः॥
यागानां राजसूयत्वादङ्गित्वं फलवत्त्वतः।
देवनाद्यफलं यत्तदङ्गं फलवतो यजेः॥

राजसूयप्रकरणे यागरूपा अनुमत्यादयो बह्व्य इष्टयः श्रुताः। अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति। नैर्ऋतमेककपालं। आदित्यं चरुं निर्वपति। आग्नावैष्णवमेकादशकपालमित्यादयः। यथैता इष्टयः तथा पशवोऽपि श्रुताः। आदित्यां मल्हां गर्भिणीमालभते मारुतीं पृश्निं पष्ठौहीमिति। मल्हा मणिला गले स्तनयुक्तेत्यर्थः। तस्या अदितिर्देवता। पृश्निरल्पतनुः। तस्या मरुतो देवताः। यावता वयसा वर्षत्रयरूपेण पृष्ठे भारं वोढुं शक्तिर्भवति तावद्वयस्का पष्ठौही। एवमभिषेचनीयादयः सोमयागाः श्रुताः। तथा वल्मीकवपायां होम इत्यादयो दर्विहोमाः श्रुताः। यथैत इष्टिपशुसोमदर्विहोमाश्चतुर्विधा यागरूपा एवमयागरूपा अपि द्यूतादयः श्रुताः पष्ठौहीं दीव्यति अक्षैर्दीव्यति राजन्यं जिनाति शौनःशेफमाख्यापयत इत्येवमादयः। तत्र यागा यथा मुख्याः तथा देवनादीनामपि मुख्यत्वं युक्तं प्रकरणपाठस्योभयत्रसमानत्वादिति प्राप्ते ब्रूमः। राजा स्वाराज्यकामो राजसूयेन यजेतेत्यत्राख्यातवाच्यायां भावनायां धातुवाच्यो यागः करणं राजसूय-

शब्दस्याप्रसिद्धार्थत्वाद् यागसामानाधिकरण्येन तन्नामधेयं भवति। तथा सति राजसूयेन यागेन स्वाराज्यं भावयेदिति वाक्यार्थपर्यवसानात्। अनुमत्यादीनां यागानामेव फलवत्त्वादङ्गित्वं तत्सन्निधौ श्रूयमाणमफलं देवनादिकं यागाङ्गं।

दशमाध्यायस्य प्रथमपादे चिन्तितं।

"सा किमस्त्यनुमत्यादौ न वाऽस्त्यङ्गिन्युपक्रमात्।
सङ्घस्योपक्रमो नेष्टौ द्वारलोपान्न सा भवेत्"॥

अनुमत्यै पुरोडाशमष्टाकपालं निर्वपतीत्यादिना राजसूये दर्शपूर्णमासेष्टिविकृतयो बह्व्यो विहितास्तासु आरम्भणीयास्ति न वेति सन्देहः। दीक्षणीयादिवत् अनुमत्यादीनामन्याङ्गत्वाभावात् सोमयागवत् सर्वासामङ्गित्वेनोपक्रमसम्भवात् तद्द्वारेणारम्भणीयास्तीति पूर्वपक्षः। यद्यप्यङ्गिभूता अनुमत्यादयस्तथाप्येकैकस्या इष्टेः पृथगारम्भो नास्ति अन्यथा प्रधानेषु आग्नेयादिष्वन्वारम्भणीयायाः षट्कृत्वोऽनुष्ठानं प्रसज्येत। अथोच्यते प्रधानानां षण्णामाग्नेयादीनां सङ्घस्य दर्शपूर्णमासेष्टित्वात् तस्यैक आरम्भ इति। तर्ह्यत्रापीष्टिपशुसोमदर्विहोमरूपाणामनेकेषां प्रधानानां सङ्घस्य राजसूयत्वात् सङ्घस्योपक्रमोऽस्तु, न चासौ सङ्घो दर्शपूर्णमासविकृतिर्येन तत्रारम्भणीयां शङ्केत। अस्ति चात्रापरः सर्वारम्भार्थो यागः, अग्निष्टोममग्रे ज्योतिष्टोममाहरतीति। ज्योतिष्टोमावान्तरसंस्थाभेदरूपस्य अग्निष्टोमस्याम्नातत्वात् तस्मादनुमत्यादिष्विष्टिषु आरम्भद्वारलोपात् साऽरम्भणीया न भवेत्।

तत्रैव तृतीयपादेऽन्यच्चिन्तितं।

"वासोवत्सं समुच्चेयमन्वाहार्येण वा न वा।

अविरोधात् समुच्चेयं न कार्यैक्याद्विरोधतः" ॥

आग्रयणे श्रूयते 'वासो दक्षिणा वत्सः प्रथमजो दक्षिणा' इति। तदेतत्प्राकृतेनान्वाहार्येण सह विरोधाभावात् समुच्चीयत इति मन्दः पूर्वपक्षः। एककार्यत्वेन विरोधित्वान्न समुच्चयः किन्तु बाध इति राद्धान्तः।

अत्रैवान्यच्चिन्तितं।

"अन्वाहार्यस्य धर्मोऽत्र न कार्यः क्रियतेऽथ वा।

न तद्धर्मत्वतो मैवं साधनत्वप्रयुक्तितः" ॥

सन्त्यन्वाहार्यधर्मास्तान् कल्पसूत्रकार उदाजहार 'दक्षिणसद्म उपहर्तवै' इति सम्प्रेष्यति। ये ब्राह्मणा उत्तरतस्तान् यजमान आह 'दक्षिणत एत' इति तेभ्योऽन्वाहार्यं ददाति 'ब्राह्मणा अयं व ओदनः' इति। प्रतिगृह्णतः 'उत्तरतः परीत' इति सम्प्रेष्यति। सोऽयं धर्मो वासोवत्से न कार्यस्तस्यान्वाहार्यनिमित्तत्वात्। मैवं। अन्वाहार्यस्य दक्षिणारूपत्वेनानतिसाधनत्वप्रयुक्त्या तद्धर्माः क्रियन्ते। तत्साधनत्वं वासोवत्सेऽपि समानं तस्मादत्रापि सन्ति ते धर्माः।

अत्रैवान्यच्चिन्तितं।

"पाकोऽस्ति नो वा वत्से स्यादन्वाहार्यस्य दर्शनात्।

न वत्सनाशादश्रोती दक्षिणा मांसदानतः" ॥

अन्वाहार्ये पाकोऽस्ति पूर्वन्यायेन तद्धर्मातिदेशात् वत्सेऽपि

पाकः स्यादिति चेत् न वस्त्रनाशप्रसङ्गात्। अस्त्विति चेत् न, तथा सति मांसदानेन श्रुतहान्यश्रुतकल्पने प्रसज्येयातां तस्मान्नास्ति वस्त्रपाकः।

तत्रैवान्यच्चिन्तितं।

"वाससोऽस्ति न वा पाको विनाशाभावतोऽस्त्यसौ।
वैयर्थ्यादप्यशक्यत्वात् पाको वाससि नोचितः"॥

वासस उष्णोदकभाण्डप्रक्षेपेण वस्त्रस्येव विनाशो नास्ति। तस्मादन्वाहार्यवत्पाकोऽस्तीति चेत्। मैवं। ओदनत्वार्थो हि पाकः। न हि वाससः सहस्रधा पच्यमानस्यौदनता सम्भवति न च पाकः कर्तुं शक्यते। न ह्युष्णोदकसम्बन्धः पाकशब्दार्थः किन्तु तण्डुलादीनां विक्लित्तिं जनयितुं कृतः पुरुषयत्नः। न च विक्लित्तिर्वाससोऽस्ति तस्मादतिदिष्टः पाको बाध्यते।

तत्रैवान्यच्चिन्तितं।

"अभिघारोऽस्ति नो वात्र शक्यत्वादस्त्यवाससः।
अस्त्वन्वाहार्यवन्मैवं स्वादुताया असम्भवात्"॥

स्पष्टोऽर्थः।

सप्तमाध्यायस्य तृतीयपादे चिन्तितं।

"वासोऽनसी वानतक्षणातिदेशकरे न वा।
आद्यः क्रियानिमित्तत्वात् जातिवाचित्वतोऽन्तिमः"॥

वासो ददात्यनो ददातीति श्रूयते। तत्र यूपशब्दस्य यथा शास्त्रीयच्छेदनतक्षणादिक्रिया प्रवृत्तिनिमित्तं तथा वासः-शब्दस्य लौकिकी कुविन्दकर्तृकी तन्तुवायक्रिया। अनःशब्दस्य

वर्द्धकिकर्तृका दारुतक्षणादिक्रिया। तस्माद्दासोऽनःशब्दयोः क्रियातिदेशकत्वाद् वानतक्षणे कारयित्वा तदुभयं दातव्यमिति चेत्। न। गवाश्वादिशब्दवत् जातिवाचित्वात्। पाचकादिशब्दानां क्रियामुपलक्ष्य प्रयुज्यमानत्वात् क्रियैव प्रवृत्तिनिमित्तं वासःशकटादिषु क्रियामनुपलक्ष्यापि जातिमुपलक्ष्य शब्दं प्रयुञ्जते तस्माद्दासोऽनःशब्दौ न क्रियामतिदिशतः।

द्वादशाध्यायस्य द्वितीयपादे चिन्तितं।

"बर्हिराग्रयणे किञ्चित् प्रसूनं बाऊत्वतः।
प्राथम्याच्चाग्रिमो मैवमलोपात्कांस्यभोजिवत्"॥

ऐन्द्राग्नवैश्वदेवद्यावापृथिव्ययागा आग्रयणेष्टौ सह प्रयुज्यन्ते। तत्रैन्द्राग्नवैश्वदेवयोर्बर्हिर्मात्रं चोदकप्राप्तं तत्प्रकृतौ बर्हिर्विशेषस्यानुक्तत्वात्। द्यावापृथिव्ये तु स्वप्रकृत्यनुसारेण प्रसूनं बर्हिः प्रतिदिश्यते। प्रसूनं पुष्पितं लूनशेषान्मूलात्पुनरुत्पन्नं वा। तत्राग्रयणे यत्किञ्चिद् बर्हिर्मात्रमाहर्तव्यं, ऐन्द्राग्नवैश्वदेवयोरनेकत्वेन प्रथमत्वेन च तदानुगुण्यस्य न्याय्यत्वादिति प्राप्ते ब्रूमः। बर्हिरन्तरस्वीकारे द्यावापृथिव्ये प्रमाणप्राप्तः प्रसूननियमो लुप्येत। प्रसूनस्वीकारे त्वैन्द्राग्नवैश्वदेवयोर्न किञ्चिल्लुप्येत तस्मादलोपाय कांस्यभोजिन्यायेन प्रसूनमेव कर्तव्यं। शिष्यस्य कांस्यभोजनव्रतमस्ति गुरोस्तु तन्नास्ति तयोस्तु सहभोजने यथोपसर्जनमपि शिष्यमनुसृत्य व्रतमलोपयितुं कांस्यमाद्रियते तथात्रापि द्रष्टव्यं।

तत्रैवान्यच्चिन्तितं।

"द्यावापृथिव्यस्तन्त्री स्यात् सर्वे वा तन्त्रिणोऽग्रिमः ।
प्रैषन्यायात्, प्रसूनस्य तन्त्रित्वाचोदकत्वतः ॥
प्रसूनत्वं नोपदिष्टमविरोधात् समाश्रितं ।
तन्त्रित्वं नियतौ शक्तं नाऽतः सर्वेऽत्र तन्त्रिणः" ॥

यथा मैत्रावरुणप्रैषमन्त्रविकारः पशुसम्बन्धात् पशोस्तन्त्रित्वमापादयति, तथा प्रसूनं द्यावापृथिव्यसम्बन्धित्वात् द्यावापृथिव्यस्य तन्त्रित्वमापादयतीति प्राप्ते ब्रूमः। उक्तप्रैषमन्त्रविकारः प्रत्यक्षश्रुतः, इह तु प्रसूनत्वमतिदिष्टत्वान्न तन्त्रित्वमापादयितुं क्षमं। न च प्राबल्याभावे कथं तदाश्रयणमिति वाच्यं, ऐन्द्राग्नादिना सह विरोधाभावमात्रेण तदाश्रयणात्। तस्मादेकस्य तन्त्रित्वनियमाभावे आग्नेयादिवत् सर्वेऽप्यत्र तन्त्रिणः ॥ ० ॥

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठके प्रथमोऽनुवाकः ॥ ० ॥

आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुं मारुतꣳ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालं ॥
॥ १ ॥

5967

आग्नेयꣳ सौम्यं मारुतमष्टादश ॥ २ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके द्वितीयोऽनुवाकः ॥ * ॥

प्रथमानुवाके प्रायणीयादक्क उत्तरभाविन आनुमतादयोऽष्टौ यागा: नैर्ऋतमन्त्रास्तोक्ता:। द्वितीये चातुर्मास्येषु प्रथमपर्वरूपं हविरष्टकं विधत्ते "आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुं मारुतꣳ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालं" इति। स्पष्टोऽर्थ:। एतेषां वैश्वदेवादीनां चातुर्मास्यानामानुमताद्यनन्तरभावित्वं पाठप्राप्तमापस्तम्बो विशदयति 'एताभिरन्वहमिष्ट्वा चातुर्मास्यान्यारभते तै: संवत्सरं यजते' इति। तेषु चातुर्मास्येषु प्रथमपर्वणो वैश्वदेवस्य देशकालौ स एवाह 'प्राचीनप्रवणे वैश्वदेवेन यजते' इति। 'फाल्गुन्यां पौर्णमास्यां चैत्रियां वा वैश्वदेवेन यजते' इति। तस्मिन् वैश्वदेवकर्मणि प्रथमभावीन्याग्नेयादीनि पञ्च हवींष्युपाख्यानेन प्रशंसति "वैश्वदेवेन वै प्रजापति: प्रजा असृजत। ता: सृष्टा न प्राजायन्त। सोऽग्निरकामयत। अहमिमा: प्रजनयेयमिति। स प्रजापतये शुचमदधात्। सोऽशोचत् प्रजामिच्छमान:। तस्माद्यञ्च प्रजा भुनक्ति यञ्च न। तावुभौ शोचत: प्रजामिच्छमानौ। तास्वग्निमप्यसृजत्। ता अग्निरध्यैत्। सोमो रेतोऽदधात्। सविता प्राजनयत्। सरस्वती वाचमदधात्। पूषापोषयत्। ते वा

एते त्रिः संवत्सरस्य प्रयुज्यन्ते। ये देवाः पुष्टिपतयः। संवत्सरो वै प्रजापतिः। संवत्सरेणैवास्मै प्रजाः प्राजनयत्" (ब्रा०।१का०।६प्र०।२अ०) इति। पुरा कदाचित् प्रजापतिः प्रजाकामः सन् तत्साधनत्वेनेदं वैश्वदेवाख्यं कर्मानुष्ठाय तेनैव प्रजा असृजत। तास्ताः सृष्टाः प्रजा न प्राजायन्त स्वकीयान्यपत्यानि न लेभिरे। तदानीं प्रजापतिसृष्टाववस्थितः सोऽग्निर्मनस्येवमकामयत किमित्यपत्यरहिता इमाः प्रजा अहं प्रजनयेयं अपत्योत्पादिकाः करिष्यामीत्येवं कामयमानः सोऽग्निः प्रजाः सृष्टवते प्रजापतये शोकमुत्पादितवान्। प्रजापतिसृष्टानां प्रजानामपत्याभावस्यापत्योत्पादनकामिना वह्निना स्मारितत्वात् प्रजापतौ वह्निः शोकोत्पादक उच्यते। सोऽग्निः प्रजापतेः शोकमुत्पाद्य स्वस्याप्यपत्याभावेन प्रजामपत्यरूपां इच्छमानोऽशोचत्। यस्मात् पुत्रवान् प्रजापतिः पौत्रमिच्छन्नशोचत्, यस्मात् पुत्राभावादग्निरशोचत्तस्माल्लोकेऽपि यं पितरमुत्पन्ना पुत्ररूपा प्रजा भुनक्ति पालयति, यश्चापत्यरहितमनुत्पन्ना प्रजा न पालयति तावुभावपि पौत्ररूपां पुत्ररूपां च प्रजामिच्छन्तौ तदलाभाच्छोचतः। प्रजापतिः स्वासु प्रजासु प्रजामपत्यमुत्पादयितुमग्निमप्यसृजत् अभ्यनुज्ञातवान्। अनुज्ञातः सोऽग्निस्ताः प्रजा अध्येत् प्राप्तवान् मिथुनभावेन सङ्गतवानित्यर्थः। ततः सोम आग्नेयं रेतस्तासु प्रजासु गर्भभावेन धारितवान्। ततः सविता प्रसवकाले प्राजनयत् प्रजाः। तेषु अपत्येषु सरस्वती वाचमदधात्, सम्भाषितुमभ्यासं कार-

यामास। ततः सम्भाषमाणान् बालकान् पूषाभ्यवर्द्धयत्। ये देवा अग्निसोमादयोऽपत्यपोषा अपत्यपालकाः त एतेऽग्न्यादयः पूषान्ताः पञ्च देवाः पुष्टिकरत्वेन संवत्सरस्य मध्ये चातुर्मास्येषु त्रिः प्रयुज्यन्ते, वैश्वदेववरुणप्रघाससाकमेधाख्येषु पर्वसु पञ्चानामेतेषामाग्नेयादीनां सञ्चारित्वात्। सोऽयं प्रयोगत्रयकालः संवत्सर एव प्रजापतिस्वरूपः। अतः प्रजापतिरूपेण प्रयोगत्रययुक्तेन संवत्सरेणैवास्मै अनुष्ठात्रे प्रजा उत्पादितवान् भवति। पञ्च यागान् प्रशस्य षष्ठं प्रशंसति "ताः प्रजा जाता मरुतोऽघ्नन्। अस्मानपि न प्रायुचतेति। स एतं प्रजापतिर्मारुतꣳ सप्तकपालमपश्यत्। तं निरवपत्। ततो वै प्रजाभ्योऽकल्पत। यन्मारुतो निरूप्यते। यज्ञस्य क्लृप्त्यै। प्रजानामघाताय" (ब्रा०) इति। एकोनपञ्चाशन्मरुत उत्पन्नास्ताः प्रजा हतवन्तः। केनाभिप्रायेण। अस्मानप्येतस्मिन् वैश्वदेवे कर्मणि एताः प्रजा न प्रयुक्तवत्य इति। प्रजाभ्योऽकल्पत तासां प्रजानां रक्षणाय समर्थोऽभूत्। अतोऽयं षष्ठो यागः यज्ञस्य सम्पूर्त्यै प्रजानामहिंसायै च सम्पद्यते। कपालसङ्ख्यां प्रशंसति "सप्तकपालो भवति। सप्त गणा वै मरुतः। गणश एवास्मै विशं कल्पयति" (ब्रा०) इति। सप्तानां समूह एकैको गणः। तादृशास्च गणाः सप्तसङ्ख्याकाः। तया सप्तसङ्ख्ययास्मै यजमानाय बहुगणरूपां प्रजां सम्पादयति। सप्तमयागे द्रव्यं प्रशंसति "स प्रजापतिरशोचत्। याः पूर्वाः प्रजा असृक्षि। मरुतस्ता अवधिषुः। कथमपराः सृजेयेति। तस्य शुष्म आण्डं भूतं

निरवर्तत। तन्नुदहरत्। तदपोषयत्। तत्प्राजायत। आण्डस्य वा एतद्रूपं। यदामिक्षा। यन्नुद्धरति। प्रजा एव तद्यजमानः पोषयति" (ब्रा०) इति। तस्य प्रजापतेः शुष्मो बलमाण्डं भूतं आण्डवत्पिण्डाकारं प्राप्य निर्गतं पिण्डीभूतं व्युदहरत् विभज्योद्धृतवान्, उद्धृत्य च तत्पोषयित्वा प्रजारूपेणोदपादयत्। पिण्डरूपाया आमिक्षाया अण्डरूपत्वात् तन्नुद्धरणेन प्रजापतिवद्यजमानः प्रजाः पोषयति पोषितवान् भवति। अनेनार्थवादेनाऽपूर्वार्थत्वान्नुद्धरेदिति विधिरुन्नेतव्यः। तदीयां देवतां प्रशंसति "वैश्वदेव्यामिक्षा भवति। वैश्वदेव्यो वै प्रजाः। प्रजा एवास्मै प्रजनयति" (ब्रा०) इति। बहुभिर्देवैरग्न्यादिभिरुक्तप्रकारेणोत्पादितत्वात् प्रजानां वैश्वदेवत्वं। विभज्योद्धृतयोरामिक्षाभागयोर्वाजिनसेचनं विधत्ते "वाजिनमानयति। प्रजास्वेव प्रजातासु रेतो दधाति" (ब्रा०) इति। दध्यानयनेन घनीभूतामिक्षाशब्दवाच्यक्षीरपिण्डस्य प्रजारूपेणाविर्भावः पूर्वार्थवादे निरूपितः। अतस्तस्मिन् पिण्डे वाजिनाख्येन क्षीरगतनीरेण सेचने सति प्रजातासु प्रजासु रेतो धारितं भवति। अष्टमयागदेवतां प्रशंसति "द्यावापृथिव्य एककपालो भवति। प्रजा एव प्रजाता द्यावापृथिवीभ्यामुभयतः परिगृह्णाति" (ब्रा०) इति। अथाद्यावुक्तानां पञ्चानां पाठे प्राप्तं क्रमं प्रशंसति "देवासुराः संयत्ता आसन्। सोऽग्निरब्रवीत्। मामग्रे यजत। मया मुखेनासुरान् जेष्यथेति। मां द्वितीयमिति सोमोऽब्रवीत्। मया राज्ञा जेष्यथेति। मां

तृतीयमिति सविता। मया प्रसूता जेष्यथेति। मां चतुर्थीमिति सरस्वती। इन्द्रियं वोऽहं धास्यामीति। मां पञ्चममिति पूषा। मया प्रतिष्ठया जेष्यथेति। तेऽग्निना मुखेनासुरानजयन्। सोमेन राज्ञा। सवित्रा प्रसूताः। सरस्वतीन्द्रियमदधात्। पूषा प्रतिष्ठासीत्। ततो वै देवा व्यजयन्त। यदेतानि हवीꣳषि निरुप्यन्ते विजित्यै" (ब्रा०) इति। लोके युद्धार्थमुद्यतायां सेनायां केचन शूरा भटा मुखतो योद्धुं गच्छन्ति। तेषां युद्धं द्रष्टुं कश्चिद्राजा स्वामित्वेन सन्निधत्ते। केचन दण्डहस्ताः पृष्ठतः स्थित्वा योद्धृनपरावृत्तये बलात् प्रेरयन्ति। अन्ये केचन दुन्दुभ्यादिजयघोषेण योद्धृणामुत्साहं जनयन्ति। अपरा कियत्यपि सेना पुरोगतायाः युध्यन्त्याः सेनायाः पृष्ठतः सहायत्वेनावतिष्ठते। तानेतान् पञ्चविधव्यापारान् अग्न्यादयः क्रमेण स्वीकृतवन्तः। ततो देवानां जयोऽभूत्। ततोऽत्रापि पञ्च हविषां निर्वापे जयो भवति। शाखान्तरगतेनोपवपन्तीति वाक्येन वैश्वदेवादिषु चतुर्षु चातुर्मास्यपर्वसु साधारण्येनोत्तरवेद्युपवापः प्राप्तः, तमुपवापं वैश्वदेवपर्वणि प्रतिषेधति "नोत्तरवेदिमुपवपति। पशवो वा उत्तरवेदिः। अजाता इव ह्येतर्हि पशवः" (ब्रा०) इति। उत्तरवेदिसमीपे तदाभिमुख्येन पशूनां बन्धनात् उत्तरवेदेः पशुत्वं। पूर्वोक्तरीत्या वैश्वदेवस्य प्रजापतिसृष्टिसाधनत्वात् सृष्टव्यासु प्रजासु अन्तर्भूतानां पशूनां वैश्वदेवादूर्द्धमुत्पत्तिकालो न त्विदानीं, अतः पशुरूपा उत्तरवेदिर्नात्रोपवप-

नीया। तदेवमनुब्राह्मणगतेन वैश्वदेवेन वै प्रजापतिरित्यनुवाकेन वैश्वदेवपर्वगतान्याग्नेयादीनि अष्ट हवींषि प्रशस्तानि। अथानुवाकान्तरेण वैश्वदेवपर्वगतानि विशेषाङ्गानि विधीयन्ते। तत्र चोदकप्राप्तस्य बर्हिषस्त्रैगुण्यं विधत्ते "त्रिवृद्बर्हिर्भवति। माता पिता पुत्रः। तदेव तन्मिथुनं। उल्बं गर्भो जरायु। तदेव तन्मिथुनं" (ब्रा०१का०।६प्र०।३अ०)इति। मात्रादित्रयं यदस्ति तदेव पुत्रयुक्तत्वात्तन्मिथुनं सार्थकं। गर्भस्यान्तर्वेष्टनमुल्बं बहिर्वेष्टनं जरायु। गर्भादित्रयं यदस्ति तदेव सारभूतेन गर्भेणोपेतत्वात्तन्मिथुनं सफलं, उल्बजराय्वोर्द्वित्वसामान्येन मिथुनत्वं। बर्हिषस्त्रैगुण्ये सति यथोक्तमिथुनद्वयसाम्यं सम्पद्यते। विधत्ते "त्रेधा बर्हिः सन्नद्धं भवति। त्रय इमे लोकाः। एष्वेव लोकेषु प्रतितिष्ठति" (ब्रा०) इति। प्रकृतौ दर्भमुष्टीनां पृथग्बन्धनं नैव विहितं सूत्रकारेण 'अदित्यै रास्नासीत्युदगग्रं वितत्य सुसम्भृता त्वा सम्भरामीति तस्मिन्निधनानि सम्भृत्य' इति प्रसारिते शुल्बे मुष्टीनां सम्भरणमात्रस्यैवाभिधानात्। इह तु मुष्टित्रयस्य पृथग्बन्धनं विशेषः। विधत्ते "एकधा पुनः सन्नद्धं भवति। एक इव ह्ययं लोकः। अस्मिन्नेव तेन लोके प्रतितिष्ठति" (ब्रा०) इति। पृथग्बद्धानां त्रयाणां मुष्टीनां पुनर्मिलित्वा बन्धनं कार्यं। चोदकप्राप्तस्य बन्धनस्य त्रेधाबन्धनेन बाधप्राप्तौ प्रतिप्रसवरूपोऽयं विधिः। चोदकेन सामान्यतः प्राप्तानां दर्भाणां पुष्पितत्वरूपं विशेषमत्र विधत्ते "प्रसुवो भवन्ति। प्रथमजामेव पुष्टिमवरुन्धे"

(ब्रा०) इति। प्रसूनोपेता दर्भाः प्रसुवं। विधत्ते "प्रथमजो वत्सो दक्षिणा समृद्ध्यै" (ब्रा०) इति। अनूयाजार्थस्य द्रव्यस्य ग्रहणं विधत्ते "पृषदाज्यं गृह्णाति। पशवो वै पृषदाज्यं। पशूनेवावरुन्धे" (ब्रा०) इति। दधिमिश्रमाज्यं पृषदाज्यं। ग्रहणे सङ्ख्यां विधत्ते "पञ्च गृहीतं भवति। पाङ्क्ता हि पशवः" (ब्रा०) इति। सपुच्छपादैः पञ्चभिर्युक्तत्वात् पङ्क्तिच्छन्दसः साध्यत्वाद्वा पशूनां पाङ्क्तत्वं। मिश्रणं प्रशंसति "बहुरूपं भवति। बहुरूपा हि पशवः समृद्ध्यै" (ब्रा०) इति। दधिबिन्दूनामाज्यबिन्दूनामनेकरूपत्वात् बहुरूपत्वं, गोमहिषादिरूपेण पशवः बहुरूपाः। हविरासादनादूर्द्ध्वं सामिधेनीभ्यः पुरा मन्थनं विधत्ते "अग्निं मन्थन्ति। अग्निमुखा वै प्रजापतिः प्रजा असृजत। यदग्निं मन्थन्ति। अग्निमुखा एव तत्प्रजा यजमानः सृजते" (ब्रा०) इति। हविःसादनादूर्द्ध्वभावित्वमापस्तम्बो दर्शयति 'पञ्च होत्रा यजमानः सर्वाणि हवीꣳष्यासन्नान्यभिमृशति पश्चादग्निर्मन्थ्यः सामिधेन्यश्च' इति। होतृमन्त्रब्राह्मणे श्रूयते 'तद्भूयो ऽतप्यत। तस्मात्तेपानादग्निरजायत' इति। 'स प्रजननादेव प्रजा असृजत' इति च। तत्राग्नेः प्रथमसृष्टत्वात्प्रजानामग्निमुखत्वं। शाखान्तराभिहितां प्रयाजानूयाजसङ्ख्यां हृदि कृत्वा यागं प्रशंसति "नव प्रयाजा इज्यन्ते। नवानूयाजाः। अष्टौ हवीꣳषि। द्वावाघारौ। द्वावाज्यभागौ। त्रिꣳशत्सम्पद्यन्ते। त्रिꣳशदक्षरा विराट्। अन्नं विराट्। विराजैवान्नाद्यमवरुन्धे" (ब्रा०) इति। दशाक्षरपादैस्त्रिभिर्युक्तस्य विराट्-

छन्दसः त्रिंशदक्षरत्वं। अलङ्करणकाले आज्येनैककपालमभिपूरयतीत्यापस्तम्बेन यदुक्तं तदिदं द्वेधा प्रशस्य विधत्ते "यजमानो वा एककपालः। तेज आज्यं। यदेककपाल आज्यमानयति। यजमानमेव तेजसा समर्द्धयति। यजमानो वा एककपालः। पशव आज्यं। यदेककपाल आज्यमानयति। यजमानमेव पशुभिः समर्द्धयति" (ब्रा०) इति। विशेषान्तरं विधातुं प्रस्तौति "यदल्पमानयेत्। अल्पा एनं पशवोऽभुञ्जन्त उपतिष्ठेरन्। यद्बह्वानयेत्। बहव एवैनं पशवो भुञ्जन्त उपतिष्ठेरन्" (ब्रा०) इति। भुञ्जन्तः क्षीरदानादिना पालयन्तः। अभुञ्जन्त इति तद्विपर्ययः। पशूनामल्पत्वमपालयितृत्वं चेत्युभौ दोषौ। बहुत्वं पालयितृत्वं चेत्युभौ गुणौ। तत्र गुणसम्पादनेन प्रशंसन् विधत्ते "बह्वाशीयावि: पृष्ठं कुर्यात्। बहव एवैनं पशवो भुञ्जन्त उपतिष्ठन्ते" (ब्रा०) इति। बहुन्याज्ये पुरोडाशस्य पृष्ठमतिमज्य यथा दृश्यते तथा तावद्बह्वाज्यमानयेत् तथा सत्याज्यस्य बहुत्वात् पशूनामल्पत्वदोषो न भविष्यति। पुरोडाशपृष्ठस्याविर्भूतत्वादपालयितृत्वमपि न भवति। कृत्स्नस्यापि पुरोडाशस्य होमं विधातुं प्रस्तौति "यजमानो वा एककपालः। यदेककपालस्यावद्येत्। यजमानस्यावद्येत्। उद्वा माद्येद्यजमानः। प्र वा मीयेत" (ब्रा०) इति। इतरपुरोडाशेषु भक्षणार्थमवशेष्य किञ्चिदेवावदीयते। तद्वदत्राप्यवदानेन यजमानस्यावयवः छिद्येत, अथवा उन्मत्तो भवेत् यद्वा प्रमीयेत। कृत्स्नहोमं विधत्ते "सकृदेव होतव्यः। सकृ-

दिव हि सुवर्गो लोकः" (ब्रा०) इति। सकृदेव कृत्स्न एव, स्वर्गलोकस्य सकृत्त्वमखण्डितत्वं। एककपाले पूर्वमानीतस्य बर्ह्याज्यस्य होमं विधत्ते "हुत्वाभिजुहोति। यजमानमेव सुवर्गं लोकं गमयित्वा। तेजसा समर्द्धयति" (ब्रा०) इति। आदौ पुरोडाशं हुत्वा तस्योपर्याज्यं जुहुयादित्यर्थः। चोदकप्राप्तेनाहवनीयेनैककपालं प्रशंसति "यजमानो वा एककपालः। सुवर्गो लोक आहवनीयः। यदेककपालमाहवनीये जुहोति। यजमानमेव सुवर्गं लोकं गमयति" (ब्रा०) इति। कयाचिदुपपत्त्या पुरोडाशस्य चोदकप्राप्तं स्रुचा होममपोद्य हस्तेन होमः प्रसक्तः तद्वारयितुं स्रुचा होमस्य प्रतिप्रसवं विधत्ते "यद्धस्तेन जुहुयात्। सुवर्गाल्लोकाद्यजमानमवविध्येत्। स्रुचा जुहोति। सुवर्गस्य लोकस्य समष्ट्यै" (ब्रा०) इति। अवविध्येत्, प्रच्यावयेत्। पुरोडाशो येन सन्निवेशेन पात्रेऽवस्थितस्तेनैव सन्निवेशेनाग्नौ तस्य स्थितिः। शाखान्तरे विहितः स्रुचा ह्यमानस्त्ववाङ्मुखो वह्नौ पतेत् अतस्तद्विधिविरोधं परिहर्तुं हस्तेन होतव्यमित्येषां मन्दानामुपपत्तिः। हुतस्य पुरोडाशस्य नैश्चल्यं विधातुं प्रस्तौति "यत्प्राङ् पद्येत। देवलोकमभिजयेत्। यद्दक्षिणा पितृलोकं। यत्प्रत्यक्। रक्षाꣳसि यज्ञꣳ हन्युः। यदुदङ्। मनुष्यलोकमभिजयेत्" (ब्रा०) इति। यद्यपि लोकादिजयो न स्वरूपेण दोषस्तथाप्यधिकफलभावनायां सत्यां तावन्मात्रत्वं दोष एव। विधत्ते "प्रतिष्ठितो होतव्यः। एककपालं वै

प्रतितिष्ठन्तं द्यावापृथिवी अनुप्रतितिष्ठतः। द्यावापृथिवी ऋतवः। ऋतून् यज्ञः। यज्ञं यजमानः। यजमानं प्रजाः। तस्मात्प्रतिष्ठितो होतव्यः" (ब्रा०) इति। प्रागादिदिक्षु पतनपरिहारेण होमस्थान एव प्रतिष्ठितः निश्चलो यथा भवति तथा होतव्यः। ऋतव इत्यादिषु अनुप्रतितिष्ठन्तीत्यादिकं द्रष्टव्यं। तस्मादिति पूर्वस्य विधेरुपसंहारः। तदेतदुक्तं कल्पहोमादिकमापस्तम्बेन स्पष्टमुदाहृतं 'उपांशु प्रचरति सर्वहुतमपर्यावर्तयन्जुहुं प्रतिष्ठितं हस्तेन जुहुयात्' इति। स्रुचा होमेऽप्यपर्यावृत्तिं सम्प्रदायविद एवं सम्पादयन्ति 'शिक्ये पुरोडाशमवस्थाप्य वामहस्तेन शिक्याग्रं धृत्वा दक्षिणहस्तेन स्रुचमधस्ताद्धारयित्वा तया स्रुचा होमं कुर्वन् वामहस्तेन शिक्यमीषदुद्धृत्य वह्नौ स्थापयेत्' इति। वैश्वदेव्यामिक्षायाः निःसृतं वाजिनशब्दाभिधेयं यन्नीरं तस्य वाजिसञ्ज्ञकान् देवानुद्दिश्य यागं विधत्ते "वाजिनो यजति। अग्निर्वायुः सूर्यः। ते वै वाजिनः। तानेव तद्यजति। अथो खल्वाहुः। छन्दाꣳसि वै वाजिन इति। तान्येव तद्यजति" (ब्रा०) इति। तस्य यागस्य कालं विधातुं प्रस्तौति "ऋक्सामे वा इन्द्रस्य हरी सोमपानौ। तयोः परिधय आधानं। वाजिनं भागधेयं। यदप्रहृत्य परिधीञ्जुहुयात्। अन्तराधानाभ्यां घासं प्रयच्छेत्" (ब्रा०) इति। हरी अश्वौ तयोर्वशीकरणाय मुखे प्रक्षिप्तो लोहविशेष आधानं। अन्तर्मुखमध्येऽवस्थितमाधानं ययोस्तावन्तराधानौ। हस्तेन मुखे प्रक्षिप्यमाणः सांज्यशर्क-

रमुद्गादिपिण्डो घासस्तृणविशेषो वा, न ह्याधानेऽङ्गारवस्थिते सति घासो भक्षयितुं शक्यः। विधत्ते "प्रहृत्य परिधीञ्जुहोति। निराधानाभ्यामेव घासं प्रयच्छति" (ब्रा०) इति। परिधीनामग्नौ प्रहारेण आधानस्यापनीतत्वात् घासो भक्षयितुं शक्यते। सोऽयं काल आपस्तम्बेन स्पष्टोक्तः 'परिधीन् प्रहृत्य सꣳस्रावान्तं कृत्वा वाजिनपात्रमुपस्तीर्यान्तर्वेदि बर्हिरनुविषिञ्चन् वाजिनं गृह्णाति नाभिघारयति' इति। तत्र पात्रग्रहणकाले पात्रस्याभिक्षरणेन अधोऽवस्थितस्य बर्हिषो विशेषेण सेचनं विधत्ते "बर्हिषि विषिञ्चन् वाजिनमानयति। प्रजा वै बर्हिः। रेतो वाजिनं। प्रजास्वेव रेतो दधाति" (ब्रा०) इति। सोमवत्परस्परोपह्वपूर्वकं भक्षणमप्राप्तत्वादिह विधत्ते "समुपहूय भक्षयन्ति। एतत्सोमपीथा ह्येते। अथो आत्मन्नेव रेतो दधते" (ब्रा०) इति। वाजिनयागस्य सान्नाय्यविकृतित्वेऽपि सान्नाय्यवदिडाभक्षणं न कर्तव्यं, किन्तु सोमवद्भक्षयेत्। एतदेव वाजिनभक्षणं सोमपीथः सोमपानं येषामृत्विजां ते एतत्सोमपीथाः। वाजिनभक्षणे यजमानस्य चरमभक्षणं विधत्ते "यजमान उत्तमो भक्षयति। पशवो वै वाजिनं। यजमान एव पशून् प्रतिष्ठापयन्ति" (ब्रा०) इति। एतस्मिन् वैश्वदेवकर्मणि मन्त्रे विशेषाभावान्मन्त्रकाण्डे प्रधानविधय एवाम्नाताः। अतो नास्ति विनियोगसङ्ग्रहः।

अथ मीमांसा। प्रथमाध्यायस्य चतुर्थपादे चिन्तितं।

"चातुर्मास्याद्यपर्वणोःकाग्नेयाद्यष्टकान्तिमे।

वैश्वदेवेति शब्दोक्तो गुणः सप्तस्य नाम वा ॥
नामत्वे रूपराहित्यादविधिर्गुणता ततः।
अग्न्यादिभिर्विकल्प्यन्ते विश्वे देवास्तु सप्तसु ॥
अनूद्याष्टौ यजेतेति तत्सङ्घे नाम वर्णितं।
अविधित्वेऽप्यर्थवत् स्यान्नाम प्राक्प्रवणादिषु ॥
इज्यन्तेऽत्र यजन्ते वा विश्वे देवा इतीदृशी।
निरुक्तिर्न विकल्पः स्यादुत्पत्त्युत्पन्नशिष्टतः" ॥

चातुर्मास्ययागस्य चत्वारि पर्वाणि वैश्वदेवो वरुणप्रघासः साकमेधः शुनासीर्यश्चेति। तेषु प्रथमे पर्वण्यष्टौ यागा विहिताः 'आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुं मारुतꣳ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालं" इति। तेषामष्टानां सन्निधाविदमाम्नायते 'वैश्वदेवेन यजेत' इति। तत्राग्नेयादीन् यजेतेत्यनूद्य वैश्वदेवशब्देन देवतारूपो गुणस्तेषु विधीयते। यद्यपि वैश्वदेव्यामिक्षायां विश्वे देवाः प्राप्तास्तथाप्याग्नेयादिषु सप्तसु यागेष्वप्राप्तत्वाद्विधीयते। तेष्वप्यग्न्यादिदेवताः सन्तीति चेत्। तर्हि गत्यभावात्तेषु देवता विकल्प्यन्तां। नामधेयत्वे तु नाममात्रस्याविधेयत्वाद् द्रव्यदेवतयोरभावेन यागस्यात्र स्वरूपासम्भवात् श्रूयमाणो विधिरनर्थकः स्यात्। तस्माद् गुणविधिरिति प्राप्ते ब्रूमः। उत्पत्तिवाक्ये विहिताग्नेयादीनष्टौ यागान् यजेतेत्यनूद्याष्टानां सङ्घे वैश्वदेवशब्दो नामत्वेनोपवर्ण्यते। न च विधित्वाभावेऽपि नामोपदेशवैयर्थ्यं। प्राचीनप्रवणे वैश्वदेवेन

यजेतेत्यादिषु वैश्वदेवशब्देनैवाष्टानां मन्त्रस्य व्यवहर्तव्यत्वात्। नामप्रवृत्तिनिमित्तभूता निरुक्तिविशेषाः, आमिक्षायागे विश्वेषां देवानामिज्यमानतया तत्सहचरितानां सर्वेषां छत्रिन्यायेन वैश्वदेवत्वं। अथवा विश्वे देवा अष्टानां कर्तार इति वैश्वदेवत्वं। तथा च ब्राह्मणं "यद्विश्वे देवाः समयजन्त। तद्वैश्वदेवस्य वैश्वदेवत्वं" इति। देवताविकल्पस्तु समानबलत्वाभावान्न युज्यते। अत्रैव गुरुमतमाह।

"गुणनामत्वसन्देहादप्रमा चोदनेति चेत्।
नोक्तन्यायेन मन्त्रस्य नामधेयत्वनिर्णयात्"॥

स्पष्टोऽर्थः।

द्वितीयाध्यायस्य द्वितीयपादे चिन्तितं।

"गुणः कर्मान्तरं वा स्याद्वाजिभ्यो वाजिनं त्विति।
गुणो देवाननूद्योक्तः समुच्चयविकल्पतः॥
आमिक्षोत्पत्तिशिष्टत्वात् प्रबला तत्र वाजिनं।
गुणोऽप्रविश्य कर्मान्यत् कल्पयेद्वाजिदेवकं"॥

तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रूयते। घनीभूतपिण्ड आमिक्षा, वाजिनं जलं। तत्र आमिक्षाद्रव्यभाजो यागे विश्वे देवा उक्ताः। ते च वाजिभ्य इत्यनेनानूद्यन्ते, वाजोऽन्नमामिक्षारूपमेषामस्तीति तन्निष्पत्तेः।ताननूद्य वाजिनद्रव्यरूपो गुणो विधीयते। तच्च द्रव्यमामिक्षाद्रव्येण सह समुच्चीयतां विकल्प्यतां वेति प्राप्ते ब्रूमः। उत्पत्तिशिष्टेनामिक्षाद्रव्येण अवरुद्धे वैश्वदेवयागे वा-

जिनद्रव्यस्य उत्पन्नशिष्टतया अवकाशाभावाद् वाजिनशब्दो वाजिशब्दार्थस्य देवतान्तरतामापादयति। ततो द्रव्यदेवतालक्षणस्य रूपस्य भिन्नत्वात् कर्मान्तरं।

चतुर्थाध्यायस्य प्रथमपादे चिन्तितं।

"आमिक्षा वाजिनञ्च स्याद्दध्यानीतेः प्रयोजिका।
उतामिक्षैव सामर्थ्यं द्वयोस्तुल्यं ततोऽग्रिमः॥
आमिक्षा पय एवात्र तच्छब्दाम्नानतो रसात्।
प्रयोजिकैका प्राधान्यादनुनिष्पादि वाजिनं"॥

इदमाम्नायते 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनं' इति। तत्र पयसि दधिप्रक्षेपादामिक्षाद्रव्यं यथा निष्पद्यते तथा वाजिनद्रव्यमपीति दध्यानयनस्य जनकत्वसामर्थ्यमुभयद्रव्यविषयं तुल्यमेव। तस्मादुभयमपि प्रयोजकमिति प्राप्ते ब्रूमः। न द्रव्यान्तरमामिक्षा, किन्तु पय एवेति तच्छब्दादिभिरवगम्यते। यस्मिन् पयसि दधिप्रक्षेपः सामिक्षेति तच्छब्देन पयः परामृश्यते। आमिक्षायागे पुरोऽनुवाक्यायामप्येवमाम्नातं 'जुषन्तां युज्यं पयः' इति। पयो रसश्च मधुर आमिक्षायामनुवर्तते। न तु वाजिने। ततः प्राधान्येन पयसो घनीभावं कर्तुं दध्यानीतमित्यामिक्षैव प्रयोजिका। अनुनिष्पाद्येव वाजिनं न तु प्रयोजकं।

अष्टमाध्यायस्य द्वितीयपादे चिन्तितं।

"सुरावाजिनयोः सोमस्येष्टेर्वा सोमशब्दतः।
आद्यो मैवं हविःसाम्यात् सोमशब्दः प्रशस्तये"॥

सौत्रामण्यां सुराग्रहाः श्रुताः 'सुराग्रहान् गृह्णाति' इत्यादिना। चातुर्मास्येषु वाजिनयागः श्रुतः 'वाजिभ्यो वाजिनं' इति। तत्रोभयत्र सोमस्य विध्यन्तः कार्यः। कुतः। 'सोमो वै वाजिनं सुरा सोमः' इति वाजिने सुरायाश्च सोमशब्दप्रयोगात्। सोमशब्दस्याग्निहोत्रशब्दवद्धर्मानतिदिशतीति चेत्, मैवं, ऐष्टिकहविःसाम्यात्। ओषधिविकृतं सुरा, सान्नाय्यविकृतं वाजिनं। तस्मादैष्टिको विध्यन्तः। सोमशब्दस्त्वर्थवादगतत्वान्नाग्निहोत्रादिनामवदतिदेशकः। यदि वाजिनस्य प्रतिपत्तिकर्मत्वात्नास्ति धर्मापेक्षा तर्हितस्मिन्नंशे कृत्वा चिन्तास्तु।

तत्रैवान्यच्चिन्तितं।

"द्वयोर्दध्नोऽथ पयस आमिक्षायां हितत्वतः।
द्वयोर्दध्नो घनत्वेन प्राधान्यात् पयसो भवेत्"॥

तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षेति श्रुताया आमिक्षायाः सान्नाय्ययागीययोर्दधिपयसोर्धर्माः कार्याः, आमिक्षाया उभयजन्यत्वादित्येकः पक्षः। घनत्वस्याधिक्याद्दधिधर्मा इति द्वितीयः पक्षः। पयस्यामिक्षामुत्पादयितुं सहकारित्वेन दध्यानीयते, ततः पयस एव मुख्यकारणत्वात्तद्धर्म एव न्याय्यः।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठके द्वितीयोऽनुवाकः॥ * ॥

ऐन्द्राग्नमेकादशकपालं मारुतीमामिक्षां वारुणी-
मामिक्षां कायमेककपालं प्रघास्यान् हवामहे मरुतो
यज्ञवाहसः करम्भेण सजोषसः। मो षू ण इन्द्र पृत्सु
देवास्तु स्म ते शुष्मिन्नवया। मही ह्यस्य मीढुषो यव्या।
हविष्मतो मरुतो वन्दते गीः। यद्ग्रामे यदरण्ये यत्सभा-
यां यदिन्द्रिये यच्छूद्रे यदर्य एनश्चकृमा वयं यदेक-
स्याधि धर्मणि तस्यावयजनमसि स्वाहा। अक्रन्कर्म
कर्मकृतः सह वाचा मयोभुवा। देवेभ्यः कर्म कृत्वास्तं
प्रेत सुदानवः ॥ १ ॥

वयं यद्वेः॰शतिश्च ॥ ३ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डे ऽष्टमप्रपाठके
तृतीयोऽनुवाकः ॥ * ॥

द्वितीये वैश्वदेवाख्यं प्रथमपर्वोक्तं। तृतीये वरुणप्रघासाख्यं
द्वितीयं पर्वोच्यते। तत्र विशेषहवींषि चत्वारि विधत्ते “ऐन्द्रा-
ग्नमेकादशकपालं मारुतीमामिक्षां वारुणीमामिक्षां कायमे-
ककपालं” इति। निर्वपतीति पूर्वानुवाकादनुवर्तते। ताने-
तान् वरुणप्रघासान् विधातुं प्रस्तौति “प्रजापतिः सविता
भूत्वा प्रजा असृजत। ता एनमत्यमन्यन्त। ता अस्मादपाक्रा-

मन्। ता वरुणो भूत्वा प्रजा वरुणेनाग्राहयत्। ताः प्रजा वरुणगृहीताः। प्रजापतिं पुनरुपाधावन्नाथमिच्छमानाः। स एतान् प्रजापतिर्वरुणप्रघासानपश्यत्। तान् निरवपत्। तैर्वै स प्रजा वरुणपाशादमुञ्चत्" (ब्रा०१का०।६प्र०।४अ०) इति। सविता भूत्वोत्पादको भूत्वा। अत्यमन्यन्त अवज्ञां कृतवत्यः। वरुणो भूत्वा वरुणेन वरुणपाशरूपेण जलोदररोगेण, नाथं स्वामिनं रोगशान्त्यै, वरुणप्रघासानेतन्नामकान् यागविशेषान्। इदानीं विधत्ते "यद्वरुणप्रघासा निरुप्यन्ते। प्रजानामवरुणग्राहाय" (ब्रा०) इति। अस्य पर्वणः कालमापस्तम्बो दर्शयति 'ततश्चतुर्षु मासेष्वाषाढ्यां श्रावण्यां वा उदवसाय वरुणप्रघासैर्यजेत' इति। उदवसाय पूर्वदेशान्निर्गत्य। अस्मिन् वरुणप्रघासपर्वणि द्वितीयां वेदिं विधातुं प्रस्तौति "तासां दक्षिणो बाहुर्न्यक्न आसीत्। सव्यः प्रसृतः। स एतां द्वितीयां दक्षिणतो वेदिमुदहन्। ततो वै स प्रजानां दक्षिणं बाहुं प्रासारयत्" (ब्रा०) इति। तासां प्रजानां, न्यक्नः शीतवातरोगेण नितरां सङ्कुचितः, वेदिमुदहन् वेदेरुद्धननं कृतवान्। विधत्ते "यद्द्वितीयां दक्षिणतो वेदिमुद्धन्ति। प्रजानामेव तद्यजमानो दक्षिणं बाहुं प्रसारयति। तस्माच्चातुर्मास्ययाज्यमुष्मिँल्लोक उभयाबाहुः। यज्ञाभिजितः ह्यस्य" (ब्रा०) इति। दक्षिणतस्त्वोदक्प्रागाया वेदेर्दक्षिणभागे। यस्माच्चातुर्मास्येषु वेदिद्वयमस्ति तस्मात्तद्याजी स्वर्गे बाहुद्वयोपेतो भवति। यद्यपि सर्वेषां बाहुद्वयमस्ति तथाप्येक एव बाहुस्तेषां सामर्थ्योपेतः।

अत एवाम्नातं 'तस्माद्दक्षिणोऽर्द्ध आत्मनो वीर्यावत्तरः' इति। अस्य बाहुद्वयमपि सामर्थ्यातिशयोपेतमिति विशेषः। तदेतदस्य यज्ञाभिजितं अनेन यज्ञेन सम्पादितं। उभयोर्वेद्योर्मध्ये त्रयोदशाङ्गुलिपरिमितं व्यवधानं विधत्ते "पृथमात्राद्वेदी असम्भिन्ने भवतः। तस्मात् पृथमात्रं व्यंऽसौ" (ब्रा०) इति। यस्माद्वेद्योरुक्तं व्यवधानं तस्माल्लोकेऽपि वामदक्षिणावंसौ पृथमात्रौ यद्वा पृथमात्रं त्रयोदशाङ्गुलपरिमाणं यथा भवति तथा विभक्तौ दृश्येते। विधत्ते "उत्तरस्यां वेद्यामुत्तरवेदिमुपवपति। पशवो वा उत्तरवेदिः। पशूनेवावरुन्धे। अथो यज्ञपरुषोऽनन्तरित्यै" (ब्रा०) इति। यज्ञपरुषो यज्ञावयवस्यानन्तरित्यै अन्तरायाभावार्थं। उत्तरवेदेरभावे तद्रूपो यज्ञावयवोऽन्तरितः स्यात्। वैश्वदेवपर्वण्युक्तानामाग्नेयमष्टाकपालमित्यादीनां पञ्च हविषां ब्राह्मणमनुब्राह्मणस्यातिदिशति "एतद्ब्राह्मणान्येव पञ्च हवींऽषि" (ब्रा०) इति। आग्नेयादीनां पञ्चानां विधायकं पूर्वस्मिन् पर्वणि यद्ब्राह्मणमेतदेवास्मिन् पर्वणि ब्राह्मणं विधायकं येषां पञ्चानां तान्येतद्ब्राह्मणानि। अत्रापि तथैवादौ पञ्च हवींष्यनुतिष्ठेदित्यर्थः। मुख्यब्राह्मणे विहितस्यैन्द्राग्नस्यातिदिष्टपञ्चहविरानन्तर्यं विधत्ते "अथैष ऐन्द्राग्नो भवति" (ब्रा०) इति। तस्मिन् यागे श्रुतौ देवौ प्रशंसति "प्राणापानौ वा एतौ देवानां। यदिन्द्राग्नी। यदैन्द्राग्नो भवति। प्राणापानावेवावरुन्धे। ओजो बलं वा एतौ देवानां। यदिन्द्राग्नी। यदैन्द्राग्नो भवति।

ओजो बलमेवावरुन्धे" (ब्रा०) इति। ओजो मानस उत्साहः, बलं शारीरमिति विशेषः। मुख्यब्राह्मणविहितमामिक्षायागमनूद्य तद्देवताकावेव मेषीमेषौ यवमयौ विधत्ते "मारुत्यामिक्षा भवति। वारुण्यामिक्षा। मेषी च मेषश्च भवतः। मिथुना एव प्रजा वरुणपाशान्मुञ्चति" (ब्रा०) इति। मारुत्यामिक्षा भवति मेषी च, वारुण्यामिक्षा भवति मेषश्चेति तत्तत्साहित्याभिधानार्थौ चकारौ। स्त्रीपुरुषरूपयोर्मेषीमेषयोरनुष्ठानेन मिथुनात्मकाः प्रजाः रोगान्मुक्ता भवन्ति। मेषीमेषयोर्गुणविशेषं विधत्ते "लोमशौ भवतो मेध्यत्वाय" (ब्रा०) इति। एतच्च सूत्रकारेण स्पष्टीकृतं 'ऊर्णाभिर्मेषप्रतिकृती लोमशौ कुरुते' इति। तयोर्मेषीमेषयोः पुरतः शमीपर्णस्थापनं विधत्ते "शमीपर्णान्युपवपति। घासमेवाभ्यामपि यच्छति" (ब्रा०) इति। घासमपीत्यन्वयः। शमीपर्णानां शताधिकसङ्ख्यां विधातुं प्रस्तौति "प्रजापतिमन्नाद्यं नोपानमत्। स एतेन शतेध्मेन हविषान्नाद्यमवारुन्ध। यत्परःशतानि शमीपर्णानि भवन्ति। अन्नाद्यस्यावरुद्ध्यै" (ब्रा०) इति। अत्तुं योग्यं शाल्यादिजन्यं यदन्नं तत्प्रजापतिर्न प्राप्नोत्। स च प्रजापतिरेतेन शमीवृक्षजन्येन शतसङ्ख्यायुक्तेन काष्ठसमूहेन दीपितेऽग्नौ हुतेन हविषा तदन्नाद्यं सम्पादितवान्। अतः परःशतानि शताधिकसङ्ख्यानि पर्णान्युपवपेत्। तत्र करीरोद्वापं विधातुं प्रस्तौति "सौम्यानि वै करीराणि। सौम्या खलु वा आहुतिर्दिवो वृष्टिं च्यावयति" (ब्रा०) इति। करीरनामकान्यङ्कु-

राणि सोमवल्लीसदृशत्वात् सौम्यानि, आकृतिरपि सोमसम्बन्धिनी वृष्टिहेतुः। विधत्ते "यत्करीराणि भवन्ति। सौम्यैवाकृत्या दिवो वृष्टिमवरुन्धे" (ब्रा०) इति। करीरशब्देन खर्जुरीफलान्युच्यन्त इति केचित्। तानि शमीपर्णवद्भच्छ्यत्वोपचारेण तयोः पुरत उपवपेत्। तथा च सूत्रकारः 'अथाभ्यां शमीपर्णकरीराण्युपवपति परःशतानि परःसहस्राणि च' इति। नवमयागं प्रशंसति "काय एककपालो भवति। प्रजानां कन्त्वाय" (ब्रा०) इति। सुखित्वायेत्यर्थः। कायः प्रजापतिदेवताकः। दीपपात्रसदृशानि यवपिष्टनिर्मितानि पात्राणि विधत्ते "प्रतिपुरुषं करम्भपात्राणि भवन्ति। जाता एव प्रजा वरुणपाशान्मुञ्चति। एकमतिरिक्तं। जनिष्यमाणा एव प्रजा वरुणपाशान्मुञ्चति" (ब्रा०) इति। दधिमिश्रा यवसक्तवः करम्भः। यजमानस्य गृहे यावन्तः पुरुषाः मनुष्याः तत्सङ्ख्यया पात्राणि विधायैकं पात्रमधिकं कुर्यात्। अत एव सूत्रकार आह 'आमपेषाणां पत्नी करम्भपात्राणि करोति। यावन्तो यजमानस्यामात्याः सस्त्रीकास्तावन्त्येकातिरिक्तानि'। तदेवमनुब्राह्मणगतेनानुवाकेन वरुणप्रघासादिविधयो देवताप्रशंसाश्चोक्ताः। अथानुवाकान्तरेण हविरासादनादिप्रयोगा उच्यन्ते। तत्र वेदिद्वये हविःसादनव्यवस्थां विधत्ते "उत्तरस्यां वेद्यामन्यानि हवीꣳषि सादयति। दक्षिणायां मारुतीं। अपधुरमेवैना युनक्ति। अथो ओज एवासामवहरति। तस्माद्ब्राह्मणस्य चत्रास्य विशोऽन्यतोऽपक्रमिणीः" (ब्रा०१का०।६प्र०।५अ०)

इति। मारुत्या आमिक्षाया अन्यान्याग्नेयादीनि अष्टौ हवींषि। मरुतो देवानां मध्ये विशः। अतो मारुत्याः पृथग्वेदिसादनादिना विशः। अपधुरमेव युनक्ति अपक्रमणमेव प्रापयति, धुरो गमनमपधुरं, धुःशब्देन बहुविधहविर्वहनयोग्या भूमिरुच्यते, सा चोत्तरगता वेदिः। तस्या अपगमनं यथा भवति तथा मरुद्रूपा एना विशो वेद्यन्तरे योजितवान् भवति। किञ्च। आसां विशामोजो बलमवहरत्येव न्यक्करोत्येव। यस्माद्विशां न्यक्कारः तस्माद्ब्राह्मणात् क्षत्रियाच्चेमा विशोऽन्यतः ग्रामान्तरे वा पीठिकान्तरे वा अपक्रामन्ति। प्रचारपौर्वापर्यं पाठेनैव प्राप्तं प्रशंसति "मारुत्या पूर्वया प्रचरति। अनृतमेवावयजते। वारुण्योत्तरया। अन्तत एव वरुणमवयजते" (ब्रा०) इति। मारुत्या आमिक्षायाः प्रथमप्रचारेण अनृतमयथाशास्त्रार्थानुष्ठानेन दोषमवयजते विनाशयति। वारुण्यामिक्षाया उत्तरकालीनप्रचारेण वरुणं वरुणपाशरूपं जलोदररोगमन्तत एवावयजते सर्वथैव विनाशयति। प्रचारात्प्राचीनेष्वङ्गेषु पूर्वोक्तपौर्वापर्यवैपरीत्यं विधत्ते "यदेवाध्वर्युः करोति। तत्प्रतिप्रस्थाता करोति। तस्माच्छ्रेयान् करोति। तत्पापीयान् करोति" (ब्रा०) इति। अध्वर्युरुत्तरवेद्यवस्थिताया वारुण्यामिक्षाया अनुष्ठाता, प्रतिप्रस्थाता तु दक्षिणवेद्यां मारुतीमनुतिष्ठति। तत्र यद्यदन्वाधानादिकमेकैकमङ्गमध्वर्युरनुतिष्ठति तत्तदङ्गं प्रतिप्रस्थाता तदनन्तरमेवानुतिष्ठेत। अत एव च लोकेऽपि सन्दिग्धेषु लौकिकवैदिकव्यवहारेषु श्रेयान्

प्रामाणिकत्वेन सम्प्रतिपन्नः पुरुषो यदेव करोति तदेव पापीयान् मूढोऽपि करोति। अत्र बोधायनेन यदिदमुक्तं 'अथ प्रतिप्रस्थाता पत्नीं पृच्छति पत्नि कस्ते जार इति। असाविति तं वरुणो गृह्णातु' इति। तदिदं विधत्ते "पत्नीं वाचयति। मेध्यामेवैनां करोति। अथो तप एवैनामुपनयति" (ब्रा०) इति। पापं प्रख्यापयेत् पापीति स्मृतिकारैरुक्तत्वाद् विद्यमानं जारमुद्दिश्य पत्नीं वाचयेत्। तेन च प्रख्यापनेन पत्नीं यागयोग्यां करोति। किञ्च सभामध्ये मानहानिसहिष्णुत्वरूपं यत्तपः तदप्येनां पत्नीं प्रतिप्रस्थाता प्रापयति। तस्याश्च पत्न्या लज्जां मुक्त्वा जारनिर्देशं विधत्ते "यज्जारꣳ सन्तं न प्रब्रूयात्। प्रियं ज्ञातिꣳ रुन्ध्यात्। असौ मे जार इति निर्दिशेत्। निर्दिश्यैवैनं वरुणपाशेन ग्राहयति" (ब्रा०) इति। मन्त्रकाण्डे प्रधानयागविधिभ्य ऊर्द्ध्वं प्रघास्यान् मो षू णो यद्ग्रामे अकन् कर्मेत्येते चत्वारो मन्त्रा आम्नाताः। तत्र प्रथममन्त्रस्य विनियोगमापस्तम्ब आह 'प्रघास्यान् हवामह इति प्रतिप्रस्थाता पत्नीमुदानयति' इति। पाठस्तु "प्रघास्यान् हवामहे मरुतो यज्ञवाहसः करम्भेण सजोषसः" इति। वरुणपाशरूपं कर्म प्रघ्नन्तीति वरुणप्रघासाः, तानर्हन्तीति वरुणप्रघास्याः। यज्ञं वहन्तीति यज्ञवाहसः। दधिसर्पिर्मिश्रैः सक्तुभिर्निष्पादितं पात्रजातं करम्भशब्देनोच्यते। तेन करम्भेण दक्षिणवेदिस्थितेऽग्नौ दम्पतिभ्यां हूयमानेन परस्परं समानप्रीतयः सजोषसः। तथाविधान् मरुतो हवामहे आह्वयामः। विधत्ते

"प्रघास्यान् हवामह इति पत्नीमुदानयति। अकृतैवैनां" (आ०) इति। एनां पत्नीं, अनेन मन्त्रपाठेनाकृतैवाहूतवानेव भवति। अवशिष्टस्य मन्त्रत्रयस्य विनियोगमाहापस्तम्बः 'अथा-न्तरा वेदी गत्वा यजमानः पत्नी चोत्तरेणोत्तरां वेदिमै-षीके शूर्पे करम्भपात्राण्योप्य शीर्षन्नधि निधाय पुरस्तात्प्रत्यञ्चौ तिष्ठन्तौ दक्षिणेऽग्नौ शूर्पेण जुहुतः मो षू ण इन्द्रेति यज-मानः पुरोऽनुवाक्यामन्वाह यद्ग्राम इत्युभौ याज्यामकन् कर्म कर्मकृत इति विपर्यन्तौ जपतः' इति। तत्र प्रथममन्त्रपाठस्तु "मो षू ण इन्द्र पृत्सु देवास्तु स्म ते शुष्मिन्नवया। मही ह्यस्य मीढुषो यव्या। हविष्मतो मरुतो वन्दते गीः" इति। हे इन्द्र देव नोऽस्मान् पृत्सु सङ्ग्रामेषु मो मैव प्रवर्तयेति शेषः। तदेत-दप्रवर्तनं सु समीचीनं वैरिणामेवासम्भवात्। हे शुष्मिन् बल-वन् ते तव प्रसादादवया अवयजनं अनिष्टनाशनमस्तु स्म सर्व-दा भवतु। यस्मात् कारणात् मीढुषो वृष्टिसेचनसमर्थस्य तव प्रसादादस्माकं मही भूमिर्यव्या यवादिकृत्स्नधान्ययोग्या तस्मादनिष्टनाशनमित्यन्वयः। गीरस्मदीया स्तुतिरूपा वाक् हविष्मतः करम्भपात्ररूपहविर्युक्तान् मरुतो वन्दते नमस्करो-ति स्तौतीत्यर्थः। द्वितीयमन्त्रपाठस्तु "यद्ग्रामे यदरण्ये यत्स-भायां यदिन्द्रिये यच्छूद्रे यदर्य एनश्चकृमा वयं यदेकस्याधि धर्मणि तस्यावयजनमसि स्वाहा" इति। अत्र सप्त यच्छब्दाः सप्तधा वाक्यभेदार्थाः स चादरार्थः। अर्ये स्वामिनि वैश्ये वा। एकस्य दम्पत्योर्मध्ये कस्यचिद्धर्मणि आत्मीये धर्मे वयं

यजमानो दारा दासाश्च ग्रामविषये यत्पापमधिकं चक्रम, तस्य सर्वस्यावयजनं विनाशकं करम्भपात्रजातं त्वमसि, अतः स्वाहा त्वां ददामीत्यर्थः। एतयोरुभयोर्याज्यापुरोऽनुवाक्ययोर्हौत्रत्वम-पवदितुं विधत्ते "यत्पत्नी पुरोऽनुवाक्यामनुब्रूयात्। निर्वीर्यो यजमानः स्यात्। यजमानोऽन्वाह। आत्मन्नेव वीर्यं धत्ते। उभौ याज्याꣳ सवीर्यत्वाय" (ब्रा०) इति। याज्यादृष्टान्तेन पुरोऽनुवा-क्यायामपि प्राप्तां पत्नीमर्थवादेन वारयति। पापरूपेण प्रविश्य वरुणो यज्ञघातीति वरुणो याज्यायामेनःशब्देन विवक्षित इति दर्शयति "यद्ग्रामे यदरण्य इत्याह। यथोदितमेव वरुणमवयज-ते" (ब्रा०) इति। दक्षिणवेदिगतेऽग्नौ होमं विधातुं प्रस्तौति "यजमानदेवत्यो वा आहवनीयः। भ्रातृव्यदेवत्यो दक्षिणः। यदाहवनीये जुहुयात्। यजमानं वरुणपाशेन ग्राहयेत्" (ब्रा०) इति। उत्तरदिक्स्थायां वेद्यामुत्तरवेद्युपवापेन निष्पन्न आ-हवनीयः। इतरवेदिगतोऽग्निर्दक्षिणः। विधत्ते "दक्षिणेऽग्नौ जुहोति। भ्रातृव्यमेव वरुणपाशेन ग्राहयति" (ब्रा०) इति। स्रुक्त्वमपवदितुं विधत्ते "शूर्पेण जुहोति। अन्नमेव वरुणमव-यजते" (ब्रा०) इति। अन्नसाधने शूर्पे भवमन्नं *भोज्यद्रव्यविना-शिनमित्यर्थः। होमगुणद्वयं क्रमेण विधत्ते "शीर्षन्नधि निधाय जुहोति। शीर्षत एव वरुणमवयजते। प्रत्यङ्तिष्ठन् जुहोति। प्रत्य'व वरुणपाशान्निर्मुच्यते" (ब्रा०) इति। करम्भपात्रपूर्ण

* अन्नं भोक्तव्यद्रव्यानिष्टविनाशिनमिति काशीस्थपुस्तकत्रयस्य पाठः। अन्यथा भोज्यद्रव्यविनाशनमिति तै०।

शूर्पं शिरसि सकृन्निधाय पश्चाज्जुहुयात् तेन शिरोरोगादिकं शाम्यति, पश्चिमाभिमुखेन होमेन प्रत्यङ्ङेव वरुणस्य प्रतिकूलत्वेन प्रबल एव सन् वरुणपाशान्निष्कृष्टो मुच्यते। तृतीयमन्त्रपाठस्तु "अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा। देवेभ्यः कर्म कृत्वास्तं प्रेत सुदानवः" इति। कर्मकृतोऽध्वर्युप्रमुखा यजमानपत्न्यन्ताः सर्वे। मयोभुवा, मयः शिवं सुखं। यद्वै शिवं तन्मय इति श्रुतेः। तत्सुखं भावयित्वा मन्त्रोच्चारणरूपया वाचा सह करम्भपात्रहोमान्तं कर्माक्रन् कृतवन्तः। हे सुदानवः सुष्ठु हविषः प्रदातारोऽध्वर्युप्रभृतयो देवार्थमिदं कर्म कृत्वा अस्तं प्रेत स्वगृहं गच्छत। अस्मिन्मन्त्रे उत्तरार्द्धतात्पर्यं दर्शयति "अक्रन् कर्म कर्मकृत इत्याह। देवानृणं निरवदाय। अनृणा गृहानुपप्रेतेति वावैतदाह" (ब्रा०) इति। देवान् प्रति प्रत्यर्पणीयं यदृणं तन्निरवदाय निःशेषेण प्रत्यर्प्य। अथावभृथद्रव्यं विधातुं प्रस्तौति "वरुणगृहीतं वा एतद्यज्ञस्य। यद्यजुषा गृहीतस्यातिरिच्यते। तुषाश्च निष्कासश्च" (ब्रा०) इति। वारुणयागे मेषार्थेषु यवेषु ये तुषाः यश्च निष्कासः पात्रलग्न आमिक्षांशलेपः, तदुभयं पूर्वमन्त्रेण गृहीतस्य द्रव्यस्यातिरिक्तोऽंशः। अतो यज्ञमध्ये रूढमेतद्वरुणगृहीतमेव। विधत्ते "तुषैश्च निष्कासेन चावभृथमवैति। वरुणगृहीतेनैव वरुणमवयजते" (ब्रा०) इति। अत्रावभृथशब्देन सौमिकावभृथधर्मोपेतं कर्मोच्यते। तदेतत्प्रत्यभिज्ञापयितुं तत्रत्यविधीन् सार्थवादाननुवदति "अपोऽवभृथमवैति। अप्सु वै वरुणः। साक्षादेव वरुण-

मवयजते। प्रतियुतो वरुणस्य पाश इत्याह। वरुणपाशादेव निर्मुच्यते। अप्रतीक्षमायन्ति। वरुणस्यान्तर्हित्यै। एधोऽस्येधिषीमहीत्याह। समिधैवाग्निं नमस्यन्त उपायन्ति। तेजोऽसि तेजो मयि धेहीत्याह। तेज एवात्मन्धत्ते" (ब्रा०) इति। अपः प्रत्यवभृथमनुतिष्ठेत् अप्सु कुर्यादित्यर्थः। अपामधिपतित्वादप्सु वरुणस्तिष्ठति, अतोऽत्र होमेन वरुणं साक्षादेव व्यवधानमन्तरेणैव विनाशयति, कर्मानुष्ठानादूर्द्ध्वमुदकसमीपं प्रतियुत इत्यनेन मन्त्रेण परित्यजेत्। उदकेषु स्थितो यो वरुणस्य पाशः स एष प्रतियुतः परित्यक्तः। परित्यज्य पृष्ठदेशमपश्यन्त एव प्रत्यागच्छेयुः। आगत्य एधोऽसि तेजोऽसीति द्वाभ्यामाहवनीये समिधावादध्यात्। हे अग्ने एधोऽसि अनया समिधाभिवृद्धोऽसि, अतस्त्वत्प्रसादाद्वयमप्येधिषीमहि समृद्धा भवेम। समिज्जन्यज्वालया तेजोऽसि, अतो मयि तेजः स्थापय।

अत्र विनियोगसङ्ग्रहः।

"पत्न्याङ्क्तानं प्रघास्येति प्रतिप्रस्थातृकर्म तत्।
स्वासी मो ष्वित्यनुब्रूयाद् यद्ग्राम इति दम्पती॥
अक्रन्नित्यपि॰ तावेव मन्त्रास्त्वत्वार ईरिताः"। इति।

अथ मीमांसा। सप्तमाध्यायस्य प्रथमपादे चिन्तितं।

"वैश्वदेवब्राह्मणस्यातिदेशो वादमात्रकः।
सवादाङ्गविधिस्तो वा हविर्विध्यन्वयाद्भवेत्॥
अर्थवादैकमिष्टोऽसौ नैवमङ्गविधेरपि।
समानः सोऽन्वयोऽङ्गानां विधिरप्यतिदिश्यतां"॥

चातुर्मास्येषु वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयनामकानि चत्वारि पर्वाणि। तत्र वैश्वदेवेऽष्टौ हवींषि विहितानि 'आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुं मारुतꣳ सप्तकपालं वैश्वदेवीमामिक्षां द्यावापृथिव्यमेककपालं' इति। तेषां हविषां ब्राह्मणेऽर्थवाद आम्नातः 'वार्त्रघ्नानि वा एतानि हवीꣳषि' इति। अङ्गविधयोऽपि तत्राम्नाताः 'त्रेधा सन्नद्धं बर्हिर्भवति त्रेधा सन्नद्ध इध्मः। नव प्रयाजा इज्यन्ते नवानूयाजाः' इति। एवं स्थिते वरुणप्रघासेषु पूर्वोक्तान्याग्नेयादीनि पञ्च हवींषि विधाय तदीयं पूर्वोदाहृतं ब्राह्मणमेतेषु पञ्चस्वतिदिशति 'एतद्ब्राह्मणान्येव पञ्च हवींषि यद्ब्राह्मणानीतराणि' इति, तत्रार्थवादमात्रस्यातिदेशो न्याय्यः, तस्य हविर्विधिभिः सह स्तुत्याः स्तावकरूपेणान्वयसम्भवात् अङ्गविधिना च तदसम्भवादिति चेत्। मैवं, उपकार्योपकारकभावेन हविषामङ्गानां चान्वयात्, तस्मादर्थवादसहितानामङ्गविधीनामतिदेशः।

तत्रैवान्यच्चिन्तितं।

"श्रुतमेककपालस्य ब्राह्मणस्यातिदेशनं।

तत्पूर्ववत्तथैन्द्राग्न एतद्ब्राह्मण इत्यपि"॥

एककपालब्राह्मणं वैश्वदेववरुणप्रघासेषु पठितं, ऐन्द्राग्नब्राह्मणं वरुणप्रघासेष्वाम्नातं। एवं स्थिते साकमेधेषु विहितयोरेककपालैन्द्राग्नयोर्ब्राह्मणातिदेश आम्नायते 'एतद्ब्राह्मण ऐन्द्राग्न एतद्ब्राह्मण एककपालो यद्ब्राह्मण इतरस्येतरस्य' इति।

तत्रोभयत्र पूर्वन्यायेन अर्थवादविधिसहिताङ्गकाण्डस्य सर्वत्रातिदेशः। पूर्वन्यायस्य विषयव्याप्तये वक्ष्यमाणोदाहरणस्मारणाय वाकथनं।

एकादशाध्यायस्य द्वितीयपादे चिन्तितं।

"मारुत्या सार्धमष्टाभिरङ्गे तन्त्रं भिदाथवा।
प्रयोगैकत्वतस्तन्त्रं भेदो देशस्य भेदतः"॥

वरुणप्रघासेष्वाग्नेयादीनि नव हवींषि विहितानि, तेषु मारुतीमामिक्षां प्रतिप्रस्थाता दक्षिणे विहारेऽनुतिष्ठति, इतराणि त्वष्टावध्वर्युरुत्तरे विहारेऽनुतिष्ठति, तेषामष्टानां प्रयोगैक्यात्तन्त्रेणाङ्गानि उभयवादिसम्मतानि। तथा तान्येव मारुत्या अपीत्यत्रापि तन्त्रं प्राप्तं। कुतः। वरुणप्रघासान्तःपातित्वेन प्रयोगैक्यात्। नन्वत्र विहारभेद आम्नातः 'पृथगग्नीन् प्रणयतः पृथग्वेदी कुरुतः' इति, सोऽयं पृथगनुष्ठानाभावे व्यर्थः स्यात्। मैवं, हविरासादनमात्रे तद्भेदोपयोगात्। अष्टावध्वर्युरुत्तरविहारे हवींषि आसादयति मारुतीमेव प्रतिप्रस्थाता दक्षिणेऽस्मिन्निति तद्विधानात् तस्मात्तन्त्रमिति प्राप्ते ब्रूमः। देशभेदात्प्रयोगभेदे सत्यङ्गानुष्ठानमपि भिद्यते। न च तस्य हविरासादनमात्रार्थता युक्ता। तदासादनस्य दृष्टदेशार्थत्वे सति त्यागेन अदृष्टार्थत्वकल्पनाप्रसङ्गात् न च प्रयोगभेदेनैव सादनभेदस्यापि सिद्धौ वचनमनर्थकं स्यादिति वाच्यं, अव्यवस्थानात् प्रतिप्रयोगप्राप्तौ तद्व्यवस्थार्थत्वात्। तस्माद्भेदेनाङ्गानुष्ठानं॥

तत्रैवान्यच्चिन्तितं।

"कर्तृभेदो न वा तत्र भेदःस्यादङ्गभेदवत्।

पञ्चर्त्विग्वचनान्नैवं द्वयोरुक्त्या व्यवस्थितिः"॥

तत्र पूर्वोक्तविषये प्रयोगभेदादाघाराद्यङ्गभेद इव होतृब्रह्मादीनां कर्तृणामपि भेद इति चेत्। मैवं, वाचनिकपञ्चसङ्ख्याविरोधात्। अध्वर्युप्रतिप्रस्थातृहोतृब्रह्माग्नीध्राः पञ्चर्त्विजः चातुर्मास्येषु विहिताः 'चातुर्मास्यानां यज्ञक्रतूनां पञ्चर्त्विजः' इति। यद्याग्नेयाद्यष्टके मारुत्याञ्च होत्रादिभेदः स्यात् तदा पञ्चसङ्ख्या बाध्येत। ननु पञ्चसङ्ख्यासिद्ध्यर्थमाग्नेयाद्यष्टके प्रतिप्रस्थाता प्राप्नुयात् मारुत्यां चाध्वर्युः प्राप्त इति चेत्। सत्यं। प्राप्तावेव तावुभावुभयत्र। व्यवस्था तु वचनाद्भविष्यति। तत्र वचनं पूर्वत्रोदाहृतं तस्मान्नास्ति कर्तृभेदः।

तत्रैवान्यच्चिन्तितं।

"तत्रैव पत्नीसंयाजादि भिन्नं तन्त्रतायवा।

तन्त्रमग्न्यैक्यतो मैवं कर्तृभेदानिवारणात्"॥

तत्रैवाग्नेयाद्यष्टके मारुत्याञ्च गार्हपत्ये होतव्येषु पत्नीसंयाजादिषु तन्त्रं युक्तं। कुतः। गार्हपत्यैकत्वात्। न हि आहवनीयवद्दक्षिणविहारे गार्हपत्यः पृथगस्ति, तस्मात्तन्त्रमिति प्राप्ते ब्रूमः। न तावत् पूर्वोक्तः कर्तृभेदो निवारयितुं शक्यते, तथा सत्यध्वर्युणा कृताः पत्नीसंयाजाः प्रतिप्रस्थातृकर्तृकार्यां मारुत्यां कथमुपकुर्युः। तस्मादध्वर्युः प्रतिप्रस्थाता च गार्हपत्ये पृथक् पत्नीसंयाजान् जुहुयातां।

द्वादशाध्यायस्य प्रथमपादे चिन्तितं।

"विहारभेदे निर्वापमन्त्रादेस्तन्त्रता न वा।
तन्त्रं द्वयोः स्मृतिः सिद्धेदुत्तमोक्त्या पृथग्भवेत्" ॥

वरुणप्रघासेष्वध्वर्युप्रतिप्रस्थात्रोर्विहारभेदेऽपि मन्त्रेष्वेकेनैव पठ्यमानेषु तयोरर्थस्मृतिसिद्धौ तन्त्रमिति चेत्। न। निर्वपामीत्युत्तमपुरुषार्थपाठमन्तरेण स्मृत्यभावात् तस्मादुभयोः पृथक् पाठः।

सप्तमाध्यायस्य तृतीयपादे चिन्तितं।

"निष्कासेन तुषैश्चावभृथं यन्तीत्यनूद्यते।
नीरोत्सेकः कर्मणो वा विधिः सौमिकधर्मिणः ॥
यो दर्शपूर्णमासाभ्यां वारुण्यां चोदनोद्गतः।
व्युत्सेकोऽनूद्यतामेष मैवं कर्मणि सौमिके ॥
मुख्योऽवभृथशब्दोऽतस्तस्मादृग्यत्रिविवक्षया।
धर्मानतिदिशन् कर्म विधत्ते धर्मसंयुतं" ॥

वरुणप्रघासेषु श्रूयते 'वारुण्या निष्कासेन तुषैश्चावभृथमवयन्ति' इति। निष्कास आमिक्षाया लेपः, प्राच्यां दिशि देवा ऋत्विजो मार्जयन्तामित्यादिभिर्मन्त्रैर्दर्शपूर्णमासयोर्दिक्षु सर्वास्वापो विविधमुत्सिच्यन्ते, सोऽयं व्युत्सेको वारुण्यामिक्षायामेव चोदकप्राप्तोऽनूद्यते। अस्ति हि व्युत्सेकस्यापि अवभृथत्वं, एष वै दर्शपूर्णमासयोरवभृथ इति श्रुतत्वादिति प्राप्ते ब्रूमः। सौमिके कर्मण्यवभृथशब्दो मुख्यः, तस्य शब्दस्य उद्भिदादिवद्विधेयक्रियासामानाधिकरण्येन नामधेयत्वात् तत्रैव वैदिकप्रयोगबाहुल्याच्च व्युत्सेके अप्सम्बन्धादुपचर्यते, न हि सौमिककर्मणोवाप्सां व्युत्से-

केऽवभृथभावनामंशचयवर्तीं पश्यामो येन तत्र मुख्यत्वमाशङ्क्येत तस्मात् सौमिककर्मवाचिनमवभृथशब्दं वरुणप्रघासप्रकरणे प्रयुञ्जान आम्नायो मासाग्निहोत्रन्यायेन सौमिकधर्मानतिदिशन् कर्मान्तरं तद्धर्मसंयुक्तं विधत्ते। न च विपर्ययेणात्रैव मुख्योऽवभृथोऽस्त्विति शङ्कनीयं, अपेक्षितस्य कर्मकलापस्यात्राभावात्। तस्मात्सौमिकधर्मापेतकर्मान्तरविधिः।

तत्रैवान्यच्चिन्तितं।

"तत्र द्रव्यं पुरोडाशस्तुषनिष्कासकावुत।
प्राप्तोऽवभृथशब्देन पुरोडाशोऽतिदेशतः॥
तुषनिष्कासयोरत्र साक्षात् क्लृप्तोपदेशतः।
अतिदेशप्रापितस्य पुरोडाशस्य बाधना"॥

तत्र पूर्वोक्ते कर्मान्तरे धर्मातिदेशकेन अवभृथशब्देन पुरोडाशोऽतिदिश्यते। अतिदेशस्योपदेशाद्दुर्बलः तस्मात्तुषनिष्कासाभ्यां पुरोडाशो बाध्यते।

एकादशाध्यायस्य द्वितीयपादे चिन्तितं।

"निष्कासावभृथे विप्रकर्षोऽस्य प्रतिपादनं।
उतार्थकर्म पश्वादावृवदाद्योऽवभृथशब्दतः॥
कर्मान्तरं तदापि स्यात्प्रतिपत्तिः प्रयाजवत्।
प्राधान्यादार्थकर्म स्यात् तत्रावभृथधर्मकं"॥

चातुर्मास्यगतेषु वारुणीमामिक्षां प्रकृत्य इदमाम्नायते 'वारुण्या निष्कासेन तुषैश्चावभृथमवयन्ति' इति। अत्रायं प्रयोगप्रकारः 'वरुणप्रघासेषु नव हवींꣳषि तेष्वष्टमं हवि-

वारुणामिक्षा नवमं हविः काय एककपालः वारुणामिक्षायां यवपिष्टनिर्मितं मेषमवदध्यात्' इति। ततः आमिक्षासंयुक्तं सर्वमवदाय हुत्वा, तत एककपालेन प्रचर्य्य भाण्डलिप्तेन वारुणामिक्षाया निष्कासेन च तुषैश्च अवभृथमनुतिष्ठन्तीति। तत्र संशयः। किं वारुणामिक्षाया एकमंशं यवमयमेषसहितं पूर्वं प्रदाय पश्चादेककपालप्रचारादूर्द्ध्वं निष्कासरूपेणांशान्तरेण तुषैश्च प्रचरितव्यमित्येवं प्रचारस्य विप्रकर्षः। उत कर्मान्तरं। तत्रापि किं प्रतिपत्तिकर्म आहोस्विदर्थकर्मेति। तत्र विप्रकर्ष इति तावत्प्राप्तं। कुतः, पशौ तथा दृष्टत्वात्। प्रातःसवने वपया प्रचर्य्य तृतीयसवने हृदयाद्यङ्गैः प्रचार इति सवनीयपशौ यथा प्रचारविप्रकर्षः तद्वदत्रापीत्याद्यः पक्षः। तथा सत्यवभृथशब्दवैयर्थ्यप्रसङ्गात् कर्मान्तरमिति पक्षान्तरं। तदाप्यामिक्षाहविःशेषस्य निष्कासस्यान्यस्मिन् कर्मणि हविष्ट्वायोगात् प्रयाजशेषन्यायेनेदं प्रतिपत्तिः स्यात्, यथा प्रयाजशेषेण हवींष्यभिघारयतीत्यत्र तच्छेषं संस्कर्तुमभिघारणमेवमत्रापि निष्कासः संस्क्रियत इति प्राप्ते ब्रूमः। तस्मिन् पक्षे निष्कासस्यैव संस्कार्यद्रव्यत्वेन प्राधान्यान्निष्कासमिति विभक्तिव्यत्ययः स्यात्। अतोऽवभृथस्य प्राधान्यादर्थकर्मत्वमेव द्रष्टव्यं। यदि चातुर्मास्येषु अवभृथः तदा तद्धर्मातिदेशाय तन्नामनिर्देशोऽस्तु, तस्य तदीयद्रव्यशेषस्यापि कर्मान्तरे विनियोगो वाचनिकः, तस्मादर्थकर्म।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डे ऽष्टमप्रपाठके तृतीयोऽनुवाकः॥ * ॥

अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकꣳ सूर्येणोद्यता मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुं पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो। देहि मे ददामि ते नि मे धेहि नि ते दधे। निहारमिन्नि मे हरा निहारं॥१॥

निहरामि ते। मरुद्भ्यः क्रीडिभ्यः पुरोडाशꣳ सप्तकपालं निर्वपति साकꣳ सूर्येणोद्यताग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुमैन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेककपालं॥ २॥

हरा निहारं चित्शच्च॥ ४॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके चतुर्थोऽनुवाकः॥ *॥

तृतीये वरुणप्रघासाख्यं द्वितीयं चातुर्मास्यपर्वोक्तं। चतुर्थपञ्चमषष्ठेषु साकमेधाख्यं तृतीयं पर्वोच्यते। तच्च पर्वदिनद्वयेऽनुष्ठेयं। तदाहापस्तम्बः 'ततश्चतुर्षु मासेषु पूर्वस्मिन् पर्वण्युपक्रम्य द्व्यहं साकमेधैर्यजत' इति। तत्र प्रथमदिने कर्तव्यानि त्रीणि हवींषि विधत्ते "अग्नयेऽनीकवते पुरोडाशमष्टाकपालं

निर्वपति साकꣳ सूर्येणोद्यता मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुं” इति। अनीकवते सैन्यवते। उद्यता सूर्येण साकमित्युदयकालविधिः। सम्यक्तपनं सन्तपनं तत्सम्बन्धिनः सान्तपना अनिष्टविनाशिन इत्यर्थः। मेधो यज्ञः, गृहस्य मेधस्य तदुभयवन्तो गृहमेधिन उभयपालका इत्यर्थः। सर्वासां यजमानस्य यावत्यो गावः सन्ति तावतीनां। विहिताखिष्टिषु प्रथमेष्टिदेवतागुणं प्रशंसति “देवासुराः संयत्ता आसन्। सोऽग्निरब्रवीत्। ममेयमनीकवती तनूः। तां प्रीणीत। अथासुरानभिभविष्यथेति। ते देवा अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निरवपन्। सोऽग्निरनीकवान्त्स्वेन भागधेयेन प्रीतः। चतुर्धानीकान्यजनयत। ततो देवा अभवन्। परासुराः। यदग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति। अग्निमेवानीकवन्तꣳ स्वेन भागधेयेन प्रीणाति। सोऽग्निरनीकवान्त्स्वेन भागधेयेन प्रीतः। चतुर्धानीकानि जनयते” (ब्रा०१का०।६प्र०।६अ०) इति। चतसृष्वपि दिक्षु असुरानवरोद्धुं चतुर्विधानि सैन्यानि। सूर्योदयकालं प्रशंसति “असौ वा आदित्योऽग्निरनीकवान्। तस्य रश्मयोऽनीकानि। साकꣳ सूर्येणोद्यता निर्वपति। साक्षादेवास्मा अनीकानि जनयति” (ब्रा०) इति। उष्णत्वादादित्यस्याग्नित्वं, उत्साहोपेतयोद्धृवत्सर्वतस्त्वरया प्रसराद्रश्मीनामनीकत्वं। द्वितीयाया इष्टेर्देवताया गुणं प्रशंसति “तेऽसुराः पराजिता यन्तः। द्यावापृथिवी उपाश्रयन्। ते देवा मरुद्भ्यः

सान्तपनेभ्यश्चरुं निरवपन्। तान् द्यावापृथिवीभ्यामेवोभयतः समतपन्। यन्मरुद्भ्यः सान्तपनेभ्यश्चरुं निर्वपति। द्यावापृथिवीभ्यामेव तदुभयतो यजमानो भ्रातृव्यान्त्सन्तपति" (ब्रा०) इति। तानसुरान् द्यावापृथिवीभ्यामेव कृत्स्नयोरपि द्यावापृथिव्योरुभयत असुरानामधस्तादुपरिष्टाच्च समतपन् प्रहाराद्युपद्रवेण सन्तापितवन्तः। कालं प्रशंसति "मध्यन्दिने निर्वपति। तर्हि हि तेक्ष्णिष्ठं तपति" (ब्रा०) इति। तर्हि मध्याह्नकाले। तेक्ष्णिष्ठमतिशयेन तीक्ष्णं यथा भवति तथा सूर्यस्तपति, हि प्रसिद्धमेतत्। चरुं प्रशंसति "चरुर्भवति। सर्वत एवैनान्त्सन्तपति" (ब्रा०) इति। चरुपाकभाण्डस्य सर्वतस्तप्यमानत्वात् शत्रूणामपि सर्वतः सन्तापः। तृतीयेष्टेर्देवताविशेषणं प्रशंसति "ते देवाः श्वो विजयिनः सन्तः। सर्वासां दुग्धे गृहमेधीयं चरुं निरवपन्। आशिता एवाद्योपवसाम। कस्य वाहेदं। कस्य वा श्वो भवितेति। स शृतोऽभवत्। तस्याहुतस्य नाश्नन्। न हि देवा अहुतस्याश्नन्ति। तेऽब्रुवन्। कस्मा इमꣳ होष्याम इति। मरुद्भ्यो गृहमेधिभ्य इत्यब्रुवन्। तं मरुद्भ्यो गृहमेधिभ्योऽजुहवुः। ततो देवा अभवन्। परासुराः। यस्यैवं विदुषो मरुद्भ्यो गृहमेधिभ्यो गृहे जुह्वति। भवत्यात्मना। परास्य भ्रातृव्यो भवति" (ब्रा०) इति। ते देवा अस्मिं दिने प्रथमेष्ट्या सैन्यानि सम्पाद्य द्वितीयेष्ट्या विरोधिनोऽसुरान् सर्वतः सन्तप्य पुनः परेद्युरपि जेष्याम इत्यभिप्रेत्य गृहमेधीयं निरुप्य इत्थं विचारितवन्तः। इदं हविरद्य कस्य वा भवति कस्य वा श्वो

भविष्यतीति न ज्ञायते, तस्माद्वयं सह भुक्तवन्त एवाग्निसमीपे वसामेति। एतावति विचारकाले चरुः पक्कोऽभूत्। तदानीं देवा अकृतत्वात् तं चरुं नैवाशितवन्तः, यस्माद्देवाः क्वाप्यकृतं नाश्नन्ति तस्माद्युक्तमेवैतत्। ततस्ते देवाः परस्परं विचारितवन्तः। किमिति कस्मै देवायेमं चरुं होष्याम इति। ततो निश्चित्य गृहमेधिभ्यो कृत्वा विजयं प्राप्ता असुराश्च पराभूताः। अस्मिन् कर्मणि आज्यभागौ यजतीत्यादिना कानिचिदङ्गानि विधास्यन्ते। तत्र यावदुक्ताङ्गोपेतमपूर्वमिदं कर्म न तु दर्शपूर्णमासविकृतिरिति जैमिनिर्विचारितवान्। ततोऽर्थप्राप्तः सामिधेन्याद्यभावः। तमिमं विस्पष्टयितुमनुवदति "यद्वै यज्ञस्य पाकत्रा क्रियते। पशव्यं तत्। पाकत्रा वा एतत्क्रियते। यन्नेध्माबर्हिर्भवति। न सामिधेनीरन्वाह। न प्रयाजा इज्यन्ते। नानुयाजाः। य एवं वेद। पशुमान् भवति" (ब्रा०) इति। यज्ञस्य सम्बन्धि यदनुष्ठानं पाकत्रा पाकेषु पाकयज्ञवदित्यर्थः। तस्य पशव्यत्वं युक्तं। पाकयज्ञं वा अन्वाहिताग्नेः पशव उपतिष्ठन्त इति श्रुतत्वात्। यस्मादत्रेध्माबर्हिरादयो न सन्ति तस्मादेतत्कर्म पाकयज्ञवदेव क्रियते। प्राच्यमङ्गं विधत्ते "आज्यभागौ यजति। यज्ञस्यैव चक्षुषी नान्तरेति" (ब्रा०) इति। यागवेलायामुद्देश्यां देवतां प्रशंसति "मरुतो गृहमेधिनो यजति। भागधेयेनैवैनान्त्समर्धयति" (ब्रा०) इति। उदीच्यमङ्गं विधत्ते "अग्निꣳ स्विष्टकृतं यजति प्रतिष्ठित्यै" (ब्रा०) इति। अङ्गान्तरं विधत्ते "इडान्तो भवति।

पशवो वा इडा। पशुष्वेवोपरिष्टात्प्रतितिष्ठति" (ब्रा०) इति। अर्थमिद्धं चतुर्धाकरणायुदीच्याङ्गान्तराभावं द्योतयितुमन्तः शब्दः। तदेवमनुब्राह्मणगतेनैकेनानुवाकेन पूर्वदिनेऽनुष्ठेया मरुत्यब्राह्मणविहितास्तिस्र इष्टयो व्याख्याताः। अनुवाकान्तरेण द्वितीयदिने कर्तव्यत्वेन विहिता इष्टयो व्याख्यातव्यास्तत्रादौ तावद्गृहमेधीयशेषभूतं किञ्चिदङ्गं विधातुं प्रस्तौति "यत्पत्नी गृहमेधीयस्याश्नीयात्। गृहमेध्येव स्यात्। वि त्वस्य यज्ञ ऋध्येत। यन्नाश्नीयात्। अगृहमेधी स्यात्। नास्य यज्ञो व्यृध्येत" (ब्रा०६का०।६प्र०।७अ०) इति। यदि पत्नी गृहमेधीयस्य चरोर्भागं भुञ्जीत तदा यजमानो गृहेण यज्ञेन चोपेतो भवति। किन्त्वस्मिन् पक्षे यजमानस्य यज्ञो व्यृद्धो भवेत्। अभोजनपक्षे तु व्यृद्धत्वदोषो न भवति किन्तु गृहमेधित्वाभावः। विधत्ते "प्रतिवेशं पचेयुः। तस्याश्नीयात्। गृहमेध्येव भवति। नास्य यज्ञो व्यृध्यते" (ब्रा०) इति। प्रातिस्विकत्वेन पत्नीं विशतीति प्रतिवेशः पत्न्यर्थ ओदनः, तं दक्षिणाग्नौ पक्तारः पचेयुः। तथा चापस्तम्बः 'दक्षिणाग्नौ पत्न्याः प्रतिवेशमोदनं पचति' इति। पत्नी तमोदनमश्नीयात्। ततो नोक्तदोषद्वयमभोजनाभावाद् गृहमेधीयभोजनाभावाच्च। भोजनादीन् विधातुं प्रस्तौति "ते देवा गृहमेधीयेनेष्ट्वा। आशिता अभवन्। आञ्जताभ्यञ्जत। अनु वत्सानवासयन्। तेभ्योऽसुराः क्षुधं प्राहिण्वन्। सा देवेषु लोकमवित्त्वा। असुरान् पुनरगच्छत्"(ब्रा०) इति। आशिता भुक्तवन्तः आञ्जत नेत्रयोरञ्जनं प्रक्षिप्त-

वन्तः, अभ्यञ्जत अभ्यङ्गं कृतवन्तः। धेनूरनु वत्सानवासयन् स्तन-पानार्थमवासृजन्। तदानीमसुरा देवानां समीपे क्षुधं प्रेरितवन्तः, सा च क्षुत्तेषु तृप्तेषु देवेषु स्थानमलब्ध्वा पुनरप्यसुरानेव प्राप्नोत्। विधत्ते "गृहमेधीयेनेष्ट्वा। आशिता भवन्ति। आञ्जतेऽभ्यञ्जते। अनु वत्सान् वासयन्ति। भ्रातृव्यायैव तद्यजमानः क्षुधं प्रहिणोति" (ब्रा०) इति। तदेतदभिप्रेत्य पूर्वमाशिता एवाद्योपवसामेत्यादिर्देवविचार उपाहृतः। अत्र गृहमेधीयसन्निधौ द्वौ मन्त्रावाम्नातौ तयोर्विनियोगमापस्तम्ब आह 'शरनिष्कासस्य दर्वीं पूरयित्वर्षभमाह्वय तस्य रवते पूर्णा दर्वि परापतेत्यनुद्रुत्योत्तरया गार्हपत्ये जुहुयाद् यदृषभो न स्यात् ब्रह्मा ब्रूयाज्जुहुधीति' इति। पच्यमाने चरौ क्षीरमण्डवद्घनीभूतो योऽंश उपरि तिष्ठति सोऽयं शरनिष्कासः। तस्य रवते वृषभस्य शब्दे निष्पन्ने सति। प्रथममन्त्रपाठस्तु "पूर्णा दर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूर्जꣳ शतक्रतो" इति। हे दर्वि त्वं शरनिष्कासेन पूर्णा सती परापत इन्द्रं प्रतिगच्छ, तत्प्रसादाद्धनेन तज्जन्यबलेन सुपूर्णा सती पुनरस्मान् प्रत्यागच्छ। हे शतक्रतो आवां वस्नेव विक्रीणावहै यथा लोके कश्चित्स्वकीयं धनं दत्त्वा तण्डुलादिकं क्रीणाति तद्वदहमिन्द्राय तुभ्यं शरनिष्कासं दत्त्वा त्वत्त इषमूर्जं च क्रीणामि। तदिदमुच्यते वस्नेव वसुनेव धनेनेव क्रीणावहा इति। द्वितीयमन्त्रपाठस्तु "देहि मे ददामि ते नि मे धेहि नि ते दधे। निहारमिन्नि मे हरा निहारं निह-

रामि ते” इति। हे इन्द्र मे यदपेक्षितं तत् त्वं देहि। तव यदपेक्षितं तदहं ददामि। दत्त्वा च त्वं मम समीपे निधेहि अवस्थापय, तव समीपेऽहमवस्थापयामि, तदुभयं सकृदेव न भवति किन्तु निहारमित् पुनः पुनर्निर्हृत्यैव समानीयैव मे समीपे निहर नितरां स्थापय। अहमपि पुनः पुनर्निर्हृत्य ते समीपे स्थापयामि। यथोक्तं निष्कामहोमं प्रशंसति “ते देवा गृहमेधीयेनेष्ट्वा। इन्द्राय निष्कासं न्यदधुः। अस्मानेव स्व इन्द्रो निहितभाग उपावर्तितेति। तानिन्द्रो निहितभाग उपावर्तत” (ब्रा०) इति। उपावर्तिता समागमिष्यति, उपावर्तत समागच्छत्। विधत्ते “गृहमेधीयेनेष्ट्वा। इन्द्राय निष्कासं निदध्यात्। इन्द्र एवैनं निहितभाग उपावर्तते” (ब्रा०) इति। होमाय प्राप्तमाहवनीयं वारयितुं विधत्ते “गार्हपत्ये जुहोति। भागधेयेनैवैनꣳ समर्धयति” (ब्रा०) इति। यागकाले ध्वनिं कर्तुमृषभस्य आह्वानं विधत्ते “ऋषभमाह्वयति। वषट्कार एवास्य सः। अथो इन्द्रियमेव तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते” (ब्रा०) इति। द्वितीयदिनेऽनुष्ठेयानि नव हवींषि विधत्ते “मरुद्भ्यः क्रीडिभ्यः पुरोडाशꣳ सप्तकपालं निर्वपति साकꣳ सूर्येणोद्यताग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुमैन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेककपालं” इति। आद्यस्य हविष उत्तरहविरष्टकस्य च कालभेदात्प्रयोगभेदो द्रष्टव्यः। क्रीडा एषामस्ति इति क्रीडिनस्तदेतत्क्रीडित्वं विशेषणं। तस्य

हविषः प्राठप्राप्तं प्राथम्यञ्च प्रशंसति "इन्द्रो वृत्रꣳ हत्वा। परां परावतमगच्छत्। अपाराधमिति मन्यमानः। सोऽब्रवीत्। क इदं वेदिष्यतीति। तेऽब्रुवन् मरुतो वरं वृणामहै। अथ वयं वेदाम। अस्मभ्यमेव प्रथमꣳ हविर्निरुप्याता इति। त एनमभ्यक्रीडन्। तत्क्रीडिनां क्रीडित्वं। यन्मरुद्भ्यः क्रीडिभ्यः प्रथमꣳ हविर्निरुप्यते विजित्यै" (ब्रा०) इति। परां परावतमत्यन्तदूरं, अपाराधं द्रोहमकार्षं। भीत्या पलायमानः स इन्द्रो मरुतां समीपे किञ्चिदब्रवीत्, वृत्रो मृतो न वेतीदं समीपे गत्वा को वेदिष्यतीति। ते च मरुतो वरे दत्ते वेदिष्याम इत्यब्रुवन्, इतरेभ्योऽग्न्यादिभ्यः प्रथमो निर्वापो वरः, ततस्ते मरुत एनं भूमौ पतितं वृत्रमधिरुह्य बहुविधेन नृत्येनाक्रीडन् क्रीडित्वा च मृतोऽयमिति ज्ञातवन्तः। तस्मादेतेषां क्रीडित्वं विशेषणसम्पन्नं। निर्वापकालं प्रशंसति "साकꣳ सूर्येणोद्यता निर्वपति। एतस्मिन् वै लोक इन्द्रो वृत्रमहन्नस्मृद्ध्यै" (ब्रा०) इति। एतस्मिन्नेव लोके सूर्योदयेनावलोक्यमानभूप्रदेशे। वैश्वदेवपर्वण्युक्तमाग्नेयादिपञ्चकप्रशंसकं वरुणप्रघासपर्वण्युक्तमैन्द्राग्नप्रशंसकञ्च ब्राह्मणमत्रातिदिशति "एतद्ब्राह्मणान्येव पञ्च हवीꣳषि। एतद्ब्राह्मण ऐन्द्राग्नः" (ब्रा०) इति। चरोरैन्द्रत्वं प्रशंसति "अथैष ऐन्द्रश्चरुर्भवति। उद्धारं वा एतमिन्द्र उदहरत। वृत्रꣳ हत्वा। अन्यासु देवतास्वधि। यदेष ऐन्द्रश्चरुर्भवति। उद्धारमेव तं यजमान उद्धरते। अन्यासु प्रजास्वधि" (ब्रा०) इति। अन्यास्वग्न्यादिदेवतासु

अधिकोऽयमित्येतमुद्गारं उत्कर्षाभिमानमुदहरत उत्पादितवान्। विश्वकर्मरूपामन्यहविषो देवतां प्रशंसति "वैश्वकर्मण एककपालो भवति। विश्वान्येव तेन कर्माणि यजमानोऽवरुन्धे" (ब्रा०) इति।

अत्र विनियोगसङ्ग्रहः।

"पूर्णेत्यनूच्य देहीति याज्यामध्वर्युरीरयेत्"।

अथ मीमांसा। पञ्चमाध्यायस्य प्रथमपादे चिन्तितं।

"साकमेधेष्टयस्तिस्रो द्व्यहे स्युः सद्य एव वा।
प्रातरादेर्द्वयोरह्नोः सत्त्वात् प्रकृतिवद् द्व्यहे॥
साङ्गमुख्यानुरोधेन प्रातरादेर्विधानतः।
श्रौतं सद्यस्त्वमन्यत्तु चोदकात्तेन दुर्बलं"॥

चातुर्मास्येषु साकमेधनामके तृतीये पर्वणि श्रूयते 'अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकꣳ सूर्येणोद्यता मरुद्भ्यः सान्तपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुं' इति। ता एतास्तिस्र इष्टयो द्व्यहकालीना यथा प्रकृतौ पर्वण्यन्वाधानादिकं प्रतिपदीष्टिरिति द्व्यहकालीनत्वं तद्वत्। ननु प्रातर्मध्यन्दिनसायंशब्दैरेकस्मिन्नेवाह्नि त्रयः कालाः तिसृणामिष्टीनां विहिताः, तन्न। द्वयोरप्यह्नोः प्रातरादिकालेषु स्वकीयेषु तासामुपक्रमः परेद्युः प्रातरादिषु ताः समापनीयाः। ततो द्व्यहकालीनतेति प्राप्ते ब्रूमः। तत्राग्नयेऽनीकवते प्रातरष्टाकपालं निर्वपतीति साङ्गप्रधानं प्रातःकालीनतया विधीयते। प्रातःशब्दस्य स्वत एक-

मेव प्रातःकालमभिधाय पर्यवस्यति प्रातरग्निहोत्रमित्यादौ तद्दर्शनात्। तस्मात् साङ्गस्य प्रधानस्यैकस्मिन्नेव प्रातःकाले विधानात् सद्यस्कालीनत्वं श्रौतं चोदकेन त्वन्वाधानाद्यङ्गं पूर्वेद्युः प्रातरिति कल्प्यते। उपदेशश्चोदकाद्बलीयान् तस्मादेकाह-कालीना द्रष्टव्याः।

सप्तमाध्यायस्य प्रथमपादे चिन्तितं।

"किं वैश्वदेविकादेककपालादतिदेशनं।
साकमेधेषु वरुणप्रघासस्थादुताग्रिमः॥
प्रकृतावर्थबाहुल्यादन्तिमः सन्निधानतः।
ऐन्द्राग्नसाहचर्याच्च सार्थत्वमधिकत्वतः"॥

वैश्वदेवे द्यावापृथिव्य एककपालः वरुणप्रघासेषु काय एककपालस्तयोः पृथग् ब्राह्मणमाम्नातं। साकमेधेषु वैश्वकर्मण एककपालः तस्मिन् वैश्वदेविकैककपालब्राह्मणमतिदेष्टव्यं। कुतः। प्रकृतित्वेन तस्मिन्नुपदिश्यमानधर्मबाहुल्यात्। वारुण-प्रघासिकस्य तद्विकृतित्वाद् अल्पा एव धर्मविशेषा उपदिष्टाः शमीमय्यो हिरण्मय्यो वा स्रुचो भवन्तीत्यादयः। तत्र बह्वनुग्रहो न्याय्य इति प्राप्ते ब्रूमः। वारुणप्रघासिकब्राह्मणस्य प्रत्यासन्नत्वात् तस्यैवातिदेशो युक्तः। ऐन्द्राग्नब्राह्मणं तत्रत्यमेवातिदिश्यते वैश्वदेवे तदभावात्। तत्साहचर्यादिदमपि तत्र-त्यमेव। ननु प्रकृतिभावाद्वैश्वदेवैककपालादेर्वारुणप्रघासिकवत् साकमेधीयेऽपि चोदकेन धर्मातिदेशसिद्धौ ब्राह्मणातिदेशकं वाक्यमिदं व्यर्थमिति चेत्। न हिरण्मयत्वाद्यधिकधर्मातिदेशाया-

पेक्षितत्वात्। तस्माद्दारुणप्रघासिकैककपालब्राह्मणस्यैवातिदेशः।

दशमाध्यायस्य प्रथमपादे* चिन्तितं।

"गृहमेधीयके त्वाज्यभागावित्यनुवादगीः।
स चोदकविधिर्वार्थवादो वाधिककर्म वा॥
परिसङ्ख्याथ सङ्कोचश्चोदकोऽन्यच वाच वा।
अपूर्वं गृहमेधीयं स्याद्वातो श्रुतचोदकं॥
अनुवादः पुनः श्रुत्या द्वितीयः सार्थतावशात्।
निर्वापवच्चोदकस्य लिङ्गत्वेन सहायता॥
चोदनेनैव तत्सिद्धेरैष्टिकस्य प्रशंसनं।
विध्येकवाक्यता नास्ति तेनाचाङ्गान्तरे विधिः॥
प्रत्यभिज्ञानतोऽङ्गस्य परिसङ्ख्येतरस्य हि।
दोषचयाच्चोदकस्य सङ्कोचोऽङ्गान्तरेष्वतः॥
व्यापारैक्याच्चोदकस्य स्वार्थे संहरणं भवेत्।
वैरूप्याच्च निरर्थत्वादपूर्वं कर्म युज्यते॥
आज्यभागेति नाम्नोपकारक्लृप्तिस्ततेरिदं।
नामत्वादि समं तस्मात् लुप्यते तेन चोदकः॥

'मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदनः' इति वि-हिते गृहमेधीये श्रूयते 'आज्यभागौ यजति' इति। अष्टधात्र संशयः। चोदकप्राप्तयोराज्यभागयोरिह पुनः श्रवणादनुवा-दोऽयमित्याद्यः पक्षः। तथा सति वैयर्थ्यप्रसङ्गात् सार्थकत्वाय चोदकैतद्वाक्ययोर्मिलितयोरत्राज्यभागविधायकत्वमभ्युपेतव्यं।

---

* सप्तमपाद इति पाठान्तरः।

ओषधिद्रव्यनिर्वापादयो यथा प्रकृतिगताः सन्तः विकृतावपि श्रूयमाणाश्चोदकस्य लिङ्गं तथाज्यभागावपि लिङ्गत्वेन सहायभूतौ ततो मिलितयोर्विधायकत्वमिति द्वितीयः पक्षः। गृहमेधीयविधिवाक्येऽंशस्यौदनस्यैवौषधिद्रव्यतया लिङ्गत्वसिद्धेर्नास्ति लिङ्गान्तरापेक्षा, तस्मात् प्रकृतावेिष्टौ श्रुतस्याज्यभागकर्मण इह पुनः श्रवणमर्थवादत्वेन तत्प्रशंसार्थमिति तृतीयः पक्षः। भिन्नप्रकरणे श्रुतस्य विध्येकवाक्यत्वायोगाद् अर्थवादत्वमयुक्तं, ततश्चोदकप्राप्तादाज्यभागादिकर्मणोऽधिकमाज्यभागरूपमङ्गान्तरमिह विधीयते इति चतुर्थः पक्षः। ऐष्टिकयोराज्यभागयोरिह प्रत्यभिज्ञानान्नाङ्गान्तरत्वं युक्तं, तस्मादाज्यभागव्यतिरिक्तस्य प्रयाजाद्यङ्गस्य परिसङ्ख्यानार्थमिदमाज्यभागश्रवणमिति पञ्चमः पक्षः। आज्यभागवाक्येन तद्विधिरूपः स्वार्थस्त्यज्येत प्रयाजादिनिषेधरूपोऽन्योऽर्थः परिगृह्येत चोदकप्राप्तं प्रयाजाद्यनुष्ठानं बाध्येतेति दोषत्रयप्रसङ्गात् न परिसङ्ख्या युक्ता, तेन प्रत्यक्षविधिरूपादस्मादाज्यभागवाक्यादानुमानिकचोदकवाक्यमाज्यभागव्यतिरिक्तप्रयाजाद्यङ्गेषु सङ्कोचनीयमिति षष्ठः पक्षः। यदि चोदकस्य प्रत्यङ्गं पृथग् व्यापाराः स्युस्तदा प्रयाजाद्यङ्गगोचरैर्व्यापारैस्तेषामतिदेशः सिध्यति। आज्यभागगोचरस्थानेन प्रत्यक्षविधिना बाधितत्वात् न चोदकेनाज्यभागातिदेश इत्येवं सङ्कोचो वर्णयितुं शक्यते। इह तु शब्दबुद्धिकर्मणां विरम्य व्यापाराभावेनैक एव चोदकस्य व्यापारः। तथा सति युगपदतिदेशोऽनतिदेशश्चेति विरुद्ध-

धर्मत्वं प्रसज्येत। तस्मात्प्रयाजाद्यङ्गेषु सङ्कोचो न युक्तः, तेन चोदकोऽत्राज्यभागकर्मणि सङ्कोचनीयः, न चोक्तदोषापत्तिः। अस्य सङ्कोचस्योपसंहाररूपत्वात्। आज्यभागयोरेव प्रवृत्तस्य चोदकस्य लब्धातशक्तिज्ञापनमुपसंहारः। तथा सति आज्यभागातिदेशव्याप्तस्य चोदकस्य को नामातिदेशतन्निवृत्तिरूपविरुद्धधर्मप्रसङ्गः, तत्राज्यभागकर्मणि चोदकावस्थापनमिति सप्तमः पक्षः। पुरोडाशं चतुर्धा करोत्याग्नेयं चतुर्धा करोतीत्यनयोरुभयोरपि प्रत्यक्षवचनत्वेन सरूपत्वादस्तु तत्रोपसंहारः। इह तु प्रत्यक्षपरोक्षयोर्वचनचोदकयोर्विरूपत्वान्नासौ युक्तः। किन्तु प्रत्यक्षवचनेनैव आज्यभागविधिसिद्धेः चोदककल्पना निरर्थका, अतस्तस्या उपसंहारो न युक्तः। तस्मादपूर्वो गृहमेधीयो न चोदकेनाज्याङ्गानि गृह्णातीतिकर्तव्यताकाङ्क्षा तु प्रत्यक्षवचनेनैव पूर्यते। एवं सत्युक्तदोषाभावादयमष्टमः पक्षोऽभ्युपगन्तव्यः। ननु साकमेधेष्वामिष्टौ प्रत्यक्षवचनविहितैरामनहोमैः सह चोदकातिदिष्टानामनूयाजानां समुच्चयोऽङ्गीकृतः, तद्वदत्रापि विधीयमानयोराज्यभागयोश्चोदकप्राप्तैः प्रयाजाद्यङ्गैः सर्वैः सह समुच्चयोऽस्तु। न। वैषम्यात्। प्रकृतावाज्यभागयोरुपकारः क्लृप्तः सोऽत्र नामसाम्येन स्मर्यते, तस्मात् क्लृप्तोपकाराभ्यां विधीयमानाभ्यामाज्यभागाभ्यां निराकाङ्क्षो गृहमेधीयः, आमनहोमास्तु न क्लृप्तोपकारा इति तैः साकमेधेष्वङ्गाकाङ्क्षा न पूर्यते। तत्र क्लृप्तोपकारैरनूयाजाद्यङ्गैश्चोदकेन सहातिदिष्टैः पूर्यते। ततो विधिवैयर्थ्यपरिहाराया-

मनहोमेषु उपकारे क्लृप्ते सति तस्मिन् प्रवर्तमानैः प्रयोगवचनैः* समुच्चित्यानुष्ठापयति ततो वैषम्यात् क्लृप्तोपकाराज्यभागविधायकेनानेन प्रत्यक्षवचनेन गृहमेधीयचोदको लुप्यते। तस्माद्विकृतिरूपं साङ्गमपूर्वं कर्मात्र विधीयत इति सिद्धान्तः।

तत्रैवान्यच्चिन्तितं।

"तत्रान्यदङ्गं नो कार्यं कार्यं वान्यानपेक्षणात्।
न कार्यं विहितत्वेन कार्यं स्विष्टकृदादिकं"॥

तत्र गृहमेधीये आज्यभागाभ्यामेव निराकाङ्क्षत्वाद् अन्यत् स्विष्टकृदादिकं न कार्यमिति चेत्। मैवं, आज्यभागवद्विहितत्वाद्, यदग्नये स्विष्टकृते समवद्यति इडामुपह्वयत इति विहितं। तस्माद् यावदुक्तं कर्तव्यं।

तत्रैवान्यच्चिन्तितं।

"तत्रैव परिसङ्ख्यात्वे प्राशित्राद्यस्ति वा न तत्।
अस्तीडादर्शनान्मैवं तदुक्त्याऽस्त्वत्र नेतरत्"॥

गृहमेधीये स्विष्टकृत्याज्यभागवदगृधा संशयं हृदि निधाय परिसङ्ख्यार्थं प्रश्नमपक्षमभ्युपेत्येयं कृत्वा चिन्तावतारिता। तत्र प्राशित्रादिभक्षणं न परिसङ्ख्यातं किन्तु तदस्ति। कुतः। भक्षणाद्यर्थस्येडोपाह्वानस्य तत्र दर्शनादिति प्राप्ते ब्रूमः। अत्र गृहमेधीये तदिडाभक्षणं वचनबलेनास्तु, स्विष्टकृद्वाक्यप्रापिता परिसङ्ख्या, तस्य वचनेन निवारितत्वात्, इतरत् प्राशित्रादिभक्षणं परिसङ्ख्यातत्वान्नास्ति।

* प्रवर्तमानः प्रयोगवचन इत्यसङ्गतः पाठः।

सप्तमाध्यायस्य तृतीयपादे चिन्तितं।

"सौमिकं प्राकृतं वा स्यात् तयोः प्रणयनं श्रुतं।
आद्योऽप्राप्तत्वतो नैवमनामत्वेन वाग्निमः"॥

चातुर्मास्येषु श्रूयते 'द्वयोः प्रणयति तस्माद्द्वाभ्यां यन्ति' इति। अत्र सौमिकधर्मकमग्निप्रणयनं यत् तदेव ग्रहीतव्यं। कुतः। सोमस्य चातुर्मास्यप्रकृतित्वाभावेन तदीयप्रणयनस्यात्र चोदकादप्राप्तस्य विध्यर्हत्वात्। दर्शपूर्णमासगतं त्वग्निप्रणयनं चोदकप्रापितत्वादविधेयं, तस्मात् सौमिकस्य धर्मा अत्र प्रणयनशब्देनातिदिश्यन्त इति प्राप्ते ब्रूमः। नायं प्रणयनशब्दः सौमिकस्य प्रणयनकर्मणो नामधेयं, किन्तु निर्मन्थ्यबर्हिरादिशब्दवल्लौकिक एव, ततो न धर्मातिदेशः। यदि प्राकृतप्रणयनस्य प्राप्तत्वाद्विधिवैयर्थ्यं तर्ह्यर्थवादसम्बन्धार्थं तद्वाक्यमस्तु।

तत्रैवान्यच्चिन्तितं।

"आद्यन्तयोर्मध्ययोर्वा पर्वणोस्तत्प्रसङ्गकात्।
आद्यन्तयोरुरुगत्या मध्ययोः पर्वणोर्भवेत्"॥

तस्माद्द्वाभ्यां यन्तीत्यर्थवादेन सम्बन्धाय पुनर्विधिना यत्प्राकृतमग्निप्रणयनं चोदकप्राप्तमपि श्रूयत इत्युक्तं तद्वैश्वदेवशुनासीर्ययोः पर्वणोर्भवितुमर्हति। कुतः। प्रसङ्गकात्। तथा हि 'न वैश्वदेव उत्तरवेदिमुपवपति न शुनासीर्ये' इत्युत्तरवेदिप्रतिषेधस्तयोः पर्वणोर्वेदिं प्रसञ्जयति अप्रसक्तप्रतिषेधायोगात्। उत्तरवेदिस्त्वग्निप्रणयनार्था तस्मादुत्तरवेदिप्रसक्तिद्वारेणाद्यन्तयोरिदमग्निप्रणयनमिति प्राप्ते ब्रूमः। ऊरू वा एतौ यज्ञस्य

यद् वरुणप्रघासाः साकमेधश्चेति गमनसाधनत्वमूहत्वं मध्य-मयोः पर्वणोरुपन्यस्तं। तत्सन्निधौ द्वयोः प्रणयन्तीति चोदक-प्राप्तमग्निप्रणयनमर्थवादार्थं पुनर्विधाय द्वाभ्यां यन्तीत्यर्थवा-देनोहत्वकल्पना युक्ता द्वाभ्यां पर्वभ्यां गमनमुपन्यस्यते। तस्मा-न्मध्यमयोस्तत्प्रणयनं। न चात्रोत्तरवेदेरभावात्प्रणयनाभाव इति शङ्कनीयं। उपवपतीत्यनारभ्यश्रुतेन वाक्येनोत्तरवेद्युप-वापस्य विहितत्वात्। सा चोत्तरवेदिराद्यन्तयोः पर्वणोर्निषे-धान्मध्यमयोरवतिष्ठते। तस्माच्चोत्तरवेद्यां प्रणीतोऽग्निर्विधी-यते। एतदर्थमेव हि सार्थवादं पुनर्विधानं। उक्तमधिकरण-द्वयमेकीकृत्य वार्तिककारेण यो निर्णयोऽभिहितस्तं दर्शयति।

"अनामत्वाच्च वैयर्थ्यात् सौमिकं प्राकृतञ्च न।
अपूर्वं तत्प्रणयनं शाखान्तरसमीक्षितं" ॥

आहवनीयादग्निं प्रणयत इति शाखान्तरे मध्यमयोर्नूतनं प्रणयनं विहितं, तेन समानवचनत्वादत्राप्यपूर्वं प्रणयनं विधत्ते ॥ ० ॥

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथम-काण्डेऽष्टमप्रपाठके चतुर्थोऽनुवाकः ॥ * ॥

सोमा॑य पि॒तृम॑ते पुरो॒डाश॒ꣳ षट्क॑पालं॒ निर्व॑पति पि॒तृभ्यो॑ बर्हि॒षद्भ्यो॑ धा॒नाः पि॒तृभ्यो॑ऽग्निष्वा॒त्तेभ्यो॑ऽभि-

बान्यायै दृग्धे मन्थमेतत्ते तत ये च त्वामन्वेतत्ते पितामह प्रपितामह ये च त्वामन्वत्र पितरो यथाभागं मन्दध्वꣳ सुसन्दृशं त्वा वयं मघवन्मन्दिषीमहि । प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशाꣳ अनु । योजा न्विन्द्र ते हरी ॥ १ ॥

अक्षन्नमीमदन्त ह्यव प्रिया अधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती । योजा न्विन्द्र ते हरी । अक्षन् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरोऽमीमृजन्त पितरः । परेत पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः । अथा पितॄन्त्सुविदत्राꣳ अपीत यमेन ये सधमादं मदन्ति । मनो न्वाहुवामहे नाराशꣳसेन स्तोमेन पितॄणाञ्च मन्मभिः । आ ॥ २ ॥

न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे । पुनर्नः पितरो मनो ददातु दैव्यो जनः । जीवं व्रातꣳ सचेमहि । यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिꣳसिम । अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मामनेनसं॰॥ ३ ॥

हरी मन्मभिरा चतुश्चत्वारिꣳशच्च ॥ ५ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डे ऽष्टमप्रपाठके पञ्चमोऽनुवाकः ॥ * ॥

चतुर्थे साकमेधाख्ये तृतीये पर्वणि प्रधानहवींष्युक्तानि। पञ्चमे तदीयशेषो महापितृयज्ञ उच्यते। आदौ तावत्त्रीणि हवींषि विधत्ते "सोमाय पितृमते पुरोडाशꣳ षट्कपालं निर्वपति पितृभ्यो बर्हिषद्भ्यो धानाः पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थं" इति। पितरोऽस्य सन्तीति पितृमान् पितृस्वामीत्यर्थः। बर्हिषि यज्ञे सीदन्तीति बर्हिषदः, धानाः भृष्टयवाः, अग्निष्वात्ता अयज्ञनिष्ठाः, अभिवान्या मृतवत्सा धेनुः, क्षीरे यवपिष्टं प्रक्षिप्य मिश्रीकृतं द्रव्यं मन्थः। तदिदं हविस्त्रयं पितृयज्ञस्तस्य च पितृयज्ञस्य विधिमर्थवादेनोन्नयति "वैश्वदेवेन वै प्रजापतिः प्रजा असृजत। ता वरुणप्रघासैर्वरुणपाशादमुञ्चत्। साकमेधैः प्रत्यस्थापयत्। त्र्यम्बकैरुद्रं निरवादयत। पितृयज्ञेन सुवर्गं लोकमगमयत्। यद्वैश्वदेवेन यजते। प्रजा एव तद्यजमानः सृजते। ता वरुणप्रघासैर्वरुणपाशान्मुञ्चति। साकमेधैः प्रतिष्ठापयति। त्र्यम्बकैरुद्रं निरवदयते। पितृयज्ञेन सुवर्गं लोकं गमयति" (ब्रा०१का०६प्र०८अ०) इति। प्रतिपुरुषमेककपालान्निर्वपतीति विधास्यमाना यागास्त्र्यैयम्बकाः, तैः क्रूरं रुद्रं परितोष्य निःसारितवान्। तत्र स्वर्गादिलोकहेतुत्वेनात्यन्तप्रशस्तत्वात् पितृयज्ञः कर्तव्य इत्यभिप्रायः। अत्र हेयं पक्षं पूर्वपक्षतया विधत्ते "दक्षिणतः प्रा-

चीनावीती निर्वपति। दक्षिणावृद्धि पितृणां'' (ब्रा०) इति। गार्हपत्यस्य दक्षिणदेशे स्थित्वा प्राचीनावीती सन्नुक्तानां हविषां निर्वापं कुर्यात्, यस्मात् पितृणां सम्बन्धि कर्म दक्षिणावृत् प्रायेण दक्षिणस्यां दिशि वर्तते। तं पक्षं दूषयित्वा सिद्धान्तं विधत्ते "अनादृत्य तत्। उत्तरत एवोपवीय निर्वपेत्। उभये हि देवाश्च पितरश्चेज्यन्ते'' (ब्रा०) इति। यत्रैकोद्दिष्टश्राद्धादौ पितर एव पूज्यन्ते, तत्र दक्षिणावृत्त्वमस्तु। इह त्वाज्यभागादिदेवा अग्निष्वात्तादिपितरश्चेज्यन्ते। अतो देवानां प्रियायोत्तरतोऽवस्थानमुपवीतञ्च। तर्हि पितृणां प्रीतिर्न स्यादित्याशङ्क्य विध्यन्तरेण दक्षिणावृत्त्वं सम्पादयति "अथो यदेव दक्षिणार्धेऽधिश्रयति। तेन दक्षिणावृत्'' (ब्रा०) इति। हविःपाकाय गार्हपत्यस्य दक्षिणभागेऽधिश्रयेत्। तेनैतत्कर्म पितृप्रीत्यै दक्षिणावृदपि भविष्यति। एतदेव कालरूपेण प्रशंसति "सोमाय पितृमते पुरोडाशꣳ षट्कपालं निर्वपति। संवत्सरो वै सोमः पितृमान्। संवत्सरमेव प्रीणाति। पितृभ्यो बर्हिषद्भ्यो धानाः। मासा वै पितरो बर्हिषदः। मासानेव प्रीणाति। यस्मिन् वा ऋतौ पुरुषः प्रमीयते। सोऽस्यामुष्मिँल्लोके भवति'' (ब्रा०) इति। वसन्ते ज्योतिषा यजेतेति विधानात् सोमस्य संवत्सरत्वं। स एव पितृणां पतिरित्यस्य पितृमत्त्वं। मासि पितृभ्यः क्रियत इति अमावास्याश्राद्धाभिधानात् पितृणां मासत्वञ्चोपचर्यते। यदि वसन्ते प्रमीयते वसन्तो भवति यदि ग्रीष्मे ग्रीष्म इत्यभिधानात् तत्तदृतुदेवताप्रीति-

रेवास्यामुष्मिन् ऋतुसम्बन्धः। भर्जनेन क्वचिदीषत्कृष्णत्वं क्वचित्कृष्णत्वं क्वचिदकृष्णत्वमित्येवंविधं त्रैविध्यं विधत्ते "बहुरूपा धाना भवन्ति। अहोरात्राणामभिजित्यै" (ब्रा०) इति। अहान्यकृष्णानि अमावास्यारात्रिः कृष्णा अन्यास्तु रात्रय ईषत्कृष्णाः। तृतीययागदेवतां प्रशंसति "पितृभ्योऽग्निष्वात्तेभ्यो मन्थं। अर्धमासा वै पितरोऽग्निष्वात्ताः। अर्धमासानेव प्रीणाति" (ब्रा०) इति। बर्हिषदामनुष्ठितयागत्वान्मासत्वं। अग्निष्वात्तानां यागाभावात् अर्धमासत्वं। एतच्च ये वै यज्वानः ते पितरो बर्हिषद इत्यादिना वक्ष्यते। मृतवत्सां प्रशंसति "अभिवान्यायै दुग्धे भवति। सा हि पितृदेवत्यं दुहे" (ब्रा०) इति। पितृदेवत्यं पितृदेवताभ्यो हितं। मृताः पुरुषाः पितरो भवन्ति, अभिवान्या च मृतवत्सेति सजातीयत्वात्तत्र तेषां प्रीतिः। यदुक्तमापस्तम्बेन 'उद्वासनकाले धाना उद्वास्य विभागमन्त्रेण विभज्यार्धा आज्येन संयौति अर्धाः पिष्टानामावृता सक्तून् कृत्वा अभिवान्यायै दुग्धस्यार्धशरावे सक्तूनोप्यैकयेषुशलाकयेषुकाण्डेन वा दक्षिणामुखस्त्रिःप्रसव्यमनारभ्योपमन्थति' इति। तत्रार्धशरावे मन्थनं विधत्ते "यत्पूर्णं। तन्मनुष्याणां। उपर्यर्धो देवानां। अर्धः पितॄणां। अर्ध उपमन्थति। अर्धो हि पितॄणां" (ब्रा०) इति। भुञ्जाना मनुष्याः पात्रपूर्णमेव घृतमिच्छन्ति, प्रयाजदेवता जुहूगतेनोपरितनाज्यभागेन तृप्यन्ति, अधोभागेन हविरभिघारणात्। अग्निहोत्रे चोपरिभागं देवेभ्यो हुत्वा अर्धभागं स्वधा पितृभ्यः पितॄन्

जिन्वेति भूमौ निम्नन्तीति तद्विधानात्तदेतत्सर्वमभिप्रेत्य यत् पूर्णमित्याद्युक्तं। इत्तुशलाकां विधत्ते "एकयोपमन्थति। एका हि पितॄणां" (ब्रा०) इति। यदेकमेकꣳ सम्भरेत् पितृदेवत्यानि स्युरित्यादौ पितॄणामेकत्वसङ्ख्याप्रीतिः प्रसिद्धा। दक्षिणामुखत्वं विधत्ते "दक्षिणोपमन्थति। दक्षिणावृद्धि पितॄणां" (ब्रा०) इति। प्राची देवा दक्षिणा पितर इत्यादौ दक्षिणादिक्प्रीतिः प्रसिद्धा। हस्ताभ्यां मन्थनं विधत्ते "अनारभ्योपमन्थति। तद्धि पितॄन् गच्छति" (ब्रा०) इति। तृतीयसवनगताग्निरादौ मन्थनं स्तम्भे निबध्य मन्थति तत्तु देवानां प्रियं, अत्र त्वनारभ्य मन्थनमकृत्वा हस्ताभ्यामेवोपमन्थति तच्च देववैलक्षण्यात् पितॄणां प्रियं। यदुक्तमापस्तम्बेन 'न प्राचीं वेदिमुद्धन्ति पितृयज्ञो हि न दक्षिणां देवयज्ञो ह्युभे दिशावन्तरोद्धत्य' इति। तामाग्नेयीं दिशमङ्गुल्या निर्दिशन् विधत्ते "इमां दिशं वेदिमुद्धन्ति। उभये हि देवाश्च पितरश्चेज्यन्ते" (ब्रा०) इति। तस्या वेदेश्चतुर्विधं दैविकवैलक्षण्यं क्रमेण विधत्ते "चतुस्स्रक्तिर्भवति। सर्वा ह्यनुदिशः पितरः। अखाता भवति। खाता हि देवानां। मध्यतोऽग्निराधीयते। अन्ततो हि देवानामाधीयते। वर्षीयानिध्म इध्माद्भवति व्यावृत्त्यै" (ब्रा०) इति। दैविकी वेदिर्दीर्घा न तु समचतुरस्रा, इयं तु समचतुरस्रेति व्यावृत्तिः। अग्निषु प्रकारविशेषं सूत्रकारो दर्शयति 'प्रतिदिशं स्रक्त्योऽवान्तरदेशान् प्रति मध्यानि' इति। परितः कटादिभिराच्छादनं विधत्ते "परिश्रयति। अन्तर्हितो हि पितृ-

लोको मनुष्यलोकात्" (ब्रा०) इति। उन्मूलनं विधत्ते "यत् परुषि दिनं। तद्देवानां। यदन्तरा। तन्मनुष्याणां। यत्स-मूलं। तत्पितृणां। समूलं बर्हिर्भवति व्यावृत्त्यै" (ब्रा०) इति। परुषि पर्वसन्धौ दिनं छिन्नं तादृशं बर्हिरहिंसितत्वाद्देवानां प्रियं। अत एव बर्हिर्लवनब्राह्मणे श्रूयते 'प्रजापतिर्वा ओषधीः पर्वशो वेद स एना न हिनस्ति' इति। 'ओषधीनामहिं-सायै' इति च। यदन्तरा पर्वमध्ये छिन्नं तन्मनुष्याणां प्रियं सन्धिविशेषस्य तैरज्ञातत्वात्। परिशेषेण समूलत्वं पितृणां प्रियं। बर्हिषो दक्षिणायत्वं विधत्ते "दक्षिणा स्तृणाति। दक्षिणावृद्धि पितृणां" (ब्रा०) इति। यदुक्तमापस्तम्बेन 'आस्त-रणकाले बर्हिषा त्रिः प्रसव्यं वेदिं स्तृणन् पर्येत्योद्धवान्धारय-माणस्त्रिरस्तृणन् प्रतिपर्येत्योद्धवः प्रस्तरः' इति। प्रसव्यमप्रदक्षि-णत्वं यथा भवति तथा। तदिदमप्रदक्षिणत्वप्रदक्षिणत्वाभ्यां षट्कृत्व आवर्तनं विधत्ते "त्रिः पर्येति। तृतीये वा इतो लोके पितरः। तानेव प्रीणाति। त्रिः पुनः पर्येति। षट् सम्पद्यन्ते। षड्वा ऋतवः। ऋतूनेव प्रीणाति" (ब्रा०) इति। इतो भू-लोकादारभ्य तृतीयः पितृलोकः भोगभूमेः स्वर्गस्यान्तरिक्षा-दूर्द्धभावित्वात्। प्रस्तरस्यामन्त्रकमासादनं विधत्ते "यत्प्रस्तरं यजुषा गृह्णीयात्। प्रमायुको यजमानः स्यात्। यन्न गृह्णी-यात्। अनायतनः स्यात्। तूष्णीमेव न्यस्येत्। न प्रमायुको भवति। नानायतनः" (ब्रा०) इति। गृह्णीयात् सादयेदिति। दक्षिणपरिधिवर्जनमभिप्रेत्य विधत्ते "यत्त्रीन् परिधीन् परि-

दध्यात्। मृत्युना यजमानं परिगृह्णीयात्। यन्न परिदध्यात्। रक्षाꣳसि यज्ञꣳ हन्युः। द्वौ परिधी परिदधाति। रक्षसा-मपहत्यै। अथो मृत्योरेव यजमानमुत्सृजति" (ब्रा०) इति। मध्यमोत्तराविति सूत्रेऽभिहितं। हविषामनुक्रमेण सादनं विधत्ते "यत्त्रीणि त्रीणि हवीꣳष्युदाहरेयुः। त्रयस्त्रय एषाꣳ साकं प्रमीयेरन्। एकैकमनूचीनान्युदाहरन्ति। एकैक एषा-मन्वञ्चः प्रमीयते" (ब्रा०) इति। उदाहरेयुरासादयेयुः, एषां यजमानबन्धूनां मध्ये, अन्वञ्चः वृद्धबालानुक्रमगताः, एतेषां मध्ये एकैक एव प्रमीयते न तु युगपत्। दक्षिणतः कशिपूपबर्हणमाञ्जनमभ्यञ्जनमुदकुम्भमित्येकैकश आसादयेति सूत्रे यदुक्तं तद्विधत्ते "कशिपु कशिपव्याय। उपबर्हणमुपबर्ह-णाय। आञ्जनमाञ्जन्याय। अभ्यञ्जनमभ्यञ्जन्याय। यथाभाग-मेवैनान् प्रीणाति" (ब्रा०) इति। कशिपु तूलपूरितशय्यादि, उपबर्हणं शिरस आधारः, कशिपुप्रभृतीन्युदाहरन्तीत्यनुवर्तते। कशिपुप्रियः कशिपव्यः पिता, तत्परितोषार्थं कशिपु सादयेत् एवमन्यत्। तथा सत्येनान् पितॄन् स्वस्वभागमनतिक्रम्य तो-षयति। तदेवमनुब्राह्मणगतेनानुवाकेन पितृयज्ञे हविरासा-दनपर्यन्तः पूर्वप्रयोगोऽभिहितः। अनुवाकान्तरेण सामिधे-न्यादिक उत्तरप्रयोगोऽभिधीयते। तत्राध्वर्योः प्रैषमन्त्रमुत्पाद्य मन्त्रं व्याचष्टे "अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानुब्रूही-त्याह। उभये हि देवाश्च पितरश्चेज्यन्ते" (ब्रा०१का०। ६प्र०।९अ०) इति। देवानां पितॄणां चोपकारी योऽग्निः

तस्मै। उशन्तस्त्वेत्येतामृचं सामिधेनीत्वेन विधत्ते "एकामन्वाह। एका हि पितृणां" (ब्रा०) इति। तस्यामावृत्तिं विधत्ते "त्रिरन्वाह। त्रिर्हि देवानां" (ब्रा०) इति। चोदकप्राप्तावाघारौ प्रशंसति "आघारावाघारयति। यज्ञपरुषोरनन्तरित्यै" (ब्रा०) इति। यज्ञपरुषोर्यज्ञांशयोरलोपाय। वरणं पर्युदस्यति "नार्षेयं वृणीते। न होतारं। यदार्षेयं वृणीत। यद्धोतारं। प्रमायुको यजमानः स्यात्। प्रमायुको होता। तस्मान्न वृणीते। यजमानस्य होतुर्गोपीथाय" (ब्रा०) इति। अग्निर्देवो होता देवान् यक्षदित्यादिनिगदपाठ आर्षेयवरणं। निगदावसाने विष्णुशर्मा मानुष इत्यादिनामोच्चारणं होतृवरणं। बर्हिर्नामकं चतुर्थं प्रयाजं निषेधति "अपबर्हिषः प्रयाजान् यजति। प्रजा वै बर्हिः। प्रजा एव मृत्योरुत्सृजति" (ब्रा०) इति। चोदकप्राप्तावाज्यभागौ प्रशंसति "आज्यभागौ यजति। यज्ञस्यैव चक्षुषी नान्तरेति"(ब्रा०) इति। हविःप्रचारकाले प्राचीनावीतं विधत्ते "प्राचीनावीती सोमं यजति। पितृदेवत्या हि। एषाहुतिः" (ब्रा०) इति। चतुरवदानमपवदितुं विधत्ते "पञ्चकृत्वोऽवद्यति। पञ्च ह्येता देवताः। द्वे पुरोऽनुवाक्ये। याज्या देवता वषट्कारः। ता एव प्रीणाति" (ब्रा०) इति। त्वꣳ सोम प्रचिकितः, त्वया हि नः पितर इत्युभे पुरोऽनुवाक्ये, त्वꣳ सोम पितृभिः संविदान इत्येका याज्या, पितृमान् सोमो देवता, वषट्कारः, ता एताः पञ्च देवता उच्यन्ते। एकैकदेवतार्थं त्रिषु हविःष्वविच्छिन्नाव-

नं विधत्ते "सन्ततमवद्यति। ऋतूनाꣳ सन्तत्यै" (ब्रा०) इति।
ापस्तम्बः 'जुह्वामुपस्तीर्य सोमाय पितृमतेऽनु स्वधेति
द्यति सकृत्पुरोडाशस्यावद्यति सकृद्धानानां सकृन्मन्थस्य'
।। द्वयोः पुरोऽनुवाक्ययोरेकस्या याज्यायाश्च विधिं मनसि
ाय प्रशंसति "प्रैवैभ्यः पूर्वया पुरोऽनुवाक्ययाह। प्रण-
। द्वितीयया। गमयति याज्यया। तृतीये वा इतो
के पितरः। अह्न एवैनान् पूर्वया पुरोऽनुवाक्ययात्या-
ति। रात्रियै द्वितीयया। एवैनान् याज्यया गमयति"
०) इति। त्वꣳ सोम प्रचिकित इत्यनया पूर्वया पितृभ्यो
ः प्रकर्षेण कथितवान् भवति। त्वया हि नः पितर
ानया द्वितीयया पितॄन् प्रति हविर्नयति। त्वꣳ सोम
ःभिरित्यनया तद्धविः पितॄन् गमयति याज्यया। पितॄणां
ीयलोकवर्तित्वादत्र मन्त्रत्रित्वं युक्तं। किञ्च त्रिभिर्मन्त्रैः
णाह्नो रात्र्याश्च पितॄनानीय हविः प्रति तानागमयत्येव।
हुत्तरत उपविश्यावदाय दक्षिणामुखो वेदिमतिक्रम्योद-
ङ्मुखस्तिष्ठन् जुहोति। अत्र तु तद्विपरीत्यं सूत्रकार आह 'दक्षि-
ाऽवदायाभिघार्योदङ्ङतिक्रम्य दक्षिणामुखस्तिष्ठन्' इति।
तद्विधत्ते "दक्षिणतोऽवदाय। उदङ्ङतिक्रामति व्यावृत्त्यै"
०) इति। आश्रावयास्तु श्रौषड्वौषडिति मन्त्रत्रयमपवदितुं
ण विधत्ते "आ स्वधेत्याश्रावयति। अस्तु स्वधेति प्रत्या-
ययति। स्वधा नम इति वषट्करोति। स्वधाकारो हि
तॄणां" (ब्रा०) इति। पितॄन् प्रति यद्वक्तव्यं तस्य सर्वस्य

स्वधाकारो वाचकः, अत आश्रावयेत्यादिशब्दान् न ब्रूते यस्मात् स्वधाकारः पितॄणां प्रियः। विधिवाक्ये पाठादेव प्राप्तं प्रचारक्रमं प्रशंसति “सोममग्रे यजति। सोमप्रयाजा हि पितरः। सोमं पितृमन्तं यजति। संवत्सरो वै सोमः पितृमान्। संवत्सरमेव तद्यजति। पितॄन् बर्हिषदो यजति। ये वै यज्वानः। ते पितरो बर्हिषदः। तानेव तद्यजति। पितॄनग्निष्वात्तान् यजति। ये वा अयज्वानो गृहमेधिनः। ते पितरोऽग्निष्वात्ताः। तानेव तद्यजति” (ब्रा०) इति। सोमः प्रथमं यष्टव्यो येषां पितॄणां ते सोमप्रयाजाः, पितृस्वामित्वेन तस्य प्राथम्यं युक्तं, संवत्सरत्वं तु सोमस्य पूर्वमेवोक्तं। इह लोके यज्ञं कृत्वा पितृलोकं प्राप्ताः बर्हिषदः, इह यज्ञरहिताः गृहमेधिनो ये गृहस्थाः ते पितृलोकं प्राप्य अग्निष्वात्ता उच्यन्ते। स्विष्टकृत्स्थानीयां देवतामपवदितुं विधत्ते “अग्निं कव्यवाहनं यजति। य एव पितृणामग्निः। तमेव तद्यजति। अथो यथाग्निꣳ स्विष्टकृतं यजति। तादृगेव तत्” (ब्रा०) इति। पित्र्यं हविः कव्यं तद्वहतीति कव्यवाहनः। अत एवान्यत्र श्रूयते ‘त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणाꣳ सहरक्षा असुराणां’ इति। मुख्यब्राह्मणे पैतृकानि त्रीणि हवींषि विधाय एतत्ते ततेत्यादि एकादश मन्त्रा आम्नाताः। तत्र विनियोगमापस्तम्बः ‘हविःशेषान् समवदाय पिण्डान् कृत्वा तिसृषु स्रक्तीषु निदधाति पूर्वस्यां दक्षिणस्यामपरस्यामित्येतत्ते ततासौ ये च त्वामन्वित्येतैः प्रति मन्त्रं’ इति।

सम्प्रोक्ताय सम्यक् मर्दनेनैकीकृत्य। पाठस्तु "एतत्ते तत ये च त्वामन्वेतत्ते पितामह प्रपितामह ये च त्वामनु" इति। तत हे पितः तुभ्यं एतत्पिण्डीकृतमन्नं दत्तं ये चान्ये त्वामनुवर्तन्ते तेभ्योऽप्येतद्दत्तं। मध्यममन्त्रे ये च त्वामन्वित्यनुषङ्गः। प्रपितामहमन्त्रे एतत्त इत्यनुषङ्गः। विधत्ते "एतत्ते तत ये च त्वामन्विति तिसृषु स्रक्तीषु निदधाति। तस्मादातृतीयात् पुरुषान्नाम न गृह्णन्ति। एतावन्तो हीज्यन्ते" (ब्रा०) इति। यस्मान्मन्त्रेषु तत पितामह प्रपितामहेत्येवं साधारणशब्दनिर्देशः कृतः तस्माल्लोकेऽप्यातृतीयात् पुरुषात् प्रपितामहपर्यन्तं सम्बन्धविशेषेणैव व्यवहरन्ति, न तु तदीयं देवदत्तविष्णुशर्मादि नामोच्चारयन्ति। यस्मात् पार्वणश्राद्धेषु पित्रादयस्त्रय एव पूज्यन्ते न तूपरितनाः, तस्मादत्रापि त्रयाणां निर्देशो युक्तः। कल्पः "अत्र पितरो यथाभागं मन्दध्वं" इत्युक्त्वोदञ्चो निष्क्रम्य "सुसन्दृशं त्वा वयं" इत्यैन्द्रियर्चाहवनीयमुपतिष्ठन्त इति। हे पितरः, अत्र स्रक्तिगतपिण्डेषु स्वस्वभागमनतिक्रम्य हृष्टा भवत। मन्दध्वमिति पदस्याभिप्रायं व्याचष्टे "अत्र पितरो यथाभागं मन्दध्वमित्याह। ह्रीका हि पितरः" (ब्रा०) इति। यस्मात् पितरो लज्जाशीलास्तस्मात् स्वस्वभागादूर्द्ध्वं लज्जां वारयितुं विस्रम्भेण मन्दध्वमित्युच्यते। विधत्ते "उदञ्चो निष्क्रामन्ति। एषा वै मनुष्याणां दिक्। स्वामेव तद्दिशमनुनिष्क्रामन्ति" (ब्रा०) इति। पितृत्वदशायां दक्षिणा दिक् प्राप्ता। ततः पूर्वं मनुष्यतादशायामु-

त्तरा दिगेव परिशिष्यते। आहवनीयोपस्थानमन्त्रपाठस्तु "सुसन्दृशं त्वा वयं मघवन्मन्दिषीमहि। प्र नूनं पूर्णवन्धुरः स्तुतो यासि वशाꣳ अनु। योजा न्विन्द्र ते हरी" इति। हे मघवन् सुसन्दृशं सुष्ठु कटाक्षवीक्षणेनास्मान् पश्यन्तं त्वां मन्दिषीमहि वयं तर्पयामः। त्वमप्यस्मद्दत्तैर्हविर्भिः पूर्णवन्धुरः परिपूरितरथपृष्ठोऽस्माभिः स्तुतः सन् वशानभीष्टान् देशान् अनुलक्ष्य नूनं प्रयासि प्रायेणागमिष्यसि। हे इन्द्र ते हरी तवाश्वौ योजा नु रथे नियुङ्क्ष्व हि। विधत्ते "आहवनीयमुपतिष्ठन्ते। न्येवास्मै तद्ध्नुवते। यत्सत्याहवनीये। अथान्यत्र चरन्ति" इति। आहवनीये पुरोऽवस्थिते सति तमुपेक्ष्याथ तदाऽन्यत्र पैतृकवेदिमध्यस्थेऽग्नौ चरन्तीति यत् तेनास्मै निह्नुवते एनमाहवनीयमपलपन्त्येव तत्क्षमापणायोपस्थानमित्यर्थः। उपस्थानस्यावधिं विधत्ते "आतमितोरुपतिष्ठन्ते। अग्निमेवोपद्रष्टारं कृत्वा। पितॄन्निरवदयन्ते" (ब्रा०) इति। आतमितोराग्लानेः, अनुच्छ्वासेन मन्त्रमुच्चारयता यावता कालेन या निरोधरूपा ग्लानिर्भवति तावदुपस्थातव्यं। तेनोपस्थानेनाग्निमेव साक्षिणं कृत्वा पितॄन् स्वभागप्रदानेन विसृष्टवन्तो भवन्ति। मन्त्रगतस्य सुसन्दृशमित्येतस्याभिप्रायं व्याचष्टे "अन्तं वा एते प्राणानां गच्छन्ति। य आतमितोरुपतिष्ठन्ते। सुसन्दृशं त्वा वयमित्याह। प्राणो वै सुसन्दृक्। प्राणमेवात्मन्दधते" (ब्रा०) इति। श्वासनिरोधेन ग्लानिं प्राप्तेषु कटाक्षनिरीक्षणं नाम प्राणनिरोधपरिहारः, तदेतदभिप्रेत्य प्राणो वै सुसन्दृगित्यु-

च्यते। योऽयं परिहृतनिरोधः प्राणः स एवेन्द्रस्य कटाक्षः, तं कुर्वन्तं त्वामिति मन्त्रे योजनीयं। योजेति पदस्याभिप्राय-माह "योजा न्विन्द्र ते हरी इत्याह। प्राणमेव पुनरयुक्त" (ब्रा०) इति। यथा त्वदीयावश्वौ रथे युक्तौ एवं प्राणम-स्मासु योजयेत्यभिप्रायः। कल्पः। अथ गार्हपत्यमुपतिष्ठन्ते "अक्षन्नमीमदन्त ह्यव प्रिया अधूषत। अस्तोषत स्वभानवो विप्रा नविष्ठया मती। योजा न्विन्द्र ते हरी" इति। अक्षन् पितरो हविरशितवन्तः अमीमदन्त भृशं हृष्टाः हि यतः प्रियास्तनूरवाधूषत हविर्भोजनसौकर्येण शिरःप्रभृत्यङ्गानि अकम्पयन्त, स्वभानवः वपुषि जनितेन स्वकीयेन तेजसा भा-समानाः, विप्राः भोजनहृष्टा ब्राह्मणसदृशाः सन्तः, नविष्ठया मती अतिशयेन नूतनया बुद्ध्या अस्तोषत भृशमिष्टमेतदित्यादि-वचनैः स्तुतिं कृतवन्तः। योजेत्यादि व्याख्यातं। विधत्ते "अक्ष-न्नमीमदन्त हीति गार्हपत्यमुपतिष्ठन्ते" (ब्रा०) इति। नन्वक्ष-न्नित्यादिमन्त्रः पितृप्रतिपादकः, उपस्थेयस्तु गार्हपत्य इति वैयधिकरण्यमाशङ्क्य मन्त्रस्यापेक्षितशेषपूरणेन वैयधिकरण्य-परिहारं श्रुतिरेव दर्शयति "अक्षन्नमीमदन्ताथ त्वोपतिष्ठा-मह इति वावैतदाह" (ब्रा०) इति। पितरो भुक्तवन्तो हृष्टाश्च, अथ तदा साक्षिणं त्वामुपतिष्ठामह इत्येवं मन्त्रवाक्यमाह। मन्त्रस्थौ मघवन्निन्द्रेत्येतावपि शब्दावग्निपरत्वेन व्याख्येयौ। अन्नवान् परमैश्वर्ययुक्त इति तयोरर्थः। कल्पः। प्राचीनावीतं कृत्वान्वाहार्यपचनमभिप्रपद्यन्ते "अक्षन् पितरोऽमीमदन्त

पितरोऽतीतृपन्त पितरोऽमीमृजन्त पितरः” इति। अतीतृपन्त अस्मांश्च तर्पयन्तः, अमीमृजन्त अस्मान् शोधितवन्तः। अत्र सूत्रकारः शाखान्तरमन्त्रमपि विनियुङ्क्ते ‘अमीमदन्त पितरः सोम्या इत्यातमितोरुपतिष्ठन्ते’ इति। तदेतदुपस्थानं विदधानः पूर्ववद्वैयधिकरण्यं परिहरति “अमीमदन्त पितरः सोम्या इत्यभिप्रपद्यन्ते। अमीमदन्त पितरोऽथ त्वाभिप्रपद्यामह इति वावैतदाह” (ब्रा०) इति। कल्पः। परेत पितरः सोम्या इति प्रवाहण्या पितॄन् प्रवाहयतीति। पाठस्तु “परेत पितरः सोम्या गम्भीरैः पथिभिः पूर्व्यैः। अथा पितॄन्त्सुविदत्राꣳ अपीत यमेन ये सधमादं मदन्ति” इति। हे सोम्याः पितरः पथिभिः परेत परावृत्य गृहान् गच्छतेति। कीदृशैः पथिभिः। गम्भीरैः सुलभान्नतोयैः पूर्व्यैः पूर्वं कृतैः प्रवृत्तैः। अथ तदा गृहान् गत्वा तस्मिन् पितृलोके यमेन साकं ये पितरः सधमादं सहस्थानस्थमादं यथा भवति तथा मदन्ति हृष्यन्ति, तान् सुविदत्रान् सुष्ठु वेदितॄन् चिरवासेन तत्रत्यवृत्तान्तज्ञान् पितॄनपि यूयमित प्राप्नुत। कल्पः। मनो न्वाहुवामह इति मनस्वतीभिरुपतिष्ठन्त इति। तिसृषु ऋक्षु प्रथमायाः पाठस्तु “मनो न्वाहुवामहे नाराशꣳसेन स्तोमेन पितॄणाञ्च मन्मभिः” इति। नाराशꣳसेन मनुष्यप्रशंसायोग्येन स्तोमेन वाक्यसमूहेन पितॄणामपि मन्मभिः मननीयैर्वाक्यैः मनः पितृयज्ञानुष्ठानपरं चित्तं नु क्षिप्रं आहुवामहे आह्वयामः। अथ द्वितीया “आ न एतु मनः पुनः क्रत्वे

दक्षाय जीवसे। ज्योक् च सूर्यं दृशे" इति। क्रत्वे कर्मानुष्ठानाय दक्षाय तत्तत्सामर्थ्याय जीवसे जीवितुं, ज्योक् चिरं सूर्यं दृशे द्रष्टुञ्च योग्यं मन आगत्य नोऽस्मान् पुनरेतु असकृत् प्राप्नोतु। अथ तृतीया "पुनर्नः पितरो मनो ददातु दैव्यो जनः। जीवं व्रातꣳ सचेमहि" इति। हे पितरः दैव्यो जनः देवसम्बन्धिपुरुषसमूहः नोऽस्माकं मनः कर्मानुष्ठानपरं चित्तं ददातु असकृत् प्रयच्छतु। वयमपि व्रातं संवत्सरसङ्घातरूपं जीवं जीवनं सचेमहि सेवेमहि। कल्पः। यदन्तरिक्षमिति पत्न्या गार्हपत्यमुपतिष्ठत इति। पाठस्तु "यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिꣳसिम। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुञ्चतु दुरिता यानि चकृम करोतु मामनेनसं" इति। पृथिव्यादीन् लोकान् मनसा जिहिंसिम हिंसितुमिच्छेम यन्मातरं पितरं वा हिंसितुमिच्छेमेति यत् तस्मात्सर्वस्मादेनसः पापात् गार्हपत्यो मां प्रमुञ्चतु अन्यान्यपि दुरितानि यानि चकृम तेभ्योऽपि मुञ्चतु मामनेनसं सर्वपापरहितं करोतु। यदुक्तमापस्तम्बेन 'उदकुम्भमादाय यजमानः शुन्धन्तां पितर इति त्रिः प्रसव्यं वेदिं परिषिञ्चन् पर्येति' इति। तदेतद्विधत्ते "अपः परिषिञ्चति। मार्जयत्येवैनान्। अथो तर्पयत्येव" (ब्रा०) इति। एनान् पितॄन्। तद्वेदनं प्रशंसति "तृप्यति प्रजया पशुभिः। य एवं वेद" (ब्रा०) इति। चतुर्थप्रयाजवत् बर्हिर्नामकं प्रथमानूयाजं निषेधति "अपबर्हिषावनूयाजौ यजति। प्रजा वै बर्हिः।

प्रजा एव मृत्योरुत्सृजति" (ब्रा०) इति। बर्हिर्यागवर्जनात्। प्रयाजानूयाजान् प्रशंसति "चतुरः प्रयाजान् यजति। द्वावनूयाजौ। षट् सम्पद्यन्ते। षड्वा ऋतवः। ऋतूनेव प्रीणाति" (ब्रा०) इति। सूत्रकारो युक्ता मे यज्ञमन्वासाता इति यजमानः संप्रेष्यतीति प्रैषानुसारेण गार्हपत्यसमीप उपविष्टायाः पत्न्याः पूर्णपात्रनयनपर्यन्तं यदन्वासनमवोचत् तच्च पत्नीसंयाजांश्च चोदकप्राप्तान् प्रतिनिषेधति "न पत्न्यन्वास्ते। न संयाजयन्ति। यत्पत्न्यन्वासीत। यत्संयाजयेयुः। प्रमायुका स्यात्। तस्मान्नान्वास्ते। न संयाजयन्ति। पत्निये गोपीथाय" (ब्रा०) इति।

अथ विनियोगसङ्ग्रहः।

"एतत्त इति दत्ते त्रीन् वेद्याः कोणेषु पिण्डकान्।
ब्रूयुरत्रेत्युपस्थानं पूर्वस्याग्नेः सुसन्दृशं॥
अत्रन्निति प्रतीचोऽग्नेस्तथात्रन् दक्षिणानलं।
परेतेति प्रवाह्याय मन आह्वेरुपस्थितिः॥
यत् पश्चिमाग्न्युपस्थानं मन्त्रा द्वादश वर्णिताः"। इति।

अथ मीमांसा। दशमाध्यायस्य द्वितीयपादे चिन्तितं।

"नावघातोऽवघातो वा धानानां न विनश्यये।
न नाशः क्रमबाधेऽतो नावघातोऽत्र बाध्यते"॥

महापितृयज्ञे हविः किञ्चिच्छ्रूयते 'पितृभ्यो बर्हिषद्भ्यो धानाः' इति। धानाशब्देन भृष्टं धान्यमभिधीयते। तासां धानानामवघाते सति सक्तुभावापत्तेः धानात्वमेव विनश्येत,

अतस्तासामविनाशाय नाम्त्यवघात इति पूर्वः पक्षः। धाना अवहन्तव्या इति स्मृत्र चोदकवाक्यं, तस्मिंश्च वाक्ये भर्जन-सम्पादितं धानात्वं पूर्वभावि, पश्चाद्भावी त्ववघात इति क्रमः प्रतीयते। तं बाधित्वा प्रथमतोऽवघाते सति नास्ति धानात्व-नाशः, अवघातस्य पदार्थस्य बाधाद्वरं तद्धर्मस्य क्रममात्रस्य बाधनं, तस्मादवहन्तव्याः। तदेवाधिकरणं वार्तिककारमते-नारचयति।

"पेषणं नूतनं मन्थे प्राकृतं वा क्रमान्तरात्।
नूतनं प्राकृतं धर्ममात्रादाद्यस्य लाघवात्"॥

महापितृयज्ञे एवं श्रूयते 'पितृभ्योऽग्निष्वात्तेभ्योऽभिवान्यायै दुग्धे मन्थं' इति। मृतवत्सा धेनुरभिवान्या, दुग्धे द्रव्ये प्रक्षिप्य मथिताः सक्तवो मन्थः। तत्र यत्पेषणं तन्न प्राकृतं। कुतः। क्रमव्यत्यासात्। प्रकृतौ हि प्रथमतः पेषणं पश्चात् पुरोडाश-श्रपणं। अत्र तु प्रथमतः श्रपणेन धानाः सम्पाद्य पश्चात् सक्तुभावाय पेषणं। तस्मान्नूतनमिति प्राप्ते ब्रूमः। चोदक-प्राप्तप्राकृतपेषणतत्क्रमयोरुभयोर्बाधगौरवात् क्रममात्रं बाध्यं। पेषणपदार्थस्तु स एवेति तद्धर्मा दृषन्मन्त्रा इत्यादयोऽत्र क-र्तव्याः॥ ० ॥

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथम-काण्डेऽष्टमप्रपाठके पञ्चमोऽनुवाकः॥ * ॥

प्रतिपूरुषमेककपालान् निर्वपत्येकमतिरिक्तं याव-न्तो गृह्याः स्मस्तेभ्यः कमकरं पशूनाꣳ शर्मासि शर्म य-जमानस्य शर्म मे यच्छैक एव रुद्रो न द्वितीयाय तस्थ आखुस्ते रुद्र पशुस्तं जुषस्वैष ते रुद्र भागः सह स्वस्रा-म्बिकया तं जुषस्व भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजꣳ सुभेषजं ॥ १ ॥

यथाऽसति। सुगं मेषाय मेष्या अवाम्ब रुद्रमदि-मह्यव देवं त्र्यम्बकं। यथा नः श्रेयसस्करद्यथा नो व-स्यसस्करद्यथा नः पशुमतः करद्यथा नो व्यवसाय-यात्। त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं। उर्वा-रुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्। एष ते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीह्यवतत-धन्वा पिनाकहस्तः कृत्तिवासाः ॥ २ ॥

सुभेषजमिहि त्रीणि च ॥ ६ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके षष्ठोऽनुवाकः ॥ * ॥

पञ्चमे पितृयज्ञोऽभिहितः। षष्ठे त्र्यम्बकपुरोडाशाः साक-मेधशेषा उच्यन्ते। तान् विधत्ते "प्रतिपूरुषमेककपालान् निर्व-पत्येकमतिरिक्तं" इति। तद्विधिं प्रशंसति "प्रतिपूरुषमेककपा-

त्वान् निर्वपति। जाता एव प्रजा रुद्रान्निरवदयते। एक-मतिरिक्तं। जनिष्यमाणा एव प्रजा रुद्रान्निरवदयते। एक-कपाला भवन्ति। एकधैव रुद्रं निरवदयते" (ब्रा०१का०। ६प्र०।१०अ०) इति। करम्भवाक्यवन्नैर्ऋतवाक्यवच्च व्याख्येयं। मुख्यविधिसन्निधौ यावन्त इत्यादय एकादशमन्त्रा आम्नाताः। कल्पः "यावन्तो गृह्याः स्मस्तेभ्यः कमकरं" इति निरुप्य-माणेषु यजमानो जपतीति। गृहे भवा मनुष्या गृह्याः, ते वयं यावन्त इह स्थिताः तेभ्यः सर्वेभ्यः कं सुखं अकरं अकार्षं। अपि तेषु पुरोडाशेषु चोदकप्राप्तमभिघारणं निषेधति। "नाभिघारयति। यदभिघारयेत्। अन्तरवचारिणꣳ रुद्रं कुर्यात्" (ब्रा०) इति। रुद्रमनिष्टकारिणं क्रूरदेवं, अन्तरवचा-रिणं गृहस्यान्तःप्रविश्य अस्मानवरोद्धुं चरन्तं। कल्पः। तान-भिघार्यानभिघार्य वोद्वास्यान्तर्वेद्यामासाद्य पशूनाꣳ शर्मासी-ति मूते समावपति' इति। कर्षकैर्व्रीह्यादिवीजानि सङ्ग्रहीतुं तृणकटादिना पुटबन्धनं क्रियते। तदिदं मूतशब्देनोच्यते। पाठस्तु "पशूनाꣳ शर्मासि शर्म यजमानस्य शर्म मे यच्छ" इति। हे मूत भक्ष्यैस्तृणादिभिर्वीजैश्चोपेतत्वात् पशूनां शर्मासि अतो यजमानस्य मेऽध्वर्योश्च सुखं यच्छ। कल्पः "एक एव रुद्रो न द्वितीयाय तस्थे" इति दक्षिणाग्नेरेकोल्मुकं धूपायो-द्धरति उत्तरपूर्वमवान्तरदेशं गत्वेति। रुद्रो जगत्येक एवास्ति द्वितीयाय न तस्थे द्वितीयो रुद्रो न कोऽप्यवस्थितः। विधत्ते "एकोल्मुकेन यन्ति। तद्धि रुद्रस्य भागधेयं। इमां दिशं यन्ति।

एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रं निरवदयते" (ब्रा०) इति। कल्पः। आखुस्ते रुद्र पशुरित्याखूत्कर एकं पुरोडाशमुपवपत्यसौ ते पशुरिति वा द्वेष्यं मनसा ध्यायन् यदि न द्विष्यादाखुस्ते पशुरिति ब्रूयादिति। आखूत्करो मूषकैर्बिलादुद्धृतः पांसुराशिः। पाठस्तु "आखुस्ते रुद्र पशुस्तं जुषस्व" इति। हे रुद्र मूषकस्ते प्रियः पशुः। अतस्तं सेवस्व। विधत्ते "रुद्रो वा अपशुकाया आहुत्यै नातिष्ठत। असौ ते पशुरिति निर्दिशेद्यं द्विष्यात्। यमेव द्वेष्टि। तमस्मै पशुं निर्दिशति। यदि न द्विष्यात्। आखुस्ते पशुरिति ब्रूयात्। न ग्राम्यान् पशून् हिनस्ति। नारण्यान्" (ब्रा०) इति। आहुत्यै नातिष्ठत पशुरहितामाहुतिं नाङ्गीकरोतीत्यर्थः। यं द्विष्यात्तमसाविति नामग्रहणेन निर्दिशेत्, तथा सति द्वेष्यमस्मै समर्पयत्येव। कल्पः। चतुष्पथ एकोल्मुकमुपसमाधाय संपरिस्तीर्य सर्वेषां पुरोडाशानामुत्तरार्धात् सकृत्सकृदवदायावदाय मध्यमेनान्तिमेन वा पलाशपर्णेन जुहोति "एष ते रुद्र भागः सह स्वस्राम्बिकया, तं जुषस्व स्वाहा" इति। अत्र स्वाहाकारोऽध्याहृतः। हे रुद्र एषोऽवत्तः पुरोडाशानामंशः तवावदीयमानो भागः, तं भागं स्वस्रा भगिनीवद्धितकारिण्याऽम्बिकया पार्वत्या सहांशं जुषस्व सेवस्व। विधत्ते "चतुष्पथे जुहोति। एष वा अग्नीनां पड्वीशो नाम। अग्निवत्येव जुहोति। मध्यमेन पर्णेन जुहोति। स्रुग्घ्येषा। अथो खलु। अन्तमेनैव होतव्यं। अन्तत एव रुद्रं निरवदयते" (ब्रा०) इति। अग्नीनां पड्वीशः पाद-

प्रदेशस्थानं, यत्राग्नयः पुनः पुनः सञ्चारेण प्रविशन्ति तादृश एवैष चतुष्पथः, अतस्तत्र होमेनाग्निवत्येव देशे कृतं भवति। पलाशशाखायां यानि त्रीणि पर्णानि तत्र मध्यमं पर्णं प्रशस्ततया स्रुग्रूपं। वामदक्षिणपार्श्वस्थयोरन्यतरेण होमेन रुद्रो यागभूमेरन्तर्निष्काशितो भवति। सह स्वस्राम्बिकयेत्यस्य मन्त्रभागस्य तात्पर्यं व्याचष्टे "एष ते रुद्र भागः सह स्वस्राम्बिकयेत्याह। शरद्वा अस्याम्बिका स्वसा। तया वा एष हिनस्ति। यꣳ हिनस्ति। तयैवैनꣳ सह शमयति" (ब्रा०) इति। शरत्कालो हि पीनसज्वराद्युत्पादनेन हिंसकः, तद्वदियमम्बिका हिंसिका, ततः शरदित्युच्यते। एष रुद्रस्तयैव सहायभूतया प्राणिनं हिनस्ति, अतस्तया सह पुरोडाशभागमेवया तुष्टया तयैव सहैवैनं रुद्रं शमयति हिंसारहितं करोति।

कल्पः। भेषजं गवे सुभेषजमित्येताभ्यां चतुष्पथमग्निं परिषिञ्चतीति। पाठस्तु "भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजꣳ सुभेषजं यथाऽसति। सुगं मेषाय मेष्यै" इति। भेषजं सुभेषजमित्येतौ मन्त्रयोरादी। हे रुद्र गवेऽस्मदीयायै गोजात्यै भेषजमारोग्यं कुरु। एवमन्यत्र। तात्कालिकं रोगोपशमनं आत्यन्तिकं वा सुभेषजं तद् यथाऽसति यथा भवति तथा कुरु। मेषो वाहकः मेषी दोग्ध्री, तयोः सुगं सुष्ठु गमनं रोगराहित्येन सञ्चरणं यथा भवति तथा कुरु। गवाश्वादिशब्दैः पश्वादयः सर्वेऽप्युपलक्ष्यन्त इत्याह "भेषजं गव इत्याह। यावन्त एव ग्राम्याः पशवः। तेभ्यो भेषजं

करोति" (ब्रा०) इति। कल्पः। अवाम्ब रुद्रमदिमहीति यजमानो जपतीति। पाठस्तु "अवाम्ब रुद्रमदिमह्यव देवं त्र्यम्बकं। यथा नः श्रेयसस्करद्यथा नो वस्यसस्करद्यथा नः पशुमतः करद्यथा नो व्यवसाययात्" इति। हे अम्ब पार्वति रुद्रमुद्दिश्यावादिमहि पुरोडाशावदानमकार्ष्म। त्रीण्यम्बकानि नेत्राणि यस्यासौ त्र्यम्बकः। तमुद्दिश्यावादिमहि। आदरार्थं पुनर्वचनं। किमर्थमवदानं कृतमित्युच्यते। असौ रुद्रो नोऽस्मान् श्रेयसोऽध्ययनादिभिः श्रेष्ठान् यथा करत् करोति, वस्यसः वसुमत्तमान् यथा करोति, पशुमतो गवाश्वादियुक्तान् यथा करोति, व्यवसाययात् व्यवसाययति शास्त्रार्थनिश्चययुक्तान् यथा करोति, तदर्थमवदानं कृतं। यथा नः श्रेयस इत्याद्यभिधानान्मन्त्रस्याशीःपरत्वं दर्शयति "अवाम्ब रुद्रमदिमहीत्याह। आशिषमेवैतामाशास्ते" (ब्रा०) इति। कल्पः। त्र्यम्बकं यजामह इति त्रिः प्रदक्षिणमग्निं पर्येतीति। पाठस्तु "त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनं। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्" इति। शोभनः शरीरगन्धः पुण्यगन्धो वा यस्यासौ सुगन्धिः, यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वातीति श्रुतेः। पुष्टिं शरीरधनादिविषयां वर्धयतीति पुष्टिवर्धनस्तादृशं त्र्यम्बकं यजामहे पूजयामः। लोके यथोर्वारुकफलानि बन्धनात् वृन्तात् स्वयमेव मुच्यन्ते तद्वदहं त्र्यम्बकप्रसादेन मृत्योर्मुक्षीय मोचनयुक्तो भूयासं, अमृताच्चिरजीवितात् स्वर्गादेर्वा मा मुक्षीय। चतुर्थपादार्थमन्त्रस्य तात्पर्यातिशयं दर्शयति

"त्र्यम्बकं यजामह इत्याह। मृत्योर्मुचीय मामृतादिति वावैतदाह" (ब्रा०) इति। यजमानो यजामह इति यदाह एतद्वचनं मृत्योर्मुचीयेत्येवाह मोचन एव तात्पर्यं *तच्छेषत्वेन यजनमित्यर्थः। यदुक्तमापस्तम्बेन 'ऊर्द्धान् पुरोडाशानुदस्य प्रतिलभ्य त्र्यम्बकं यजामह इति यजमानस्याञ्जलौ समोप्य भगस्य भगस्य वो लप्सीयेत्यपादायैतेनैव कल्पेन त्रिः समावपेयुः' इति। तदेतत्सर्वमभिप्रेत्य सर्वेषां पुरुषाणां हस्ते स्थितस्य पुरोडाशस्योत्क्षेपणं विधत्ते "उत्किरन्ति। भगस्य लीप्सन्ते" (ब्रा०) इति। यदेतत्पिण्डानामुपरिक्षेपणं तेन सौभाग्याभिमानिनो भगनामकस्य देवस्य सकाशादेतान् पुरोडाशान् लब्धुमिच्छन्ति। अत एवोत्क्षिप्तः पुनरञ्जलौ पतति। कल्पः। तान् मूते समावपन्ति मूतयोर्मूतेषु वैष ते रुद्र भाग इति वृक्ष आसजन्ति वृक्षयोर्वृक्षेषु वापि वा मूतयोः समोप्याविवधं कृत्वा शुष्के स्थाणौ वल्मीकवपायां वावधायेति। पाठस्तु "एष ते रुद्र भागस्तं जुषस्व तेनावसेन परो मूजवतोऽतीहि" इति। हे रुद्र एष वृक्षादौ सज्यमानः पुरोडाशखण्डः तव भागस्तं सेवस्व। अवसेन पाथेयरूपतया तव रक्षकेणानेन भागेन युक्तो मूजवत एतन्नामकत्वेन प्रसिद्धात् पर्वतात् परः परभागे वर्तमानोऽतीहि अतिक्रम्य गच्छ। विधत्ते "मूते कृत्वा सजन्ति। यथा जनं यतेऽवसं करोति। तादृगेव तत्" (ब्रा०) इति। यथा लोके दूरदेशवर्तिनं बन्धुजनं प्रति गच्छते पुरुषायावसं रक्षकं

* तच्छेषत्वेनाप्यदिति का० पाठः।

पाथेयं करोति, तद्वद्वचाये पुरोडाशसञ्जनं तादृगेव भवति। मन्त्रे भागनिर्देशो रुद्रस्य निःशेषेण विसर्जनार्थ इति दर्शयति "एष ते रुद्र भाग इत्याह निरवत्यै" (ब्रा०) इति। कल्पः "अवततधन्वा पिनाकहस्तः कृत्तिवासोम्" इति त्रिरवताम्यन्तीति। प्राणायामत्रयं कुर्वन्तीत्यर्थः। ॐमित्यनेन वाक्यशेषः पूरितः। अस्मद्विरोधिनं पाप्मानं हन्तुमयं रुद्रः पिनाकनामकं धनुर्हस्ते गृहीत्वा अवततधन्वा ज्याकर्षणेन विस्तारितधनुष्कः कृत्तिवासाश्चर्मवसनः। ॐ भवतु। अथवा ऽस्मद्विषयेऽवततधन्वारोपितमौर्वीकधनुर्युक्तो भवतु। चतुष्पथप्रत्यागमनादीन् क्रमेण विधत्ते "अप्रतीक्षमायन्ति। अपः परिषिञ्चति। रुद्रस्यान्तर्हित्यै। प्र वा एतेऽस्माल्लोकाच्च्यवन्ते। ये त्र्यम्बकैश्चरन्ति। आदित्यं चरुं पुनरेत्य निर्वपति। इयं वा अदितिः। अस्यामेव प्रतितिष्ठन्ति" (ब्रा०) इति।

अत्र विनियोगसङ्ग्रहः।

"स्वामी यावन्त इत्याह पशून् मूते समावपेत्।
एक इत्युल्मुकं नीत्वाखुस्त आखूत्करे हविः॥
क्षिपेदेषोऽर्धहोमः स्यात् भे सुभे परिषिञ्चति।
अवाम्बेति जपेत् स्वामी त्रियम्ब परियन्ति ते॥
एषोऽवस्थाप्य तच्छेषान् मूते बध्नाति शाखिनि।
अवत आसनियमो मन्त्रा एकादश स्मृताः"॥ इति।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठके षष्ठोऽनुवाकः॥ * ॥

ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुना-सीराय पुरोडाशं द्वादशकपालं वायव्यं पयः सौर्य-मेककपालं द्वादशगवꣳ सीरं दक्षिणाग्नेयमष्टाक-पालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुं वहिनी धेनुर्दक्षिणा ये देवाः पुरःसदो ऽग्निनेत्रा दक्षिणसदो यमनेत्राः पश्चात्सदः सवितृ-नेत्रा उत्तरसदो वरुणनेत्रा उपरिषदो बृहस्पति-नेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यः ॥ १ ॥

नमस्तेभ्यः स्वाहा समूढꣳ रक्षः सन्दग्धꣳ रक्ष इदमहꣳ रक्षोऽभि सन्दहाम्यग्नये रक्षोघ्ने स्वाहा य-माय सवित्रे वरुणाय बृहस्पतये दुवस्वते रक्षोघ्ने स्वाहा प्रष्टिवाही रथो दक्षिणा देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि हतꣳ रक्षोऽवधिष्म रक्षो यद्वस्ते तद्दक्षिणा ॥

॥ २ ॥

तेभ्यः पञ्चचत्वारिꣳशच्च ॥ ७ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके सप्तमोऽनुवाकः ॥ * ॥

षष्ठे साकमेधाः समापिताः। सप्तमे शुनासीर्यमिन्द्रतुर्यञ्चेति कर्मद्वयं पञ्चेध्मीयमन्त्राः अपामार्गहोममन्त्राश्चोच्यन्ते। तत्र शुनासीर्यहवींषि विधत्ते "ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुमिन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं वायव्यं पयः सौर्यमेककपालं द्वादशगवꣳ सीरं दक्षिणा" इति। शुनासीराय शुनो वायुः सीर आदित्यः ताभ्यां युक्तः शुनासीरः। द्वादशगवं द्वादशभिर्बलीवर्दैरुह्यमानं सीरं लाङ्गलं। अत्र वैश्वदेवगतानामाग्नेयादीनां पञ्चानां हविषां ब्राह्मणमनुब्राह्मणञ्चातिदिशति। "एतद्ब्राह्मणान्येव पञ्च हवीꣳषि" (ब्रा०१का०।७प्र०।१अ०) इति। अथोपदिश्यमानेषु पञ्चसु ऐन्द्राग्नवैश्वदेवयोः पूर्वमेव प्रशस्तत्वादवशिष्टानि त्रीणि प्रशंसति। अथवा तयोर्विकल्पमभिप्रेत्य तदभावपक्षानुसारेण तावुपेक्ष्य अवशिष्टान्येव प्रशंसति "अथेन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं निर्वपति। संवत्सरो वा इन्द्रःशुनासीरः। संवत्सरेणैवास्मा अन्नमवरुन्धे। वायव्यं पयो भवति। वायुर्वै वृष्ट्यै प्रदापयिता। स एवास्मै वृष्टिं प्रदापयति। सौर्य एककपालो भवति। सूर्येण वा अमुष्मिंल्लोके वृष्टिर्धृता। स एवास्मै वृष्टिं नियच्छति। द्वादशगवꣳ सीरं दक्षिणा समृद्ध्यै" (ब्रा०) इति। अस्य च शुनासीर्यस्य कालं बोधायन आह। अथातश्चतुर्षु मासेसु शुनासीरीयहविर्भिर्यक्ष्यमाणो भवति। तत्र पूर्वेभ्यस्त्रिभ्यः पर्वभ्य ऊर्द्ध्वं प्रत्येकं मासचतुष्टयमतिवाह्य क्रियमाणमिदं संवत्सरादूर्द्ध्वं प्रवर्तते। तदेतदभिप्रेत्य संवत्सरो वा इन्द्रःशुनासीर इत्युक्तं वायुसूर्याभ्यां युक्त इन्द्र,

संवत्सरे समाप्ते प्राप्तत्वात् संवत्सर इत्युच्यते। वायोः पुरोवातरूपेण वृष्टिप्रदापयितृत्वं। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिरिति स्मरणात् सूर्यस्य स्वर्गे वृष्टिधारकत्वं। अथेन्द्रतुरीयस्य हवींषि विधत्ते "आग्नेयमष्टाकपालं निर्वपति रौद्रं गावीधुकं चरुमैन्द्रं दधि वारुणं यवमयं चरुं वहिनी धेनुर्दक्षिणा" इति। गावीधुकं आरण्यधान्यविशेषनिष्पन्नं। पृष्ठे भारं वहतीति वहिनी। इन्द्रतुर्यं विधातुं प्रस्तौति "देवासुराः संयत्ता आसन्। ते देवा अग्निमब्रुवन्। त्वया वीरेणासुरानभिभवामेति। सोऽब्रवीत्। त्रेधाहमात्मानं विकरिष्य इति। स त्रेधात्मानं व्यकुरुत। अग्निं तृतीयं। रुद्रं तृतीयं। वरुणं तृतीयं। सोऽब्रवीत्। क इदं तुरीयमिति। अहमितीन्द्रोऽब्रवीत्। सं तु सृजावहा इति। तौ समसृजेतां। स इन्द्रस्तुरीयमभवत्। यदिन्द्रस्तुरीयमभवत्। तदिन्द्रतुरीयस्येन्द्रतुरीयत्वं। ततो वै देवा व्यजयन्त" (ब्रा०) इति। वीरत्वमिद्धये शरीरत्रयरूपेण विकारः। स त्रेधा विकृतोऽग्निरिन्द्रं प्रति पप्रच्छ, मयेदं रूपत्रयं युद्धसमर्थं सम्पादितं। अथ कोऽन्य इदं चतुर्थं रूपं विजयसमर्थं करिष्यतीति। अहमेव करिष्यामीतीन्द्रोऽब्रवीत् तत् त्वया तथा क्रियतां किन्त्वावां युद्धविजयक्षमौ संसृष्टौ भवावेति। इन्द्र एव तुरीयो यस्मिन् कर्मणि तत् कर्मेन्द्रतुरीयं। अत्रान्यदीयरूपापेक्षया तुरीयत्वं, अनुष्ठाने तु पाठक्रमेण वरुणस्तुरीयः। विधत्ते "यदिन्द्रतुरीयं निरुप्यते विजित्यै" (ब्रा०) इति। चतुर्देवप्रियांशसम्पादनेन दक्षिणां प्रशंसति "वहिनी धेनुर्दक्षिणा।

यद्वहिनी। तेनाग्नेयी। यद्गौः। तेन रौद्री। यद्धेनुः। तेनैन्द्री। यत्स्त्री सती दान्ता। तेन वारुणी समृद्धा" (ब्रा०) इति। गोत्वं जातिः, धेनुत्वं नवप्रसवत्वं। अस्य चैन्द्रतुरीयस्य कर्मणः शुनासीर्यदिन एवानुष्ठानमापस्तम्बो दर्शयति 'ततश्चतुर्हविषेन्द्रतुरीयेण यजत' इति। इन्द्रतुरीयविधानादूर्द्ध्वं ये देवाः पुरःसद इत्यादयो मन्त्रा आम्नाताः, तेषां विनियोगमापस्तम्बो दर्शयति 'एतस्या एव रात्रेर्निशायां पञ्चेध्मीयेन यजते चतुर्धाहवनीयं प्रतिदिशं व्युद्धृत्य मध्ये पञ्चमं कृत्वा पृथगिध्मानुपसमाधाय जुह्वां पञ्चगृहीतं गृहीत्वा ये देवाः पुरःसद इत्येतैर्यथालिङ्गं जुहोति मध्ये पञ्चमेन समूढꣳ रक्ष इति मध्य इध्मानुपसमूह्यैकधोपसमाधाय अपरं पञ्चगृहीतं गृहीत्वा अग्नये रक्षोघ्ने स्वाहेत्युत्तराः पञ्चाहुतीर्जुहोति प्रष्टिवाही रथो दक्षिणा' इति। ये देवा इत्यादिमन्त्रपाठस्तु "ये देवाः पुरःसदोऽग्निनेत्रा दक्षिणसदो यमनेत्राः पश्चात्सदः सवितृनेत्रा उत्तरसदो वरुणनेत्रा उपरिषदो बृहस्पतिनेत्रा रक्षोहणस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा" इति। पुरःसदः पूर्वदिग्वर्त्तिनः, अग्निनेत्राः अग्निप्रमुखाः। ये देवाः रक्षोहणः राक्षसघ्नाः सन्ति ते देवा नोऽस्मान् रक्षोनिवारणेन पान्तु। पुनरपि ते देवाः नोऽस्मान् कर्मानुष्ठानेनावन्तु। तेभ्यो देवेभ्यो नमस्कारोऽस्तु, तेभ्य इदं हव्यं स्वाहुतमस्तु। दक्षिणसदो यमनेत्रा इत्यस्य मन्त्रस्यादौ ये देवा इत्यनुषज्यते अन्ते च रक्षोहण इत्यादिकमनुषज्यते। एवं तृतीयचतुर्थयो-

द्रष्टव्यं। पञ्चमे तु ये देवा इत्येतावद्देवानुषज्यते। प्रथमे तु रचोहण इत्यादिकमेवानुषज्यते। तदेतत्पञ्चभीयं विधातुं प्रस्तौति "प्रजापतिर्यज्ञमसृजत। तꣳ सृष्टꣳ रचाꣳस्यजिघाꣳसन्। स एताः प्रजापतिरात्मनो देवता निरमिमीत। ताभिर्वै स दिग्भ्यो रचाꣳसि प्राणुदत" (ब्रा०) इति। विधत्ते "यत्पञ्चावत्तीयं जुहोति। दिग्भ्य एव तद्यजमानो रचाꣳसि प्रणुदते" (ब्रा०) इति। पञ्चकृत्वोऽवदाय सम्पादितमाज्यं पञ्चावत्तीयं। समूढमित्यादिमन्त्रपाठस्तु "समूढꣳ रचः सन्दग्धꣳ रच इदमहꣳ रचोऽभि सन्दहामि" इति। रचोऽस्मत्प्रतिकूलं राचसजातं समूढं नाशयितुं सम्यगेकीकृतं सन्दग्धञ्च। पुनरपीदमिदानीमहं रचोऽभि दग्धस्य रचसोऽभितः सर्वतोऽवस्थितांस्तत्तदनुचरान् सम्यग् दहामि। एतन्मन्त्रपाठेन तस्य सिद्धिं दर्शयति "समूढꣳ रचः सन्दग्धꣳ रच इत्याह। रचाꣳस्येव सन्दहति" (ब्रा०) इति। अग्नये रचोघ्न इति मन्त्रपाठस्तु "अग्नये रचोघ्ने स्वाहा यमाय सवित्रे वरुणाय बृहस्पतये दुवस्वते रचोघ्ने स्वाहा" इति। यमायेत्यादिषु रचोघ्ने स्वाहेत्यनुषज्यते। बृहस्पतेर्दुवस्वत इति विशेषणं परिचर्यावदित्यर्थः। अग्नियमादयो जितवन्त इति युक्तस्तद्धोम इति दर्शयति "अग्नये रचोघ्ने स्वाहेत्याह। देवताभ्य एव विजिग्यानाभ्यो भागधेयं करोति" (ब्रा०) इति। विजिग्यानाभ्यो विशेषेण जितवतीभ्यः। देयं रथं विधत्ते "प्रष्टिवाही रथो दचिणा" इति। त्रिपादाधारवदश्वत्रयेणोह्यमानः प्रष्टि-

वाही। समृद्धिहेतुत्वेन तं प्रशंसति "प्रष्टिवाही रथो दक्षिणा समृद्ध्यै" (ब्रा०) इति। अपामार्गहोममन्त्राणां विनियोगमापस्तम्ब आह 'व्युष्टायां पुराग्निहोत्रादपामार्गहोमेन चरन्ति अपां न्ययनादपामार्गानाहृत्य तान् सक्तून् कृत्वा दक्षिणाग्नेरेकोल्मुकं धूपायद्धरति उत्तरपूर्वमवान्तरदेशं गत्वा स्वकृत इरिणे प्रदरे वोपसमाधाय देवस्य त्वेत्यनुद्रुत्य रक्षसो वधं जुहोमीति पर्णमयेन स्रुवेण जुहोति हतꣳ रक्ष इति स्रुवमनुप्रहृत्यावधिष्म रक्ष इत्युपतिष्ठते' इति। मन्त्रपाठस्तु "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ रक्षसो वधं जुहोमि हतꣳ रक्षोऽवधिष्म रक्षः" इति। एते त्रयो मन्त्राः स्पष्टार्थाः। तत्र रक्षसो वधमुद्दिश्येति शेषः। होमकाले यदस्त्रमाच्छादयति तस्य दानं विधत्ते "यद्वस्ते तद्दक्षिणा" इति। अपामार्गहोमं विधातुं प्रस्तौति "इन्द्रो वृत्रꣳ हत्वा। असुरान् पराभाव्य। नमुचिमासुरं नालभत। तꣳ शच्याग्रह्णात्। तौ समलभेतां। सोऽस्मादभिशुनतरोऽभवत्। सो ऽब्रवीत्। सह्याꣳ सन्दधावहै। अथ त्वाऽवः स्रक्ष्यामि। न मा शुष्केण नार्द्रेण हनः। न दिवा न नक्तमिति। स एतमपां फेनमसिञ्चत्। न वा एष शुष्को नार्द्रो व्युष्टासीत्। अनुदितः सूर्यः। न वा एतद्दिवा। न नक्तं। तस्यैतस्मिँल्लोके। अपां फेनेन शिर उदवर्तयत्। तदेनमन्ववर्त्तत। मित्रध्रुगिति। स एतानपामार्गानजनयत्। तानजुहोत्। तैर्वै स रक्षाꣳस्यपाहत" (ब्रा०) इति। इन्द्रो वृत्रवधादूर्द्ध्वमन्यानसुरान् परिभूतान् कृत्वा नमु-

चिनामानमसुरं नालभत न पराभवितवान्। अपराभूतं तं नमुचिं शच्या स्वशक्त्या ऽग्टह्णात्। यथा युध्यन्नेको मल्लः सबदशक्तोऽपि धैर्येण शक्तिमापाद्य हस्ताभ्यां प्रतिमल्लमालिङ्ग्य गृह्णाति तद्वत्। ततस्ताविन्द्रनमुची समलभेतां परस्परोपमर्दनपरौ संरब्धौ हस्ताभ्यां पादाभ्यामन्योऽन्यं दृढमवष्टभ्य मल्लद्वयवत् भूमौ पतितौ, तदानीं स नमुचिरस्मादिन्द्रादभिष्टुनतरः अभितो हस्तयोः पादयोश्च बलवत्तरोऽभूत्। ततो मुमूर्षुमिन्द्रमवलोक्य कृपालुरिदमब्रवीत् भो इन्द्र विगृह्यमाणराजद्वयवदावां परस्परमङ्गीकारेण सन्धिं करवाव। अथ त्वां मुमूर्षुमवसृज्यामि मोचयिष्यामीति। ततः प्रहारसाधने काले च समयमेवं कृतवान्। भो इन्द्र शुष्केणार्द्रेण वा काष्ठादिना साधनेन मां न हनः मां मावधीः, दिवा रात्रौ च मावधीरिति। इन्द्रश्च तं समयमङ्गीकृत्य तेन मोचितो धैर्येण स्वस्थो भूत्वा समयानुसारेण तं नमुचिं हन्तुं अपां फेनमायुधं भावयित्वा तस्मिन्नमुचावसिञ्चत्। न चैवं सति समयलोपः शङ्कनीयः। यत एष फेनो नैव शुष्कः, स्पर्शे सति काठिण्याप्रतीतेः। नाप्यार्द्रः, तेन वस्त्रादेरक्लेदनात्। कालञ्च समयानुसारेण सम्पादयामास। यदा रात्रिर्व्युष्टा प्रभातासीत् सूर्यश्चानुदितः, तदानीमन्धकाराभावात् न रात्रित्वं सूर्योदयाभावाच्च नैतदहः। एतस्मिन् लोके रात्रेरह्नश्च सन्धिकाले तस्य नमुचेः शिर अपां फेनेनोदवर्तयत् उदच्छिनत्। तच्चोच्छिन्नं शिरो हे मित्रद्रोहिन्

इन्द्रेत्युच्चारयत् एनमिन्द्रमन्ववर्तत सर्वदानुगतमभूत्। तत-स्तच्छिरो वारयितुं स इन्द्र एतान् लोकप्रसिद्धानपामार्गा-नजनयत् तानुत्पन्नानजुहोत्, तैरेव हुतैः स इन्द्रो नमुचेः शिरःसहितानि सर्वाण्यवशिष्टानि रक्षांसि हतवान्। विधत्ते "यदपामार्गहोमो भवति। रक्षसामपहत्यै" (ब्रा०) इति। अङ्गविधीन् मन्त्रव्याख्यानञ्च क्रमेण दर्शयति "एकोल्मुकेन यन्ति। तद्धि रक्षसां भागधेयं। इमां दिशं यन्ति। एषा वै रक्षसां दिक्। स्वायामेव दिशि रक्षाꣳसि हन्ति। स्वकृत इरिणे जुहोति प्रदरे वा। एतद्वै रक्षसामायतनं। स्व एवा-यतने रक्षाꣳसि हन्ति। पर्णमयेन स्रुवेण जुहोति। ब्रह्म वै पर्णः। ब्रह्मणैव रक्षाꣳसि हन्ति। देवस्य त्वा सवितुः प्रसव इत्याह। सवितृप्रसूत एव रक्षाꣳसि हन्ति। हतꣳ रक्षोऽव-धिष्म रक्ष इत्याह। रक्षसाꣳस्तृत्यै। यद्वस्ते तद्दक्षिणा निरवत्यै। अप्रतीक्षमायन्ति। रक्षसामन्तर्हित्यै" (ब्रा०) इति। इमां दिशं वायवीं। स्तृत्यै हननाय। निरवत्यै भागप्रदानेन निःसार-णाय। स्पष्टमन्यत्। अत्र शुनासीर्यैन्द्रतुरीयपञ्चेध्मीयापा-मार्गहोमानां चतुर्णां कर्मभेदेऽप्येकस्मिन्नेव दिने कर्तव्यत्वात् एकेनानुवाकेनोपसंहारः।

अत्र विनियोगसङ्ग्रहः।

"पञ्चेध्मवह्नौ जुहुयाद्ये देवा इति पञ्चभिः।
समूहन्तोध्मान् समिति पञ्चहोमस्तथाग्नये॥
निशि हुत्वा सक्तुहोमः प्रातर्देवेति मन्त्रतः।

हुतं स्रुवप्रहरणमवधिम्रेति चोत्थितिः ॥

अनुवाके सप्तमेऽस्मिन्नुक्ता मन्त्राश्चतुर्दश"। इति।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठके सप्तमोऽनुवाकः ॥ * ॥

धात्रे पुरोडाशं द्वादशकपालं निर्वपत्यनुमत्यै चरुꣳ राकायै चरुꣳ सिनीवाल्यै चरुं कुह्वै चरुं मिथुनौ गावौ दक्षिणाग्नावैष्णवमेकादशकपालं निर्वपत्यैन्द्रावैष्णवमेकादशकपालं वैष्णवं त्रिकपालं वामनो वही दक्षिणाग्नीषोमीयमेकादशकपालं निर्वपतीन्द्रासोमीयमेकादशकपालꣳ सौम्यं चरुं बभ्रुर्दक्षिणा सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुꣳ श्यामो दक्षिणा वैश्वानरं द्वादशकपालं निर्वपति हिरण्यं दक्षिणा वारुणं यवमयं चरुमश्वो दक्षिणा ॥ १ ॥

वैश्वानरं द्वादशकपालं निरष्टौ च ॥ ८ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठकेऽष्टमोऽनुवाकः ॥ * ॥

सप्तमेऽनुवाके शुनासीर्यादिकर्मचतुष्टयमेकदिनकर्तव्यमुक्तं। अष्टमे देविकादिकर्मषट्कमेकदिनकर्तव्यमुच्यते। तत्रादौ देविकानामकानि पञ्च हवींषि विधत्ते "धात्रे पुरोडाशं द्वादशकपालं निर्वपत्यनुमत्यै चरुꣳ राकायै चरुꣳ सिनीवाल्यै चरुं कुह्वै चरुं मिथुनौ गावौ दक्षिणा" इति। अत्र धात्रादीन् पञ्च देवान् दक्षिणाञ्च प्रजोत्पत्त्युपयोगेन प्रशंसति "धात्रे पुरोडाशं द्वादशकपालं निर्वपति। संवत्सरो वै धाता। संवत्सरेणैवास्मै प्रजाः प्रजनयति। अन्वेवास्मा अनुमतिर्मन्यते। राते राका। प्र सिनीवाली जनयति। प्रजास्वेव प्रजातासु कुह्वा वाचं दधाति। मिथुनौ गावौ दक्षिणा समृद्ध्यै" (ब्रा०१का०। ७प्र०।२अ०) इति। संवत्सरकालस्वामी धाता गर्भधारणमारभ्य संवत्सरादर्वागेव प्रजोत्पत्तिं कारयति। अनुमतिदेवता यजमानार्थं प्रजोत्पत्तिमङ्गीकरोति। राका तु पुत्रपुष्यादिरूपं राते ददाति। सिनीवाली तद्रूपं गर्भं निःसारयति। कुहूदेवतयाध्वर्युः प्रजासु वाचमुच्चारयितुं सामर्थ्यञ्च दधाति। अथ त्रिहविष्काणि त्रीणि कर्माणि एकैकहविष्के द्वे कर्मणी च क्रमेण विधत्ते "आग्नावैष्णवमेकादशकपालं निर्वपत्यैन्द्रावैष्णवमेकादशकपालं वैष्णवं त्रिकपालं वामनो वही दक्षिणाग्नीषोमीयमेकादशकपालं निर्वपतीन्द्रासोमीयमेकादशकपालꣳ सौम्यं चरुं बभ्रुर्दक्षिणा सोमापौष्णं चरुं निर्वपत्यैन्द्रापौष्णं चरुं पौष्णं चरुꣳ श्यामो दक्षिणा वैश्वानरं द्वादशकपालं निर्वपति हिरण्यं दक्षिणा वारुणं यव-

मयं चरुमश्वो दक्षिणा" इति । बभ्रुः कपिलः । प्रथमस्य त्रिहविष्कस्य देवता दक्षिणाश्च प्रशंसति "आग्नावैष्णवमेकादशकपालं निर्वपति । ऐन्द्रावैष्णवमेकादशकपालं । वैष्णवं त्रिकपालं । वीर्यं वा अग्निः । वीर्यमिन्द्रः । वीर्यं विष्णुः । प्रजा एव प्रजाता वीर्ये प्रतिष्ठापयति । तस्मात् प्रजा वीर्यावतीः । वामन ऋषभो वही दक्षिणा । यद्वही । तेनाग्नेयः । यदृषभः । तेनैन्द्रः । यद्वामनः । तेन वैष्णवः समृद्ध्यै" (ब्रा०) इति । आग्नेयादीनां वीर्यप्रदत्वात् तद्रूपत्वं प्रजानां । स्वस्वव्यापारसामर्थ्यं वीर्यं । वहीत्यादीनामग्न्यादिप्रियत्वादाग्नेयादित्वं । मध्यमस्य त्रिहविष्कस्य देवता दक्षिणाश्च प्रशंसति "अग्नीषोमीयमेकादशकपालं निर्वपति । इन्द्रासोमीयमेकादशकपालं । सौम्यं चरुं । सोमो वै रेतोधाः । अग्निः प्रजानां प्रजनयिता । वृद्धानामिन्द्रः प्रदापयिता । सोम एवास्मै रेतो दधाति । अग्निः प्रजां प्रजनयति । वृद्धामिन्द्रः प्रयच्छति । बभ्रुर्दक्षिणा समृद्ध्यै" (ब्रा०) इति । गर्भाशये निषिक्तं रेतो यथा बहिर्न निःसरति यथा च न पूयति तथा सोमो धारणसामर्थ्यं प्रयच्छति । धृतस्य च गर्भस्य पतनादिविघ्नं परिहृत्याग्निः प्रजा उत्पादयति । इन्द्रस्तूत्पन्नाः प्रजाः स्वस्वोचितगुणैरभिवृद्धा यथा भवन्ति तथा सामर्थ्यं प्रयच्छति । अन्त्यस्य त्रिहविष्कस्य देवता दक्षिणाश्च प्रशंसति "सोमापौष्णं चरुं निर्वपति । ऐन्द्रापौष्णं चरुं । सोमो वै रेतोधाः । पूषा पशूनां प्रजनयिता । वृद्धानामिन्द्रः प्रदापयिता । सोम एवास्मै रेतो

दधाति। पूषा पशून् प्रजनयति। वृद्धानिन्द्रः प्रयच्छति। पौष्णश्चरुर्भवति। इयं वै पूषा। अस्यामेव प्रतितिष्ठति। श्यामो दक्षिणा समृद्ध्यै" (ब्रा०) इति। आद्ये त्रिहविष्के व्यासक्तदेवतान्तःपाती यो विष्णुः स एवैकाकी वैष्णवं त्रिकपालमित्यत्रोच्यते न त्वन्यः कश्चित्, अतः सहैव व्याख्यानं कृतं। इह तु व्यासक्तदेवतान्तःपाती पूषा कश्चित्पोषकः पुरुषविशेषः, पौष्णचरौ तु भूमिः पूषा, अतो देवताभेदात् पृथग्व्याख्यानं। एकहविष्के पञ्चमे कर्मणि देवतां दक्षिणाञ्च प्रशंसति "बहु वै पुरुषोऽमेध्यमुपगच्छति। वैश्वानरं द्वादशकपालं निर्वपति। संवत्सरो वा अग्निर्वैश्वानरः। संवत्सरेणैवैनꣳ स्वदयति। हिरण्यं दक्षिणा। पवित्रं वै हिरण्यं। पुनात्येवैनं" (ब्रा०) इति। अमेध्यत्वमशुचित्वं तच्च बहुविधं भोजनादिकालेषु पुनः पुनः प्रवृत्तत्वात्। तत्र संवत्सरस्वामी वैश्वानरोऽग्निः संवत्सरकालेनैनं यजमानं स्वदयति मेध्यं करोति तच्चात्रेष्टिमात्रेण लभ्यते। हिरण्यस्योच्छिष्टादिसंसर्गेऽपि मृद्भाण्डवत् परित्यागाभावात् पवित्रत्वं। एकहविष्के षष्ठे कर्मणि देवतां प्रशंसति "बहु वै राजन्योऽनृतं करोति। उप जाम्यै हरते। जिनाति ब्राह्मणं। वदत्यनृतं। अनृते खलु वै क्रियमाणे वरुणो गृह्णाति। वारुणं यवमयं चरुं निर्वपति। वरुणपाशादेवैनं मुञ्चति। अश्वो दक्षिणा। वारुणो हि देवतयाश्वः समृद्ध्यै" (ब्रा०) इति। राजन्यः क्षत्रियो बहुविधं अनृतं अशास्त्रीयं करोति, यथा जाम्यै जायायै आयासं सम्पादयितुं उपहरते यस्य कस्यचित्

गृहमुपेत्य स्त्रियं हरति। ब्राह्मणं विद्याप्रसङ्गादिना जिनाति जयति न्यक्करोति। स्पष्टमन्यत्। प्रतिग्रहमन्त्रे वरुणायाश्वमित्याम्नातत्वादश्वस्य वारुणत्वं।

अथ मीमांसा। एकादशाध्यायस्य तृतीयपादे चिन्तितं।

"सोमापौष्णादिके तन्त्रमङ्गानामुत भिन्नता।
तन्त्रं फलैक्यतो मैवं दक्षिणाकर्तृभेदतः"॥

राजसूये श्रूयते 'सोमापौष्ण एकादशकपाल ऐन्द्रापौष्णश्चरुः पौष्णश्चरुः श्यामो दक्षिणा' इति 'आग्नावैष्णव एकादशकपाल ऐन्द्रापौष्णश्चरुर्वैष्णवस्त्रिकपालो वामनो दक्षिणा' इति। तत्र द्वयोस्त्रिकयोस्तन्त्रेणानुष्ठानं। कुतः। कृत्स्नस्य राजसूयस्य फलैकत्वेनैतदेकदेशयोरनयोरपि फलैक्यात्। न च दर्शपूर्णमासयोरिवात्र कालभेदोऽस्ति, येनात्रापि तथा शङ्क्येतेति प्राप्ते ब्रूमः। श्यामवामनयोर्दक्षिणयोर्भेदेन ताभ्यामानमतां कर्तॄणां भेदादङ्गानि भिद्यन्ते॥ ० ॥

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठकेऽष्टमोऽनुवाकः॥ * ॥

बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालꣳ राजन्यस्य गृह ऋषभो दक्षिणादित्यं चरुं महिष्यै गृहे धेनुर्दक्षिणा नैर्ऋतं

चरुं परिवृत्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं कृष्णा कूटा दक्षिणाग्नेयमष्टाकपालꣳ सेनान्यो गृहे हिरण्यं दक्षिणा वारुणं दशकपालꣳ सूतस्य गृहे महानिरष्टो दक्षिणा मारुतꣳ सप्तकपालं ग्रामण्यो गृहे पृश्निर्दक्षिणा सावित्रं द्वादशकपालं ॥ १ ॥

क्षत्तुर्गृह उपध्वस्तो दक्षिणाश्विनं द्विकपालꣳ *संग्रहीतुर्गृहे संवात्यौ दक्षिणा पौष्णं चरुं भागदुघस्य गृहे श्यामो दक्षिणा रौद्रं गावीधुकं चरुमक्षावापस्य गृहे शबल उद्वारो दक्षिणेन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रति निर्वपतीन्द्रायाꣳहोमुचेऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यान्मैत्राबार्हस्पत्यं भवति श्वेतायै श्वेतवत्सायै दुग्धे स्वयम्मूर्त्ते स्वयम्मथित आज्य आश्वत्थे ॥ २ ॥

पात्रे चतुःस्रक्त्तौ स्वयमवपन्नायै शाखायै कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्विचिनुयाद्ये कर्णाः स पयसि बार्हस्पत्यो येऽकर्णाः स आज्ये मैत्रः स्वयङ्कृता वेदिर्भवति स्वयन्दिनं बर्हिः स्वयङ्कृत इध्मः सैव श्वेता श्वेतवत्सा दक्षिणा ॥ ३ ॥

---

* सङ्ग्रहीतुरिति पाठान्तरः ।

सावित्रं द्वादशकपालमाश्वत्थे चर्यस्त्रिꣳशच्च ॥ ९ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके नवमोऽनुवाकः ॥ ० ॥

अष्टमे देविकादिकं कर्मषट्कमेकदिनकर्तव्यमुक्तं। नवमे रत्निनां हवींषि अनुदिनं क्रमेण कर्तव्यान्युच्यन्ते।.तत्र एकादश हवींषि विधत्ते "बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालꣳ राजन्यस्य गृह ऋषभो दक्षिणादित्यं चरुं महिष्यै गृहे धेनुर्दक्षिणा नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं कृष्णा कूटा दक्षिणाग्नेयमष्टाकपालꣳ सेनान्यो गृहे हिरण्यं दक्षिणा वारुणं दशकपालꣳ सूतस्य गृहे महानिरष्टो दक्षिणा मारुतꣳ सप्तकपालं ग्रामण्यो गृहे पृश्निर्दक्षिणा सावित्रं द्वादशकपालं क्षत्तुर्गृह उपध्वस्तो दक्षिणाश्विनं द्विकपालꣳ संग्रहीतुर्गृहे सवात्यौ दक्षिणा पौष्णं चरुं भागदुघस्य गृहे श्यामो दक्षिणा रौद्रं गावीधुकं चरुमक्षावापस्य गृहे शबल उद्वारो दक्षिणा" इति। ऋत्विग्विशेषो ब्रह्मा तस्य गृहे राजा गत्वेतामिष्टिं कुर्यात्। एवं सर्वत्र। शितिपृष्ठः श्वेतपृष्ठः। कृताभिषेका राज्ञः स्त्री महिषी। परिवृक्तिः प्रीतिरहिता राज्ञः स्त्री, तद्गृहे गत्वा कृष्णानां व्रीहीणां कृष्णान् व्रीहीन् नखैर्निर्भिन्नानवघातमन्तरेणैव तण्डुलान्निष्पाद्य चरुः कर्तव्यः। कूटा भग्नशृङ्गी गौः। सूतः सारथिः। महानिरष्टः पीडितवृषणः। पृश्नि

पृष्ठः अल्पतनुरित्यन्ये। चत्ता यष्टिहस्तोऽन्तःपुराध्यक्षः। सङ्कीर्णवर्ण उपध्वस्तः। सङ्गृहीता धनसङ्ग्रहकर्ता कोशाध्यक्षः। सवात्यौ समानमातरौ वत्सौ एकोदराविप्यर्थः। यो राज्ञः प्राप्तं षष्ठं भागं प्रजाभ्यो गृह्णाति स भागदुघः। गावीधुको ऽरण्यगोधूमनिष्पन्नः। अक्षावापो द्यूतकारः। शबलश्चित्रवर्णः। उद्वारो दीर्घपुच्छः। यथोक्तानि सर्वाणि हवींषि समस्य प्रशंसति "रत्निनामेतानि हवीꣳषि भवन्ति। एते वै राष्ट्रस्य प्रदातारः। एतेऽपादातारः। य एव राष्ट्रस्य प्रदातारः। ये ऽपादातारः। त एवास्मै राष्ट्रं प्रयच्छन्ति। राष्ट्रमेव भवति" (ब्रा०१का०।७प्र०।३अ०) इति। रत्नान्येषां सन्तीति रत्निनः, ब्राह्मणराजन्यमहिष्यादयो रत्निनः, तदभिमानिदेवानां प्रियाण्येतानि हवींषि, अतस्तद्गृहेष्वेव गत्वा निर्वपेत्। एते रत्निनामभिमानिनो देवा एव राष्ट्रं प्रदातुमपादातुञ्च समर्थाः। अतः स्वकीयब्रह्मादिगृहेषु निर्वापेण तुष्टा अस्मै राष्ट्रं प्रयच्छन्ति। रत्नीत्येकनाम्ना प्रसक्तं प्रयोगैक्यमपोद्य देशभेदप्राप्तं प्रयोगभेदं प्रशंसति "यत्समाहृत्य निर्वपेत्। अरत्निनः स्युः। यथायथं निर्वपति रत्नित्वाय" (ब्रा०) इति। अरत्निनो रत्नरहिता दरिद्राः। पूर्वोक्तदेविकादिवदेकानुवाकविहितत्वेन प्रसक्तं दिनैक्यमपवदितुं दिनभेदं विधत्ते "यत्सद्यो निर्वपेत्। यावतीमेकेन हविषाशिषमवरुन्धे। तावतीमवरुन्धीत। अन्वहं निर्वपति। भूयसीमेवाशिषमवरुन्धे। भूयसो यज्ञक्रतूनुपैति" (ब्रा०) इति। आशिषं फलं। बहुदिनानुष्ठाने क्रतुबाहुल्यं

अनामा प्रतीयते। गृहस्वामिनं ब्रह्माभिमानिनं बृहस्पतिं प्रशंसति "बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे। मुखत एवास्मै ब्रह्म सꣳश्यति। अथो ब्रह्मन्नेव क्षत्रमन्वारम्भयति। शितिपृष्ठो दक्षिणा समृद्ध्यै" (ब्रा०) इति। मुखत एव कर्मोपक्रम एव यजमानार्थं ब्राह्मणजातिं संश्यति सम्यक् तीक्ष्णीकरोति उत्कृष्टं करोतीत्यर्थः। किञ्च प्रथमतो ब्रह्मगृहं पश्चाद्राजन्यगृहमित्येवं ब्राह्मणजातिमनु क्षत्रियजात्यारम्भः कारितो भवति। इन्द्रं प्रशंसति "ऐन्द्रमेकादशकपालꣳ राजन्यस्य गृहे। इन्द्रियमेवावरुन्धे। ऋषभो दक्षिणा समृद्ध्यै" (ब्रा०) इति। अदितिं प्रशंसति "आदित्यं चरुं महिष्यै गृहे। इयं वा अदितिः। अस्यामेव प्रतितिष्ठति। धेनुर्दक्षिणा समृद्ध्यै" (ब्रा०) इति। अत्र मुख्यब्राह्मण उपेक्षितं हविर्विशेषं विधत्ते "भगाय चरुं वावातायै गृहे। भगमेवास्मिन् दधाति। विचित्तगर्भा पष्ठौही दक्षिणा समृद्ध्यै" (ब्रा०) इति। वावाता महिष्या अभिषिक्ताया अर्वाचीना परिवृक्त्याः प्रीतिरहिताया उत्तमत्वेन स्वयं मध्यमा राज्ञः स्त्री। अत एवाश्वमेधप्रकरणे अश्वमलङ्कुर्वन्त्यो राजस्त्रिय उत्तममध्यमाधमाद्यक्रमेण एतैरेव नामभिर्निर्दिष्टाः। भूरिति महिषी, भुव इति वावाता, सुवरिति परिवृक्तीति। भगमेव सौभाग्यमेव। विचित्तगर्भा विशेषेण चित्तो ज्ञातोऽभिव्यक्तो गर्भो यस्या इति विग्रहः। पष्ठौही बालगर्भिणी। निर्ऋतिं प्रशंसति "नैर्ऋतं चरुं परिवृक्त्यै गृहे कृष्णानां व्रीहीणां नखनिर्भिन्नं। पाप्मानमेव निर्ऋतिं निरवदयते। कृष्णा

कूटा दक्षिणा समृद्ध्यै" (ब्रा०) इति। पाप्मनो निर्ऋतिशरीरत्वात्तां प्रति प्रशंसैवैषा। अग्निं गृहस्वामिनञ्च प्रशंसति "आग्नेयमष्टाकपालꣳ सेनान्यो गृहे। सेनामेवास्य सꣳश्यति। हिरण्यं दक्षिणा समृद्ध्यै" (ब्रा०) इति। वरुणं प्रशंसति "वारुणं दशकपालꣳ सूतस्य गृहे। वरुणसवमेवावरुन्धे। महानिरष्टो दक्षिणा समृद्ध्यै" (ब्रा०) इति। वरुणसवो वरुणानुज्ञा। मरुतः प्रशंसति "मारुतꣳ सप्तकपालं ग्रामण्यो गृहे। अन्नं वै मरुतः। अन्नमेवावरुन्धे। पृश्निर्दक्षिणा समृद्ध्यै" (ब्रा०) इति। मरुतां वैश्यत्वेनान्नसम्पादकत्वादन्नत्वं। सवितारं प्रशंसति "सावित्रं द्वादशकपालं क्षत्तुर्गृहे प्रसूत्यै। उपध्वस्तो दक्षिणा समृद्ध्यै" (ब्रा०) इति। अश्विनौ प्रशंसति "आश्विनं द्विकपालꣳ सङ्ग्रहीतुर्गृहे। अश्विनौ वै देवानां भिषजौ। ताभ्यामेवास्मै भेषजं करोति। सवात्यौ दक्षिणा समृद्ध्यै" (ब्रा०) इति। पूषणं प्रशंसति "पौष्णं चरुं भागदुघस्य गृहे। अन्नं वै पूषा। अन्नमेवावरुन्धे। श्यामो दक्षिणा समृद्ध्यै" (ब्रा०) इति। यथा मरुतां वैश्यत्वेनान्नसम्पादकत्वात् अन्नत्वं तथा पूष्णोऽन्नपोषकत्वादन्नत्वं। रुद्रं प्रशंसति "रौद्रं गावीधुकं चरुमक्षावापस्य गृहे। अन्तत एव रुद्रं निरवदयते। शबल उद्वारो दक्षिणा समृद्ध्यै" (ब्रा०) इति। भागप्रदानपूर्वकत्वेन रुद्रस्य पुरतो निःसारणमपि प्रशंसैव। पाठेनावगतां हविःसङ्ख्यां प्रशंसति "द्वादशैतानि हवीꣳषि भवन्ति। द्वादश मासाः संवत्सरः। संवत्सरेणैवास्मै राष्ट्रमवरुन्धे। राष्ट्रमेव भवति" (ब्रा०) इति।

विहितेभ्यो द्वादशहविर्भ्य ऊर्द्ध्वं स्वगृहे हविर्द्वयं विधत्ते "इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रतिनिर्वपतीन्द्रायाꣳहोमुचे" इति। प्रति प्रातिस्विके गृहे। सुत्राम्णे सुष्ठु पालयित्रे। अंहोमुचे पापान्मोचकाय, पुरोडाशमेकादशकपालमित्यनुवर्तते। तमिमं प्रतिनिर्वापं प्रशंसति "यन्न प्रतिनिर्वपेत्। रत्निन आशिषोऽवरुन्धीरन्। प्रतिनिर्वपति। इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं। इन्द्रायाꣳहोमुचे। आशिष एवावरुन्धे" (ब्रा०) इति। रत्निनो ब्राह्मणराजन्यादयः आशिषः तद्विहितफलान्यवरुन्धीरन् गृह्णीयुः। एतेषां हविषां समीप एको मन्त्र आम्नातः, तस्य विनियोगमापस्तम्ब आह "अयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यात्" इति पुरस्तात् स्विष्टकृतो ऽध्वर्युर्जपति। अयं राजा राजसूयस्य कर्ता अस्माकं राजा योऽस्त्यसौ शत्रुवधक्षमो राजा भूत्वा शत्रुं वध्यात्। वध्यादित्येतस्य पदस्याशिरर्थत्वं द्योतयति "अयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यादित्याह। आशिषमेवैतामाशास्ते"(ब्रा०) इति। यदुक्तमापस्तम्बेन 'श्वो भूतेऽभिषेचनीयस्योक्थ्यस्य दीक्षां प्रक्रमयति मैत्राबार्हस्पत्या दीक्षणीया', इति। तामिमामभिषेचनीयनामकस्य सोमयागस्याङ्गभूतां दीक्षणीयां चोदकप्राप्तेष्टिबाधनाय विधत्ते "मैत्राबार्हस्पत्यं भवति श्वेतायै श्वेतवत्सायै दुग्धे स्वयम्मूर्ते स्वयमथित आज्य आश्वत्थे पात्रे चतुःस्रक्तौ स्वयमवपन्नायै शाखायै कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्विचिनुयाद्ये कर्णाः स पयसि बार्हस्पत्यो येऽकर्णाः स आज्ये

मैत्रः स्वयङ्कृता वेदिर्भवति स्वयन्दिनं बर्हिः स्वयङ्कृत इध्मः सैव श्वेता श्वेतवत्सा दक्षिणा" इति। मैत्राबार्हस्पत्यं हविरिति शेषः। तत्र दुग्धे बार्हस्पत्यश्चरुः, आज्ये मैत्रश्चरुः। कीदृश आज्ये। स्वयम्मूर्ते स्वयम्मथिते। तदिदमापस्तम्बेन स्पष्टीकृतं 'श्वेतां श्वेतवत्सां गामाश्वस्य दृतौ दुहन्ति तत्स्वयम्मूर्तं संयोगेन परिवहति तत्स्वयम्मथितं आतपे विषजन्ति तत्स्वयं विलीनमाज्यं भवति'। आम्रेण फलपुष्परसेन लेपितायां दृतौ यत् पयः आतञ्चनमन्तरेणैव मूर्तं दधि भवति, तच्च बदरादिफलसंयोगेन परिवहति तक्रवत् परितः चरति, तदिदं स्वयम्मथितं। नात्र मृद्भाण्डे पाकः, किन्त्वाश्वत्थे पात्रे चतुःस्रक्तौ न तु वर्तुले। तच्च पात्रं यया कयाचिच्छिन्नशाखया न कर्तव्यं किन्तु वाय्वाद्यभिघातेन स्वयमेव पतितया निष्पादनीयं। कणाः खण्डिततण्डुलाः, अकणा अखण्डिताः। तत्र खण्डितैः पयसि बृहस्पतेश्चरुर्निष्पादनीयः, अखण्डितैस्तु मित्रस्याज्ये चरुः। स्वयङ्कृता शास्त्रीयोद्धननादिरहिता, स्वयन्दिनं समन्त्रकशास्त्रीयच्छेदनमन्तरेणैव खण्डितं। स्वयङ्कृत इध्म अत्रापि शास्त्रीयसम्पादनमन्तरेणैव निष्पन्नः। तमिमं विधिमनूद्य द्वयोर्हविःपात्रयोः संसर्गं विधत्ते "मैत्राबार्हस्पत्यं भवति। श्वेतायै श्वेतवत्सायै दुग्धे। बार्हस्पत्ये मैत्रमपि दधाति। ब्रह्म चैवास्मै क्षत्रञ्च समीची दधाति। अथो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति" (ब्रा०) इति। बार्हस्पत्ये चरुपात्रेऽग्नावधिश्रिते तस्योपरि मैत्रं चरुपात्रमपि दध्यात् तथा सति बृहस्पति-

रूपा ब्राह्मणजातिः मित्ररूपा क्षत्रियजातिश्चेति उभयमस्मै सम्यक् सम्पादितं भवति। किञ्चाधारभूते ब्राह्मण एव क्षत्रियजातिमाधेयत्वेन प्रतिष्ठापितवान् भवति। पाठक्रमेण पश्चात्प्राप्तं बार्हस्पत्यप्रचारमपवदितुं विधत्ते "बार्हस्पत्येन पूर्वेण प्रचरति। मुखत एवास्मै ब्रह्म सꣳश्यति। अथो ब्रह्मन्नेव क्षत्रमन्वारम्भयति" (ब्रा०) इति। स्वयंशब्दानामभिप्रायमाह "स्वयङ्कृता वेदिर्भवति। स्वयन्दिनं बर्हिः। स्वयङ्कृत इध्मः। अनभिजितस्याभिजित्यै। तस्माद्राज्ञामरण्यमभिजितं" (ब्रा०) इति। यद्देशजातं युद्धप्रयासेन पूर्वमनभिजितं तस्याप्यभिजयः स्वयङ्कृतादिना भवति यस्मादेवं तस्माल्लोकेऽपि राज्ञामरण्यं युद्धप्रयासमन्तरेणैवाभिजितं दृश्यते। दक्षिणां प्रशंसति "सैव श्वेता श्वेतवत्सा दक्षिणा समृद्ध्यै" (ब्रा०) इति।

अत्र विनियोगसङ्ग्रहः।

"पुरा स्विष्टकृतोऽध्वर्युरयं न इति संजपेत्"।

अथ मीमांसा। दशमाध्यायस्य प्रथमपादे चिन्तितं।

"वेदिः स्वयङ्कृतेत्यादौ प्रकृतं सर्वमाचरेत्।
लुप्तार्थं बाध्यतां वाद्यश्चोदकप्रापितत्वतः॥
अपेक्षासक्तियोग्यत्वहानेरुद्धननादिकं।
बाध्यतेऽपेक्षितं सर्वं चोदकेनातिदिश्यते"॥

रत्निनामेतानि हवींषीति वाक्येन राजसूये रत्निनामकानां देवानां सम्बन्धीनि कानिचिद्धवींषि दर्शपूर्णमासेष्टि-

विकृतिरूपाणि विहितानि, ऊर्द्धं मैत्राबार्हस्पत्ये हविषि श्रूयते 'स्वयङ्कृता वेदिर्भवति स्वयन्दिनं बर्हिः स्वयङ्कृत इध्मः' इति। इष्टौ उद्धननखननपरिलेखनादिभिः क्रियाविशेषैः वेदिर्निष्पाद्यते। स्फ्येनोत्तमां त्वचमुद्धन्ति देवस्य सवितुः सव इति खनति स्फ्येन वेदिं परिगृह्णातीति तद्विधानात्। यज्ञस्य घोषदसीत्यस्मिन्ननुवाके प्रोक्तैर्मन्त्रैः दात्रच्छिन्नं बर्हिः सम्पाद्यते। त्रीन् परिधीनित्यादिमन्त्रोपेताभिः क्रियाभिरिध्मः सिध्यति। विकृतिरूपे तु हविषि उद्धननाद्यपेक्षां वारयितुं स्वयमित्युक्तं। यथास्थित एव तु प्रदेशो वेदित्वेन स्वीकर्तव्यः। इध्माबर्हिषी अपि स्वत एव छिन्ने शास्त्रीयछेदननिरपेक्षे ग्रहीतव्ये इत्यर्थः। तत्र संशयः। लुप्तार्थमलुप्तार्थञ्च सर्वमङ्गजातं विकृतावनुष्ठेयं, उत लुप्तार्थं वर्जनीयमिति। चोदकस्य साधारणत्वात् सर्वमनुष्ठेयमित्याद्यपक्षे प्राप्ते सिद्धान्तं ब्रूमः। अङ्गी हि अङ्गैरुपकृतः फलं साधयति। तथा सत्यङ्गिनोऽङ्गकृते उपकारे साक्षादपेक्षा, उपकारद्वारा त्वङ्गेषु, प्रत्यासन्नस्याङ्गिनं प्रत्यङ्गेभ्य उपकारः। योग्यतापि साक्षादपेक्षां पूरयितुमुपकारस्यैवास्ति न त्वङ्गानां। वेदिनिष्पादनलक्षणदृष्टोपकारयुक्तानि प्रकृतावुद्धननाद्यङ्गानि। विकृतौ तु वेद्याः स्वतःसिद्धत्वेन निष्पादनोपकारो लुप्यते। उपकारद्वारोपकारकाणामाकाङ्क्षासन्निधियोग्यत्वान्युद्धननाद्यङ्गेषु हीयन्ते। तस्मादुद्धननादीनि नानुष्ठेयानि। सोऽयं चोदकप्रापितस्योद्धननाद्यनुष्ठेयत्वप्रत्ययस्य भ्रान्तित्वनिश्चयो बाध उच्यते। चोदकस्य

त्वत्पुष्टोपकारैः उपकारद्वारेण आकाङ्क्षासन्निधियोग्यतायुक्तै-र्हविरासादनाद्यङ्गैश्चरितार्थता सम्पद्यते ॥ ० ॥

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथम-काण्डेऽष्टमप्रपाठके नवमोऽनुवाकः ॥ * ॥

अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाꣳ सोमाय वनस्पतये श्यामाकं चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपाल-माशूनां व्रीहीणाꣳ रुद्राय पशुपतये गावीधुकं चरुं बृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणां मित्राय स-त्यायाम्बानां चरुं वरुणाय धर्मपतये यवमयं चरुꣳ सविता त्वा प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनां ॥ १ ॥

बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां व-रुणो धर्मपतीनां ये देवा देवसुवः स्थ त इममामुष्याय-णमनमित्राय सुवध्वं महते क्षत्राय महत आधिप-त्याय महते जानराज्यायैष वो भरता राजा सोमो

ऽस्माकं ब्राह्मणानाꣳ राजा प्रति त्यन्नाम राज्यमधायि स्वां तनुवं वरुणो अशिश्रेच्छुचेर्मित्रस्य व्रत्या अभूमामन्महि महत ऋतस्य नाम सर्वे व्राता वरुणस्याभूवन्वि मित्र एवैररातिमतारीदसूषुदन्त यज्ञिया ऋतेन व्यु त्रितो जरिमाणं न आनड्विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि ॥ २ ॥

पशूनां व्राताः पञ्चविꣳशतिश्च ॥ १० ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके दशमोऽनुवाकः ॥ * ॥

नवमे रत्निनां हवींष्यभिषेचनीयस्य दीक्षणीया चेत्येतावदुक्तं। दशमे देवसुवां हवींष्युच्यन्ते। तानि चाभिषेचनीयगतस्याग्नीषोमीयपशुपुरोडाशस्यानुनिर्वाप्यानि। तथा च बोधायनः* 'सह सोमौ क्रीणाति अभिषेचनीयाय दशपेयाय च सह परिवहत्यर्धं राज्ञः पुरोहितस्य गृहे दशपेयार्थं निदधात्यग्नीषोमीयस्य पशुपुरोडाशमष्टौ देवसुवां हवींष्यनुनिर्वपति समानं तु स्विष्टकृदिडं' इति। तान्येतानि हवींषि विधत्ते "अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाꣳ सोमाय वनस्पतये श्यामाकं चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाꣳ रुद्राय

* आपस्तम्ब इति तै० ।

पशुपतये गावीधुकं चरुं बृहस्पतये वाचस्पतये नैवारं चरु-मिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणां मि-त्राय सत्यायाम्बानां चरुं वरुणाय धर्मपतये यवमयं चरुं" इति। गृहपत्यादीन्यग्न्यादिदेवताविशेषणानि। सत्यप्रसवाय अमोघाभ्यनुज्ञानाय। षष्टिभिरेव दिनैः पच्यमाना आशुव्री-हयः। स्थूलबीजं महाव्रीहयः। आम्बाः धान्यविशेषाः। तेष्वेतेषु विधिषु श्रूयमाणा देवताः प्रशंसति "देवसुवामेतानि हवीꣳ-षि भवन्ति। एतावन्तो वै देवानाꣳ सवाः। त एवास्मै सवान् प्रयच्छन्ति। त एनꣳ सुवन्ते। अग्निरेवैनं गृहपतीनाꣳ सुवते। सोमो वनस्पतीनां। रुद्रः पशूनां। बृहस्पतिर्वाचां। इन्द्रो ज्येष्ठानां। मित्रः सत्यानां। वरुणो धर्मपतीनां। एत-देव सर्वं भवति" (ब्रा०१का०।७प्र०।४अ०) इति। यान्यग्नये गृहपतय इत्यादिभिरुत्पत्तिविधिभिर्विहितान्यष्टौ हवींषि ता-न्येतानि देवसुवां सम्बन्धीनि। भाविनीसञ्ज्ञया यजमानो देवः, तं सुवन्ते अनुजानन्ति इत्यग्न्यादयो देवसुवाः। यावन्तो विधि-वाक्येषु अग्न्यादयः श्रूयन्ते, एतावन्त एव देवानां मध्ये सवा अभ्यनुज्ञातारः। अतस्त एवाग्न्यादयोऽस्मै यजमानाय सवान् स्वोचितान् ऐश्वर्यविशेषान् प्रयच्छन्ति। तेऽग्न्यादय एनं यज-मानं सुवन्ते ईश्वरो यथा भवति तथाभ्यनुजानन्ति। तत्रा-ग्निरेवैनं यजमानमन्येषां गृहपतीनामीश्वरमनुजानाति। एव-मन्यत्रापि ईश्वरं सुवत इति योज्यं। सोमो वनस्पतीनां रुद्रः पशूनामित्यनयोर्मध्ये सविता सत्यप्रसवानामित्यध्याहर्तव्यं।

स्वभूत्वान् प्रत्यैश्वर्यार्थममोघा या अभ्यनुज्ञाः तासामीश्वरं क-रोतीत्यर्थः। गृहपत्यादीन् धर्मपत्यन्तान् प्रति यत्स्वामित्व-मेतदेव लोकेऽपेक्षितं सर्वमैश्वर्यं। उक्तानां हविर्विधीनां स-न्निधौ सवितेत्यादयो मन्त्रा आम्नाताः। तत्र कल्पः। पुरस्ता-त्स्विष्टकृतः सविता त्वा प्रसवानाꣳ सुवतामिति ब्रह्मा यज-मानस्य हस्तं गृह्णातीति। पाठस्तु "सविता त्वा प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनां बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां वरुणो धर्म-पतीनां ये देवा देवसुवः स्थ त इममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानरा-ज्याय" इति। सविता हविर्विधौ तृतीयो देवः सोऽत्र प्रा-धान्यात् प्रथमं निर्दिश्यते। यजमानस्य स्वभूत्येषु ऐश्वर्यार्थ-मनुज्ञाः प्रसवाः। हे यजमान त्वां सविता तेषां प्रसवानां स्वामित्वेन सुवतामभ्यनुजानातु। एवमुत्तरत्र त्वां सुवतामिति पदद्वयानुषङ्गेन योजनीयं। हे देवा अग्न्यादयो ये यूयं देव-सुवो यजमानप्रेरकाः स्थ ते यूयमिमं यजमानमामुष्यायणं अमुष्य देवदत्तस्य पुत्रं अमुष्य यज्ञदत्तस्य पौत्रं चानमित्राय शत्रुराहित्यार्थं सुवध्वं अभ्यनुजानीध्वं। किञ्च महते क्ष-त्रायानुत्तमक्षत्रियकुलाय, महत आधिपत्याय अप्रतिहत-नियमनसामर्थ्याय, महते जानराज्याय जनसम्बन्धि यद्राज्यं तच्च सागरपर्यन्तभूमिविषयत्वान्महत्, सार्वभौमत्वाय सुव-तामित्यर्थः। विधत्ते "सविता त्वा प्रसवानाꣳ सुवतामिति

हस्तं गृह्णाति प्रसूत्यै" (ब्रा०) इति। मन्त्रगतयोर्मध्यमोत्तमभागयोः स्पष्टार्थतामाशिःपरताञ्च दर्शयति "ये देवा देवसुवः स्थेत्याह। यथायजुरेवैतत्। महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्याह। आशिषमेवैतामाशास्ते" (ब्रा०) इति। कल्पः। अथैनं रत्निभ्य आवेदयति "एष वो भरता राजा" इति। हे भरता राजन्यवैश्यादयो धनिका एष यजमानो युष्माकं राजा, एनं स्वामिनं यथोचितं सेवध्वमित्यभिप्रायः। कल्पः "सोमोऽस्माकं ब्राह्मणानाꣳ राजा" इति ब्रह्मा जपति। सोम उत्तमदेवो राजा न त्वधमो यः क्षत्रिय इत्यर्थः। भरतानामिव ब्राह्मणानामप्ययमेव राजेति प्राप्तिं वारयितुं व्याचष्टे "एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेत्याह। तस्मात् सोमराजानो ब्राह्मणाः" (ब्रा०) इति। यस्मान्मन्त्रेण ब्रह्मा स्वकीयं राजानं विभज्य निर्दिष्टवान् तस्माल्लोकेऽपि अग्निष्टोमादियागेषु सोममेव राजशब्दोपहितैः सोमराजन्नेश्वरो राइत्यादिभिर्मन्त्रैरुपचरन्ति। कल्पः। प्रति त्यन्नाम राज्यमधायीति वारुणीभ्यां यजमानो मुखं विमृष्ट इति। पाठस्तु "प्रति त्यन्नाम राज्यमधायि स्वां तनुवं वरुणो अशिश्रेच्छुचेर्मित्रस्य व्रत्या अभूमामन्महि महत ऋतस्य नाम सर्वे व्राता वरुणस्याभूवन्वि मित्र एवैररातिमतारीदसूषुदन्त यज्ञिया ऋतेन व्यु त्रितो जरिमाणं न आनट्" इति। ऋतस्य नामेत्यन्त आद्यो मन्त्रः। सर्वे व्राता इत्यादिर्द्वितीयः। त्यद्राज्यं महत इत्यादि जानराज्यायेत्यन्तं यत्पूर्वमभिहितं

तद् राज्यं नाम नमनीयं यजमानस्य यथा वश्यं भवति तथा प्रत्यधायि वरुणेन प्रतिस्थापितं। स च वरुणः स्वां तनुवमशिश्रेत् आश्रितवान्, वरुणो धर्मपतीनामिति मन्त्रेऽभिधानात् धर्मपतीन् पुरुषान् प्रति यजमानस्य स्वामित्वमभ्यनुजानन्ती वरुणस्य स्वकीया तनूः। वरुणशब्देनाग्न्यादयोऽप्युपलक्ष्यन्ते, अत एवाग्न्यादिदेवास्तत्तदनुज्ञार्थी स्वस्वतनुमाश्रितवन्त इति द्रष्टव्यं। वयमपि शुचेर्मित्रस्यानुज्ञया व्रत्याः कर्मयोग्या अभूम, मित्रः सत्यानामिति मन्त्रेऽभिहितत्वात्। मित्रशब्देनाग्न्यादयोऽप्युपलक्ष्यन्ते, अत एवाग्न्यादिदेवैरनुज्ञाता वयं महत ऋतस्य प्रौढस्य यज्ञस्य नामामन्महि राजसूयं कर्म कुर्म इति नामधेयं सर्वदा मन्यामहे। किञ्च। ऋत्विजः सर्वे वरुणस्यानुज्ञया व्राताः कर्मयोग्या अभूवन्। मित्रः एवैरस्मान् प्रति रक्षकत्वेनागमनैररातिं वैरिणं विशेषेणातारीत् वयं यथा वैरिणमतिलङ्घयामस्तथाकरोत्। यज्ञिया ऋत्विजः ऋतेन यज्ञेनासूषुदन्त रचितवन्तः, त्रिभिर्ब्राह्मणादिभिर्वर्णैर्यागेषु विस्तार्यत इति त्रितोऽग्निः स नोऽस्माकं जरिमाणं जरया शैथिल्यं व्यु विशेषेणोद्धृत्य* आनट् आयुष्यं व्यापितवान् भवति दीर्घायुष्यं कृतवानित्यर्थः। तदिदं मन्त्रद्वयं पादशो व्याचष्टे "प्रति त्यन्नाम राज्यमधायीत्याह। राज्यमेवास्मिन् प्रतिदधाति। स्वां तनुवं वरुणो अशिश्रेदित्याह। वरुणसवमेवावरुन्धे। शुचेर्मित्रस्य व्रत्या अभूमेत्याह।

---

* वीति। उ। इति पदपाठः।

शुचिमेवैनं व्रत्यं करोति। अमन्महि महत ऋतस्य नामेत्याह। मनुत एवैनं। सर्वे व्राता वरुणस्याभूवन्नित्याह। सर्वव्रातमेवैनं करोति। वि मित्र एवैररातिमतारीदित्याह। अरातिमेवैनं तारयति। असूषुदन्त यज्ञिया ऋतेनेत्याह। स्वदयत्येवैनं। व्यु त्रितो जरिमाणं न आनडित्याह। आयुरेवास्मिन् दधाति" (ब्रा०) इति। वरुणसवं वरुणस्यानुज्ञां, एनं राजसूयं, मनुत एव पुनः पुनः कर्तुमिच्छत्येव। सर्वेऽध्वर्युप्रभृतयः व्राताः व्रतयोग्या यस्य यजमानस्यासौ सर्वव्रातः। एनं यजमानमरातिं तारयति वैर्यतिक्रमक्षमं कारयत्येव। एनं यज्ञं स्वदयत्येव स्वादूकरोत्यविघ्नेन पालयतीत्यर्थः। मुखमार्जनं विधत्ते "द्वाभ्यां विमृष्टे। द्विपाद्यजमानः प्रतिष्ठित्यै" (ब्रा०) इति। पुरोऽनिर्वाप्यस्यानुनिर्वाप्यैः सहैव स्विष्टकृदवदानं विधत्ते "अग्नीषोमीयस्य चैकादशकपालस्य देवसुवाञ्च हविषामग्नये स्विष्टकृते समवद्यति। देवताभिरेवैनमुभयतः परिगृह्णाति" (ब्रा०) इति। एकत्राग्नीषोमौ देवता इतरत्राष्टावग्न्यादिदेवताः, एवमुभयतो देवताभिर्यज्ञस्य परिग्रहः। कल्पः। विष्णोः क्रमोऽसीति त्रीन्विष्णुक्रमान् प्राचः क्रामतीति। पाठस्तु "विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि" इति। वाजपेये रथसमीपगमने व्याख्यातं। विधत्ते "विष्णुक्रमान् क्रमते। विष्णुरेव भूत्वेमाँल्लोकानभिजयति" (ब्रा०) इति।

अत्र विनियोगसङ्ग्रहः।

"सवितेति स्वामिहस्तं ब्रह्मा गृह्णीत एष वः।

रत्निभ्यः स्वामिनं ब्रूयात् सोमेति ब्रह्मणो जपः॥
प्रति द्वाभ्यां मुखं स्वामी मार्ष्टि विष्णोस्त्रिभिः क्रमः।
दशमे अनुवाकेऽस्मिन्नष्टौ मन्त्रा उदीरिताः" इति॥

अथ मीमांसा। एकादशाध्यायस्य तृतीयपादे चिन्तितं।

"नानाबीजेषु यागेषु वाग्विसर्गस्य पूर्ववत्।
शङ्किते तद्विधौ तस्यावधित्वेन तु उत्तरं"॥

राजसूये नानाविधबीजयुक्ता यागाः श्रुताः। अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाꣳ सोमाय वनस्पतये श्यामाकं चरुमित्यादिना। प्रकृतौ प्रणीताप्रणयनकाले नियमिताया वाचो हविष्कृत आह्वानकाले विसर्गः श्रुतः, स चात्र चोदकप्राप्तः। तत्र प्रथमे चरमे वा हविष्कृदाह्वानकाले वाग्विसर्गो विकल्पित इति प्राप्ते पूर्वपक्षे चरम एवेति राद्धान्तः। अत्रेयं पूर्वपक्षिणोऽधिकाशङ्का न हस्तेन कण्डूयनं विहितं, वाग्विसर्गस्तु विहित इति तत्रेदमुत्तरं, विहितस्य वाङ्नियमनस्यावधित्वेनायं हविष्कृदाह्वानकालीनो वाग्विसर्गोऽनूद्यते रागप्राप्तत्वान्नासौ विधीयत इति तस्मात्कासनवद्विसर्गोऽपि चरम एव काले नियम्यते।

तत्रैव चतुर्थपादे चिन्तितं।

"नानाबीजेषु तन्मन्त्रः सकृद्भूयोऽपि वा सकृत्।
चिकीर्षैक्यात्प्रयोगाणां भिन्नत्वान्न सकृद्भवेत्"॥

राजसूये नानाबीजयागेषु सोऽवघातमन्त्रः सकृदेव प्रयोक्तव्यः। कुतः, सर्वावघातविषयायामेकस्यां चिकीर्षायां प्रकृत-

त्वादिति प्राप्ते ब्रूमः। समन्त्रोऽवघातः चोदकातिदेशेन प्राप्तो वीजेषु प्रयुज्यते। तण्डुलनिष्पत्तौ स कृतार्थः सम्पन्नः। पुनर्वीजान्तरे तण्डुलनिष्पत्तये समयस्यावघातस्य प्रयोक्तव्यत्वादमन्त्रमन्त्रपाठोऽवघातप्रसङ्गात् प्रथमे प्रपाठके उदाहृतोऽप्यत्र मन्त्रविषयलाभादनुस्मारितः ॥ ० ॥

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठके दशमोऽनुवाकः ॥ * ॥

अर्थेतस्थापां पतिरसि वृषास्यूर्मिर्वृषसेनोऽसि व्रजक्षितस्थ मरुतामोजस्थ सूर्यवर्चसस्थ सूर्यत्वचसस्थ मान्दास्थ वाशास्थ शक्वरीस्थ विश्वभृतस्थ जनभृतस्थाग्नेस्तेजस्यास्थापामोषधीनाꣳ रसस्थापो देवीर्मधुमतीरगृह्णन्नूर्जस्वतीराजसूयाय चितानाः। याभिर्मित्रावरुणावभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः। राष्ट्रदास्थ राष्ट्रं दत्त स्वाहा राष्ट्रदास्थ राष्ट्रममुष्मै दत्त ॥ ॥ १ ॥

अत्येकादश च ॥ ११ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके एकादशोऽनुवाकः ॥ * ॥

दशमे देवसुवां हवींष्युक्तानि। एकादशेऽभिषेकार्थजलविषया मन्त्रा उच्यन्ते। कल्पः। अपां ग्रहान् गृह्णात्याग्नीध्रे वायव्यैर्गृह्यन्ते, षोडश सप्तदश वा गृह्यन्ते, तावन्त एव ग्रहा गृह्यन्ते। अर्थेतस्थेति सारस्वतीष्वप्सु जुह्वतेनैव मन्त्रेण गृह्णात्येवमुत्तरैर्येन जुहोति तेन गृह्णाति, अपां पतिरिति समुद्रियाः सैन्धवीर्वापो वान्यः पुनदः स्यात्, पुरुषे पशौ वाभ्यवेते प्रतीपमन्य ऊर्मिर्यध्यत्यन्वीपमन्यो वृषासीति यः प्रतीपं वृषसेनोऽसीति योऽन्वीपं, व्रजक्षित इति कूप्यानां, मरुतामोज इति याः प्रतीपं गच्छन्ति ह्रादुनीनां वा, *प्रहावरीस्थेति या उत्स्यन्दिला तत्रैव प्रत्यवसिच्यन्ते, परिवाहिणीस्थेति परिनदीनां, सूर्यवर्चस इत्यातपति वर्ष्याणां, सूर्यत्वचस इति यासु रूपाणि परिदृश्यन्ते, मान्दा इति स्थावराणां, वाशा इति †पुष्याणां, शक्करीस्थेति गोरुल्व्यानां, विश्वभृत इति पयसो, जनभृत इति दध्नोऽग्नेस्तेजस्या इति घृतस्यापामोषधीनाᳫं रस इति मधुनोऽपो देवीर्मधुमतीरगृह्णन्निति सर्वत्र होमे ग्रहणे वानुषजति राष्ट्रदास्थ राष्ट्रं दत्त स्वाहेति होमसंयुक्ते राष्ट्रदास्थ राष्ट्रममुष्मै दत्तेति ग्रहणसंयुक्त इति। अत्र सूत्रार्थो मन्त्रव्याख्यान एव स्पष्टीभविष्यति। प्रहावरीस्थ परिवाहिणीस्थेति मन्त्रद्वयं शाखान्तरगतं। अत्र मन्त्रपाठस्तु "अर्थेतस्थापां पतिरसि वृषास्यूर्मिर्वृषसेनोऽसि व्रजक्षितस्थ मरुतामोजस्थ सू-

---

* प्रभावरीस्थेति काशीस्थत्रयपुस्तकपाठः।

† पुष्याणामिति सम्भवपाठः।

र्यवर्चसस्थ सूर्यत्वचसस्थ मान्दास्थ वाशास्थ शक्करीस्थ विश्वभृतस्थ जनभृतस्थाग्नेस्तेजस्थास्थापामोषधीनाᳵ रसस्थापो देवीर्मधुमती-रगृह्णन्नूर्जस्वतीराजसूयाय चितानाः। याभिर्मित्रावरुणावभ्य-षिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः। राष्ट्रदास्थ राष्ट्रं दत्त स्वाहा राष्ट्रदास्थ राष्ट्रममुष्मै दत्त" इति। हे सारस्वत्य आपो यूयमर्थेतः स्थ अर्थं प्रयोजनमुद्दिश्य सरस्वत्या नद्याः सकाशात् यत्प्रदेशं यन्ति गच्छन्तीत्यर्थेतः, यूयं तथाविधाः स्थ। समुद्रं कञ्चिन्नदीं पुन्नदं वा सम्बोध्यापां पतिरसीत्युच्यते, त्वदीयं जलं गृह्णामीत्यभिप्रायः। हे प्रतीपं युध्यन्नूर्मे त्वं वृषाऽसि सेचकोऽसि। हे अन्वीपं युध्यन्नूर्मे त्वं वृषसेनोऽसि सेचनक्षमा सेना जलराशि-रूपा यस्यासौ वृषसेनः, पुरुषे पशौ वा नदीमुत्तरीतुं प्रविष्टे सति उपरिभागस्य ऊर्मिः प्रवाहस्य ऊर्म्यन्तरेण युध्यति अधोभागस्थः प्रवाहानुकूलः सहसागच्छन्नूर्म्यन्तरेण युध्यति तदुभयमत्रोक्तं। हे कूप्या आपो यूयं व्रजक्षितः स्थ व्रजे गोष्ठवत् बह्वीनां निवास-योग्ये कूपस्थाने क्षियन्ति निवसन्तीति व्रजक्षितः। हे प्रतीप-गामिन्य आपो यूयं मरुतामोजः स्थ वायूनां बलरूपा भवत आवर्तादिषु वायुना प्रतिहताः सत्यः प्रतीपं गच्छन्ति। हे आतपयुक्तवृष्टिसम्बन्धिन्य आपो यूयं सूर्यवर्चसः स्थ सूर्यवत् वर्चस्तेजो यासां ताः सूर्यवर्चसः। हे सूर्यादिप्रतिबिम्बग्राहिण्य आपो यूयं सूर्यत्वचसः स्थ सूर्यस्य त्वक् शरीरं प्रतिबिम्बरूपेण यासु तिष्ठति ताः सूर्यत्वचसः। हे स्थावरा आपो यूयं मान्दाः स्थ गत्यभावात् मन्दरूपाः स्थ। हे नीहारगता आपो

यूयं वाशाः स्थ वश्या भवत। नीहारो हि नदीप्रवाहवत् मनुष्यगतिं न प्रतिबध्नाति ततो वश्यत्वं। गोर्गर्भवेष्टन उल्बे स्थिता हे आपो यूयं शक्वरीः स्थ गर्भरक्षणे शक्ता भवत। हे क्षीरगता आपो यूयं विश्वभृतः स्थ विश्वं बिभ्रतीति विश्वभृतः क्षीरेण हि प्राणिजातं पुष्यते। हे दधिगता आपो यूयं जनभृतः स्थ पूर्ववद्व्याख्येयं। हे घृतद्रवरूपा आपो यूयं अग्नेस्तेजस्याः स्थ ज्वालारूपत्वात् घृतमग्नेस्तेजः तेन भवास्तेजस्याः। हे मधुद्रवरूपा आपो यूयं अपामोषधीनां रसः स्थ पुष्परसजन्यत्वादुभयसारत्वं प्रसिद्धं। राजसूयार्थं चिताना: चिन्तयन्तः ऋत्विजोऽपोऽगृह्णन्। कीदृशीः। देवीः दीप्यमानाः मधुमतीर्मधुराः, ऊर्जस्वतीः बलप्रदाः, ता एव पुनर्विशेष्यन्ते। याभिरद्भिः देवताः पूर्वं मित्रावरुणावभ्यषिञ्चन् पुनरपि याभिरद्भिररातीः शत्रूनतिक्रम्य इन्द्रमनयन्, तादृशीरपोऽगृह्णन्नित्यन्वयः। हे आपो यूयं राष्ट्रप्रदत्वाद्यजमानाय राष्ट्रं दत्त स्वाहा तुभ्यमिदं स्वाहुतं। हे आपो राष्ट्रप्रदत्वादमुष्मै रामयुधिष्ठिरादिवर्मणे राष्ट्रं दत्त। अर्थेत्यादिषु पञ्चदशसु मन्त्रेष्वपो देवीरित्यूगियं शेषत्वेनानुषज्यते। स्वाहाकारान्तो राष्ट्रदा इति मन्त्रो होमकाले शेषत्वेनानुषज्यते, तद्रहितस्तु ग्रहणकाले। विधत्ते "अर्थेतस्थेति जुहोति। आहुत्यैवैना निष्क्रीय गृह्णाति। अथो हविष्कृतानामेवाभिघृतानां गृह्णाति" (ब्रा०१का०।७प्र०।५अ०) इति। एताः सरस्वत्यादिनदीगता अपो निष्क्रीय निःशेषेण क्रीत्वा, किञ्चाहुत्या हविष्कृता

हवीरूपत्वं प्रापिताः भवन्ति, आज्यहोमस्याभिघाररूपत्वात्। होमादूर्द्ध्वमनेन मन्त्रेण ग्रहणं विधत्ते "वहन्तीनां गृह्णाति। एता वा अपाꣳ राष्ट्रं। राष्ट्रमेवास्मै गृह्णाति। अथो श्रियमेवैनमभिवहन्ति" (ब्रा०) इति। सरस्वत्यामन्यस्यां वा नद्यां प्रवाहरूपा वहन्त्यः तासां सकाशात् गृह्णीयात्, एता एव वहन्त्यः कुल्यारूपेण बहुविधसस्योपकारित्वादपां राष्ट्रमित्युच्यते, तद्ग्रहणेन यजमानार्थं राष्ट्रं कृतं भवति। किञ्चैनं यजमानं प्रति श्रियं वहन्ति। स्त्रीलिङ्गपुंलिङ्गस्याभिप्रायं दर्शयति "अपां पतिरसीत्याह। मिथुनमेवाकः" (ब्रा०) इति। यजमानस्य सस्याभिवृद्धये जलसम्पत्तिं प्रदर्शयति "वृषास्यूर्मिरित्याह। ऊर्मिमन्तमेवैनं करोति" (ब्रा०) इति। स्वाधीनसेनायुक्तत्वं दर्शयति "वृषसेनोऽसीत्याह। सेनामेवास्य सꣳश्यति" (ब्रा०) इति। वैश्यादिप्रजासम्पत्तिं दर्शयति "व्रजक्षितस्थेत्याह। एता वा अपां विशः। विशमेवास्मै पर्यूहति" (ब्रा०) इति। नगरस्थितवैश्यवत् कूपे सर्वदावस्थानाद्वैश्यत्वं। अन्नप्राप्तिं दर्शयति "मरुतामोजस्थेत्याह। अन्नं वै मरुतः। अन्नमेवावरुन्धे" (ब्रा०) इति। राष्ट्रस्य वैर्यनभिभवरूपं तेजो दर्शयति "सूर्यवर्चसस्थेत्याह। राष्ट्रमेव वर्चस्व्यकः" (ब्रा०) इति। सत्यानृतप्रयुक्तं स्वातन्त्र्यं दर्शयति "सूर्यत्वचसस्थेत्याह। सत्यं वा एतत्। यद्वर्षति। अनृतं यदातपति वर्षति। सत्यानृते एवावरुन्धे" (ब्रा०) इति। आतपरहिताया वृष्टेः प्रभूतत्वेन फलपर्यन्तस्थायित्वात् आतपयुक्तायास्तद्वैपरीत्यं

सर्वत्र सत्यं वक्तुमनृतं वर्जयितुं चमत्वं तयोरवरोधः। वेदनं प्रशंसति "नैनꣳ सत्यानृते उदिते हिꣳस्तः। य एवं वेद" (ब्रा०) इति। स्थिराखपु घर्षणादिकं विस्रम्भेण कर्तुं शक्यत्वात् राष्ट्रगतब्राह्मणवर्गस्य ब्रह्मवर्चसं दर्शयति "मान्दास्थेत्याह। राष्ट्रमेव ब्रह्मवर्चस्यकः" (ब्रा०) इति। नीहारे वशत्वस्य दर्शितत्वाद्राष्ट्रस्यापि वशत्वं दर्शयति "वाशास्थेत्याह। राष्ट्रमेव वश्यकः" (ब्रा०) इति। उल्वगतानामपां पशुसम्बन्धात् पशुप्राप्तिं दर्शयति "शक्करीस्थेत्याह। पशवो वै शक्करीः। पशूनेवावरुन्धे" (ब्रा०) इति। चीरस्थजलेन चीरसम्पत्तिं दर्शयति "विश्वभृतस्थेत्याह। राष्ट्रमेव पयस्यकः" (ब्रा०) इति। दध्न इन्द्रियप्रदत्वात्तज्जलेनेन्द्रियसम्पत्तिं दर्शयति "जनभृतस्थेत्याह। राष्ट्रमेवेन्द्रियाव्यकः" (ब्रा०) इति। घृतस्य तेजोरूपत्वात्तेजःसमृद्धिं दर्शयति "अग्नेस्तेजस्यास्थेत्याह। राष्ट्रमेव तेजस्यकः" (ब्रा०) इति। अबोषधिरसस्य मधुत्वान्मधुसम्पत्तिं दर्शयति "अपामोषधीनाꣳ रसस्थेत्याह। राष्ट्रमेव मधव्यमक्रः" (ब्रा०) इति। वहन्तीनां गृह्णातीति नदीमात्रप्रवाहे जलग्रहणं यदुक्तं तस्यानुकल्पत्वं द्योतयन्मुख्यकल्पं विधत्ते "सारस्वतं ग्रहं गृह्णाति। एषा वा अपां पृष्ठं। यत् सरस्वती। पृष्ठमेवैनꣳ समानानां करोति" (ब्रा०) इति। सरस्वत्याख्यान्नदीविशेषात् आनीयमानः सारस्वतः, अपां पृष्ठं पृष्ठवदुपरिवर्तिनी प्रशस्तेत्यर्थः। पृष्ठमेव करोति उत्कृष्टमेव करोतीत्यर्थः। शाखान्तरगतेनैकेन मन्त्रेण सह षोडशसङ्ख्यां

विधत्ते "षोडशभिर्गृह्णाति। षोडशकलो वै पुरुषः। यावानेव पुरुषः। तस्मिन् वीर्यं दधाति" (ब्रा०) इति। षोडशसङ्ख्याकाः कला अवयवा यस्येति षोडशकलः, एकादशेन्द्रियैः पञ्चभूतैश्चोत्पादितत्वात् शरीरस्य षोडशकलत्वं। अर्थेत इत्यादीनां षोडषमन्त्राणां होमशेषत्वं ग्रहणशेषत्वञ्च पूर्वं विहितं। अर्थेतस्थेति जुहोति वहन्तीनां गृह्णातीत्यभिधानात्तत्रोभयत्रावस्थितां षोडशसङ्ख्यां समस्य प्रशंसति "षोडशभिर्जुहोति षोडशभिर्गृह्णाति। द्वात्रिꣳशत्सम्पद्यन्ते। द्वात्रिꣳशदक्षरानुष्टुप्। वागनुष्टुप् सर्वाणि छन्दाꣳसि। वाचैवैनꣳ सर्वैभिश्छन्दोभिरभिषिञ्चति" (ब्रा०) इति। अनुष्टुप्छन्दसोऽक्षरसङ्घातगामित्वाद्वाग्रूपत्वं। अनुष्टुभो वा इमानि जायन्त इति तापनीये सर्वजगद्धेतुत्वाभिधानात् सर्वछन्दोरूपत्वं।

अत्र विनियोगसङ्ग्रहः।

"सारस्वतीजलेऽर्थेति होमः सामुद्रिके त्वपां।
वृषासीति प्रतीपोर्मावन्वीपोर्मौ पुनर्वृष॥
व्रज कूप्यासु मरुतां वायुप्रतिहतास्वथ।
सूर्यस्यातपवृष्टासु सूर्यत्रिम्बयुतासु च॥
मान्दा स्थिरासु वाशास्थ नीहारस्थासु शक्करीः।
गवोल्बस्थासु विश्वेति चीरगासु जनेति तु॥
दधिगासु घृतस्थासु त्वग्नेर्मधुगतासु तु।
अपां, अपः सर्वशेष छगेषा, राष्ट्रदा इति॥
स्वाहान्तो होमगोऽन्यस्तु ग्रहणे दश पञ्च च" इति।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठक एकादशोऽनुवाकः ॥ * ॥

देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः क्षत्रियाय वन्वाना अनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीरनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चितानाः । सधमादो द्युम्निनीरूर्ज एता अनिभृष्टा अपस्युवो वसानः । पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुः ॥ १ ॥

मातृतमास्वन्तः क्षत्रस्योल्बमसि क्षत्रस्य योनिरस्याविन्नो अग्निर्गृहपतिराविन्न इन्द्रो वृद्धश्रवा आविन्नः पूषा विश्ववेदा आविन्नौ मित्रावरुणावृतावृधावाविन्ने द्यावापृथिवी धृतव्रते आविन्ना देव्यदितिर्विश्वरूप्याविन्नोऽयमसावामुष्यायणोऽस्यां विश्यस्मिन्राष्ट्रे महते क्षत्राय महत आधिपत्याय महते जानराज्यायैष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेन्द्रस्य ॥ २ ॥

वज्रोऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यास्छत्रुबाधना स्थ पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पात हिर॑ण्यवर्णावुषसां विरोकेऽयस्थूणावुदितौ सूर्यस्यारोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिञ्च ॥ ३ ॥

शिशुरिन्द्रस्यैकचत्वारिꣳशच्च ॥ १२ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके द्वादशोऽनुवाकः ॥ ० ॥

एकादशेऽभिषेकजलमन्त्रा उक्ताः। द्वादशे तज्जलसंस्कार-मन्त्रा उच्यन्ते। कल्पः। देवीराप इति वैतसे सते ग्रहान् समवनीयेति। अप्सु जातो वृक्षविशेषो वेतसस्तेन निर्मितं द्रोण-कलशसदृशं पात्रं सतं तस्मिन् सते वायव्यैर्गृहीतास्ता अपो ऽवनयेत्। पाठस्तु "देवीरापः सं मधुमतीर्मधुमतीभिः सृज्य-ध्वं महि वर्चः क्षत्रियाय वन्वानाः" इति। हे आपो देव्यो नानापात्रेषु गृहीता यूयं क्षत्रियाय राज्ञे महि वर्चो वन्वाना महत्तेजः सम्पादयन्त्यः परस्परं संसृज्यध्वं। कीदृश्यः कीदृशीभिः सह मधुमतीर्मधुराः मधुमतीभिर्मधुराभिः सह। मन्त्रसामर्थ्येन परस्परसंसर्गः सम्पद्यत इति दर्शयति "देवीरापः सं मधु-मतीर्मधुमतीभिः सृज्यध्वमित्याह। ब्रह्मणैवैनाः सꣳसृजति" (ब्रा०१का०।७प्र०।६अ०) इति। कल्पः। अनाधृष्टाः सीदते-

त्यन्तरा होतुर्धिष्ण्यं ब्राह्मणाच्छंसिनश्च सादयित्वेति। पाठस्तु "अनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीः" इति। हे आपोऽनाधृष्टाः केनाप्यतिरस्कृता ऊर्जस्वतीः सारवत्यः सीदत तिष्ठत। किं कुर्वन्त्यः, राज्ञे महद्वर्चो दधत्यः। मन्त्रसामर्थ्येनैवासामुपवेशनमपि सम्पद्यत इत्याह "अनाधृष्टाः सीदतेत्याह। ब्रह्मणैवैनाः सादयति" (ब्रा०) इति। विधत्ते "अन्तरा होतुश्च धिष्णियं ब्राह्मणाच्छꣳसिनश्च सादयति। आग्नेयो वै होता। ऐन्द्रो ब्राह्मणाच्छꣳसी। तेजसा चैवेन्द्रियेण चोभयतो राष्ट्रं परिगृह्णाति" (ब्रा०) इति। प्र वो देवायाग्नय इत्याद्याग्नेयशस्त्रपाठाद्धोताग्नेयः, इन्द्र त्वा वृषभं वयमित्याद्यैन्द्रशस्त्रपाठात् ब्राह्मणाच्छंसिन ऐन्द्रत्वं। कल्पः। अनिभृष्टमसीति तस्मिन् शतमानं हिरण्यमवधायेति। पाठस्तु "अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि" इति। हे हिरण्य त्वं अनिभृष्टमसि यवादिवदग्निसंयोगेऽपि नितरां भृष्टं नासि न भवसि। किञ्च, वाचो बन्धुरसि हिरण्यवत्तया हि राजामात्यादीनां वाक् सर्वैराद्रियते, तपोजा असि सन्तापवतोऽग्नेर्जातोऽसि हिरण्यस्याग्निरेतस्त्वात्, तथा चाधानप्रकरणेऽग्निं प्रकृत्य श्रूयते तस्य रेतः परापतत् तद्धिरण्यमभवदिति। सोमस्य दात्रमसि सोमस्य क्रयार्थं त्वं दत्तमसि हिरण्येन क्रीणातीति श्रुतेः। कल्पः। शुक्रा वः शुक्रेणोत्पुनामीति तेनोत्पूयेति। पाठस्तु "शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चितानाः" इति। हे आपः

शुक्रा वो दीप्तिमतीः युष्मान् शुक्रेण दीप्तिमता हिरण्येनो-त्पुनामि। कीदृशीः कीदृशेन, चन्द्राश्चन्द्रेण उभयोराह्लादकत्वं प्रसिद्धं, अमृता अमृतेन स्वादुत्वादापोऽमृताः प्रियत्वाद्धिरण्य-ममृतं। पुनरपि कीदृशीः, स्वाहाकारसम्पादितहोमयुक्ताय राजसूयाय चितानाः सम्पादिताः। विधत्ते "हिरण्येनोत्पु-नाति। आहुत्यै हि पवित्राभ्यामुत्पुनन्ति व्यावृत्त्यै" (ब्रा०) इति। पात्रे स्थापितं हिरण्यं दर्भेण दीर्घसूत्रेण वा प्रग्रथ्य तत्सूत्रं हस्ताभ्यां धृत्वोत्पुनीयात्। आज्यं त्वाहुत्यर्थं पवित्रा-भ्यामेवोत्पूयते, आपस्त्वभिषेकार्था इत्याज्याद्व्यावृत्त्यर्थं हिर-ण्येनोत्पवनं। हिरण्यपरिमाणं विधत्ते "शतमानं भवति। शतायुः पुरुषः शतेन्द्रियः। आयुष्येवेन्द्रिये प्रतितिष्ठति" (ब्रा०) इति। वाजपेये यूपावरोहणप्रसङ्गे वाक्यमेतद्व्याख्यातं। मन्त्रद्वयभागानामर्थो लोकसिद्ध इति दर्शयति "अनिभृष्ट-मसीत्याह। अनिभृष्टꣳ ह्येतत्। वाचो बन्धुरित्याह। वाचो ह्येष बन्धुः। तपोजा इत्याह। तपोजा ह्येतत्। सोमस्य दात्रमसीत्याह। सोमस्य ह्येतद्दात्रं। शुक्रा वः शुक्रेणोत्पुना-मीत्याह। शुक्रा ह्यापः। शुक्रꣳ हिरण्यं। चन्द्राश्चन्द्रेणेत्याह। चन्द्रा ह्यापः। चन्द्रꣳ हिरण्यं। अमृता अमृतेनेत्याह। अमृ-ता ह्यापः। अमृतꣳ हिरण्यं। स्वाहा राजसूयायेत्याह। राजसूयाय ह्येता उत्पुनाति" (ब्रा०) इति। राजसूयाय राजसूयान्तर्गतराजाभिषेकाय। कल्पः। सधमादो द्युम्निनी-रिति चतुर्षूदपात्रेषु व्यानयति पालाश औदुम्बर आश्वत्थे

नैयग्रोधे चेति। पाठस्तु "सधमादो द्युम्निनीरूर्ज एता अनिभृष्टा अपस्युवो वसानः। पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुर्मातृतमास्वन्तः" इति। वरुणः पस्त्यासु गृहस्थानीयास्वप्सु अन्तर्मध्ये सधस्थं चक्रे ताभिरद्भिः सहस्थितिं कृतवान्। कीदृशीषु पस्त्यासु, मातृतमासु अतिशयेन मातरो मातृतमा अतिस्नेहयुक्ता मातरो हि पुत्रं पालयन्ति प्रियं, तद्वत्पालयित्र्य इत्यर्थः। कीदृशो वरुणः, अपां शिशुः मातृस्थानीयानामपां पुत्रस्थानीयः। किं कुर्वन् वसानः, एता अपो वस्त्रवदाच्छादयन्। कीदृशीरपः सधमादः स्वान्तःस्थितेन वरुणेन सहैकस्मिन् देशे स्थित्वा तं वरुणं मादयित्रीर्हर्षयित्रीः, द्युम्निनीर्दीप्तिमतीः धनवतीर्वा, ऊर्जा बलहेतुभूताः, अनिभृष्टा यवादिवत् भर्जनायोग्याः, अपस्युवः कर्माणीच्छन्तीः। विधत्ते "सधमादो द्युम्निनीरूर्ज एता इति वारुण्यर्चा गृह्णाति। वरुणसवमेवावरुन्धे" (ब्रा०) इति। वरुणसवं वरुणानुज्ञानं। ऋच एकत्वं प्रशंसति "एकया गृह्णाति। एकधैव यजमाने वीर्यं दधाति" (ब्रा०) इति। कल्पः "क्षत्रस्योल्बमसि" इति तार्प्यं यजमानः परिधत्ते "क्षत्रस्य योनिरसि" इति पाण्डरमुष्णीषं द्वितीयं श्वेतं पाण्डरमित्याचक्षत इति। तार्प्यं घृताक्तं वस्त्रं। वाजपेये व्याख्यातौ मन्त्रौ। विधत्ते "क्षत्रस्योल्बमसि क्षत्रस्य योनिरसीति तार्प्यञ्चोष्णीषञ्च प्रयच्छति सयोनित्वाय" (ब्रा०) इति। यजमानो राजत्वात् क्षत्रियः तार्प्योष्णीषयोरपि क्षत्रसम्बन्धित्वे सयोनित्वं समानजातित्वं भ-

वति। विधत्ते. "एकशतेन दर्भपुञ्जीलैः पवयति। शतायुर्वै पुरुषः शतवीर्यः। आत्मैकशतः। यावानेव पुरुषः। तस्मिन् वीर्यं दधाति" (ब्रा०) इति। बहुभिर्दर्भनाडीभिर्युक्तमेकं काण्डं दर्भपुञ्जीलं तादृशैरेकाधिकशतसङ्ख्याकैर्यजमानं शोधयेत्। शतवीर्यः शतेन्द्रियः, आत्मा यजमानजीवः शताधिकामेकत्वसङ्ख्यां पूरयति। द्रव्यत्रयभक्षणं क्रमेण विधत्ते "दध्याशयति। इन्द्रियमेवावरुन्धे। उदुम्बरमाशयति। अन्नाद्यस्यावरुद्ध्यै। शष्पाण्याशयति। सुराबलिमेवैनं करोति" (ब्रा०) इति। दध्न इन्द्रियप्रियत्वात्तेनेन्द्रियावरोधः, उदुम्बरफलस्य मधुरत्वान्मृदुत्वाच्चान्नं योग्यत्वं, शष्पाणि बालतृणानि व्रीहियवाङ्कुराणीत्यर्थः। तेषां सुराजनकत्वात् सुरात्वं सा च सुरा बलिः पूजा यस्य सोऽयं यजमानः सुराबलिः। कल्पः। आविन्नो अग्निरित्याविदो यजमानं वाचयन् बहिरुदानीयेति। आविद आवित्सञ्ज्ञकाः सप्त मन्त्राः, उदानीय आग्नीध्रीयाद्बहिर्निःसार्य। पाठस्तु "आविन्नो अग्निर्गृहपतिराविन्न इन्द्रो वृद्धश्रवा आविन्नः पूषा विश्ववेदा आविन्नौ मित्रावरुणावृतावृधावाविन्ने द्यावापृथिवी धृतव्रते आविन्ना देव्यदितिर्विश्वरूप्याविन्नोऽयमसावामुष्यायणोऽस्यां विशि अस्मिन्राष्ट्रे महते क्षत्राय महत आधिपत्याय महते जानराज्याय" इति। अग्निरिदानीं गृहपतिराविन्नोऽनेन कर्मणा गृहपतित्वं लब्धवान्। इन्द्रः प्रवृद्धकीर्तिं लब्धवान्। पूषा विश्वानं लब्धवान्। मित्रावरुणौ सत्यवचनवृद्धिं लब्धवन्तौ।

द्यावापृथिव्यौ नियमेन सर्वस्वव्यापाररूपं व्रतधारणं लब्धवन्त्यौ। अदितिर्देवमाता च सर्वदेवशरीरयुक्तत्वं लब्धवती, देवताद्रूपान् बहुपुत्रानुत्पादयतीत्यर्थः। अयं पुरतो वर्तमानो ऽसौ नरसिंहवर्मा आमुष्यायण अमुष्य राजेन्द्रवर्मणः पुत्रः पौत्रो वा तादृशो यजमानोऽस्यां प्रजायामस्मिन्राष्ट्रे महद्भ्यः चत्रत्वादिपूर्वव्याख्यातगुणेभ्यः पर्याप्तः सन्नाविन्नस्तान् गुणान् लब्धवानित्यर्थः। कल्पः "एष वो भरता राजा" इत्युक्तेति। पूर्ववदनेन मन्त्रेण यजमानं रत्निभ्यः प्रदाय "सोमोऽस्माकं ब्राह्मणानाꣳ राजा" इति ब्रह्मा जपतीत्यर्थः। विधत्ते "आविद एता भवन्ति। आविदमेवैनं गमयन्ति" (ब्रा०) इति। एता आविन्न इत्याद्या आवित्सञ्ज्ञका मन्त्रवाचो वाचनीया भवन्तीत्यर्थः। तेनैनं यजमानं आविदं गृहपतित्वादिलाभं प्रापयन्तीर्थः। आद्यमन्त्रचतुष्टयपाठं प्रशंसति "अग्निरेवैनं गार्हपत्येनावति। इन्द्र इन्द्रियेण। पूषा पशुभिः। मित्रावरुणौ प्राणापानाभ्यां" (ब्रा०) इति। गार्हपत्यं गृहपतित्वं, इन्द्रियेणावतीत्यनुवर्तते। पञ्चममन्त्रं प्रशंसति "इन्द्रो वृत्राय वज्रमुदयच्छत्। स दिवमलिखत्। सोऽर्यम्णः पन्था अभवत्। स आविन्ने द्यावापृथिवी धृतव्रते इति द्यावापृथिवी उपाधावत्। स आभ्यामेव प्रसूत इन्द्रो वृत्राय वज्रं प्राहरत्। आविन्ने द्यावापृथिवी धृतव्रते इति यदाह। आभ्यामेव प्रसूतो यजमानो वज्रं भ्रातृव्याय प्रहरति" (ब्रा०) इति। इन्द्रेणोद्यतस्य वज्रस्य तीक्ष्णतया द्युलोके रेखा सम्पन्ना, सा च सूर्यस्य

मार्गोऽभवत्। तदानीं द्यौरुत्पाटनेन क्षुब्धा यदा वज्रप्रहारायानुज्ञां दत्तवती तदा स इन्द्र अनेन मन्त्रेण द्यावापृथिव्यौ सेवित्वा ताभ्यामनुज्ञातो वृत्राय वज्रं प्राहरत्, एवं यजमानोऽप्यनेन मन्त्रेण वैरिणे वज्रं प्रहरति। षष्ठमन्त्रं प्रशंसति "आविन्ना देव्यदितिर्विश्वरूपीत्याह। इयं वै देव्यदितिर्विश्वरूपी। अस्यामेव प्रतितिष्ठति" (ब्रा०) इति। भूमिरेव काञ्चिन्मूर्तिं धृत्वा देवमाता अदितिरित्युच्यते। सप्तममन्त्रस्य पूर्वभागं प्रशंसति "आविन्नोऽयमसावामुष्यायणोऽस्यां विश्यस्मिन्राष्ट्र इत्याह। विशैवैनꣳ राष्ट्रेण समर्धयति" (ब्रा०) इति। विशा करप्रदायिन्या प्रजया राष्ट्रेण सर्वसस्ययुक्तेन भूमिविशेषेण च यजमानं समर्धयत्येव। तस्य मन्त्रस्योत्तरभागमुत्तरौ च मन्त्रौ पूर्ववद्व्याचष्टे "महते क्षत्राय महत आधिपत्याय महते जानराज्यायेत्याह। आशिषमेवैतामाशास्ते। एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानाꣳ राजेत्याह। तस्मात् सोमराजानो ब्राह्मणाः" (ब्रा०) इति। कल्पः। इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति धनुर्यजमानाय प्रयच्छतीति। पाठस्तु "इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यात्" इति। हे धनुस्त्वमिन्द्रस्य वज्रवत् प्रहारसाधनमसि अतस्त्वयायं यजमानो वैरिणं वध्यात्। विधत्ते "इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति धनुः प्रयच्छति विजित्यै" (ब्रा०) इति। कल्पः "शत्रुबाधनाः स्थ" इति त्रीन् बाणावत इति। बाणा शल्यं तद्युक्तायानित्यर्थः। त्रीनिषून् प्रयच्छतीति शेषः। हे इषवः यूयं शत्रूणां बाधका

भवथ। विधत्ते "शत्रुबाधनाश्चेतीषून्। शत्रूनेवास्य बाधन्ते" (ब्रा०) इति। प्रयच्छतीत्यनुवर्तते। कल्पः। पात मा प्रत्यञ्चमिति प्रदीयमानाननुमन्त्रयत इति। पाठस्तु "पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पात" इति। यदा वैरी पुरतः स्थित्वा वाणं मुञ्चति तदानीमयं विध्यमानो वाणस्य प्रत्यङ्मुखो भवति, पार्श्वयोः स्थित्वा वाणमोचणेऽयं तिर्यग्भवति, पृष्ठतः स्थित्वा वाणमोचणे पलायमानोऽयमन्वग्भवति। हे मदीया वाणाः प्रत्यगादिरूपं मां पात परकीयेभ्यो यथोक्तप्रकारेण मां प्रत्यागच्छद्भ्यो वाणेभ्यो रचत, युद्धकुशला हि स्वकीयैर्वाणैः परकीयानपसारयन्ति खण्डयन्ति वा। अतो मद्धस्तेऽवस्थिता हे वाणाः सर्वाभ्यो दिग्भ्यो मां पात, न केवलं परकीयवाणेभ्य एव रचणं किन्तु विश्वाभ्यः सर्वाभ्यो नाष्ट्राभ्यो नाशहेतुभ्यः शत्रुकृतपीडाभ्यो मां पात। मन्त्रस्य पूर्वभागं व्याचष्टे "पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पातेत्याह। तिस्रो वै शरव्याः। प्रतीची तिरश्च्यनूची। ताभ्य एवैनं पान्ति" (ब्रा०) इति। शरव्याः हिंसिकाः परकीयहेतयः, ताश्च पूर्वोक्तरीत्या प्रत्यगादिरूपाः। मध्यमभागं व्याचष्टे "दिग्भ्यो मा पातेत्याह। दिग्भ्य एवैनं पान्ति" (ब्रा०) इति। दूरदेशवर्तिनीषु दिक्षु स्थित्वा सन्धिविग्रहकारिमनुष्यमुखेन वैरिणो भीषयन्ति, ताभ्यो दूरदेशवर्तिनीभ्यो दिग्भ्य एनं यजमानं हस्तस्था वाणाः पान्त्येव। तृतीयभागं

व्याचष्टे "विश्वाभ्यो मा नाष्ट्राभ्यः पातेत्याह। अपरिमितादेवैनं पान्ति" (ब्रा०) इति। अपरिमितात् बहुविधात् ग्रामापहारादिरूपात् बाधात्। कल्पः। हिरण्यवर्णावित्युद्यतावभिमन्त्रयत इति। वेद्युमुद्यतौ धनुर्वाणयुक्तौ यजमानहस्तौ। पाठस्तु "हिरण्यवर्णावुषसां विरोकेऽयस्थूणावुदितौ सूर्यस्यारोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिञ्च" इति। हे वरुण शत्रुनिवारक वामहस्त, हे मित्र शत्रुमारक दक्षिणहस्त युवां गर्तमारोहतं, वेद्युमुद्यतौ धनुर्वाणयुक्तौ यजमानहस्तौ रथस्योपरिभागं गर्तमदृशमारोहतं परकीयवाणेभ्यो रक्षतं, परितश्चर्मफलकादिभिराच्छादिते सति रथस्योपरिभागो गर्तसदृशो भवति। आरोहणं कदा कर्तव्यमित्युच्यते। उषसां विरोके सूर्यस्योदितौ प्रतिदिनं यान्युषांसि सूर्योदयात् पूर्वभावीनि तेषां सम्बन्धिनि विशिष्ट आलोके प्रवर्तमाने सति यः सूर्यस्योदयः तस्मिन्नुत्पन्ने सति। कीदृशौ बाहू। हिरण्यवर्णौ सुवर्णखचितकवचप्रतिमोकेन हिरण्यवद्भासमानौ, अयस्थूणौ लोहस्तम्भवत् ,अत्यन्तदृढौ। ततो रथारोहणादूर्द्धं अदितिं अखण्डितां स्वसेनां, दितिं खण्डितां परसेनाञ्च, चक्षाथां क्रमेणानुग्रहनिग्रहदृष्ट्या समीक्षेथां। विधत्ते "हिरण्यवर्णावुषसां विरोक इति त्रिष्टुभा बाहू उद्गृह्णाति। इन्द्रियं वै वीर्यं त्रिष्टुक्। इन्द्रियमेव वीर्यमुपरिष्टादात्मन्धत्ते" (ब्रा०) इति। उद्ग्रहणमुद्यतयोरभिमन्त्रणं। बोधायनपक्षे तु यथाब्राह्मणं बाहूद्यमनार्थ एव मन्त्रः।

इन्द्रियं वीर्यं हस्तपादादिगतसामर्थ्यं, तत्सामर्थ्यप्रदत्वात् त्रिष्टुप्छन्दसस्तद्रूपत्वं।

अत्र विनियोगसङ्ग्रहः।

"देवीति वैतसे पात्रे सर्वा अपि नयेदपः।
अनेति सादयेन्मध्ये होतब्रह्माख्यधिष्ण्ययोः॥
अग्निभृष्टेति तास्वन्तः शतखर्णं विनिक्षिपेत्।
खर्णेनोत्पवनं शुक्राः पात्रेषु व्यानयेत्तथ॥
क्षत्रेति धारयेत् स्वामी तार्प्योष्णीषद्वयं क्रमात्।
स्वामिनं वाचयेदाविस्तस्य मन्त्रान् विनिर्गतौ॥
एष वः स्वामिनं दद्यात् सोमोऽस्मा ब्रह्मणो जपः।
इन्द्र दद्यात् स्वामिनोऽन्यो धनुः शत्रिति बाणकान्॥
पातेयन्मन्त्रयेत् स्वामी हिर बाहू तयोद्यतौ।
अनुवाके द्वादशेऽस्मिन् मन्त्रा विंशतिरीरिताः"॥ इति।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठके द्वादशोऽनुवाकः॥ * ॥

समिधमातिष्ठ गायत्री त्वा छन्दसामवतु *त्रिवृत्स्तोमो रथन्तरꣳ सामाग्निर्देवता ब्रह्म द्रविणमुग्रामातिष्ठ त्रिष्टुप् त्वा छन्दसामवतु पञ्चदशस्तोमो बृह-

---

* त्रिवृत्स्तोम इति का०। त्रिऽवृत्। स्तोमः। इति पदपाठः।

त्सामैन्द्रो देवता क्षत्रं द्रविणं विराजमातिष्ठ जगती त्वा छन्दसामवतु सप्तदशस्तोमो वैरूपꣳ साम मरुतो देवता विट् द्रविणमुदीचीमातिष्ठानुष्टुप् त्वा ॥ ॥ १ ॥

छन्दसामवत्वेकविꣳशस्तोमो वैराजꣳ साम मित्रावरुणौ देवता बलं द्रविणमूर्द्ध्वामातिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रिꣳशौ स्तोमौ शाक्वररैवते सामनी बृहस्पतिर्देवता वर्चो द्रविणमीदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च सम्मितश्च सभराः। शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्यश्चर्तपाश्च ॥ २ ॥

अत्यꣳहाः। अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहाꣳशाय स्वाहा भगाय स्वाहा क्षेत्रस्य पतये स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा ॥ ३ ॥

अनुष्टुप् त्वर्तपाश्वं सरीसृपेभ्यः स्वाहा ॥ १३ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके त्रयोदशोऽनुवाकः ॥ * ॥

द्वादशेऽभिषेकार्थजलसंस्कारादिमन्त्रा उक्ताः। त्रयोदशे दिग्व्यास्थापनमन्त्रा उच्यन्ते। कल्पः। अथैनं पञ्चभिर्दिशो व्यास्थापयति समिधमातिष्ठेति मनसा त्वानुप्रक्रामतीति। व्यास्थापयति विविधदिगभिमुखत्वेन विजयाय प्रस्थापयतीत्यर्थः। तत्र प्रथममन्त्रपाठस्तु "समिधमातिष्ठ गायत्री त्वा छन्दसामवतु त्रिवृत्स्तोमो रथन्तरꣳ सामाग्निर्देवता ब्रह्म द्रविणं" इति। समिध्यतेऽस्यामादित्य इति समित् प्राची दिक् तां दिशमातिष्ठ आक्रम्य तिष्ठ, तथा स्थितं त्वां छन्दसां मध्ये गायत्री रक्षतु, स्तोमानां मध्ये त्रिवृत्स्तोमो रक्षतु, साम्नां मध्ये रथन्तरं साम रक्षतु, देवानां मध्येऽग्निर्देवो रक्षतु, ब्रह्म ब्राह्मणस्त्वदीयं द्रविणं धनं रक्षतु। त्रिवृत्स्तोमस्य स्वरूपं सामब्राह्मणे समाम्नातं 'तिसृभ्यो हिङ्करोति स प्रथमया तिसृभ्यो हिङ्करोति स मध्यमया तिसृभ्यो हिङ्करोति स उत्तमयोद्यती त्रिवृतो विष्टुतिः' इति। अयमर्थः। उपास्मै गायतेत्यादीनि तृचात्मकानि त्रीणि सूक्तानि सन्ति, तेषु तिसृभ्य ऋग्भ्यः हिङ्करोति गायेत्। काभिस्तिसृभिः। प्रथमया त्रिष्वपि सूक्तेषु या प्रथमा तया स उद्गाता गायेत्, तथा सति तिसृभिः

गीतं भवति सोऽयं प्रथमः पर्यायः। द्वितीये सूक्तत्रयगतया मध्यमया गायेत्। तृतीये पर्याये सूक्तत्रयगतयोत्तमया गायेत्। अनेन प्रकारेण त्रिवृत्स्तोमसम्बन्धिनी विशिष्टा स्तुतिः सम्पद्यते, सेयं स्तुतिरुद्यतीनाम्नाभिधीयत इति। अभि त्वा शूर नोनुम इत्यस्यामृच्युत्पन्नं साम रथन्तरं। द्वितीयमन्त्रपाठस्तु "उग्रामातिष्ठ त्रिष्टुप् त्वा छन्दसामवतु पञ्चदशस्तोमो बृहत्सामेन्द्रो देवता चत्रं द्रविणं" इति। पूर्वन्यायेन योजनीयं। पापिनां शिक्षकेण यमेनाधिष्ठितत्वात् दक्षिणा दिगुग्रा। पञ्चदशस्तोम एवमाम्नातः 'पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया पञ्चभ्यो हिङ्करोति स एकया स एकया स तिसृभिः पञ्चपञ्चिनी पञ्चदशस्य विष्टुतिः' इति। पूर्वोक्तत्रिवृत्स्तोम एक एव सूक्तत्रयनिष्पाद्यः, अन्ये तु स्तोमाः एकैकेनैव तृचात्मकेन सूक्तेन निष्पाद्यन्ते। तत्रायं क्रमः। प्रथमपर्याय आवृत्तिः पञ्चभिर्ऋग्भिर्गायेत्। तद्यथा प्रथमामृचं त्रिर्गायेत्, इतरे द्वे सकृत्सकृद्गायेत्। द्वितीयपर्याये मध्यमां त्रिर्गायेत्। तृतीयपर्याय उत्तमां त्रिर्गायेत्, सेयं पञ्चदशस्तोमस्य सम्बन्धिनी विष्टुतिरिति। तस्याः पञ्चपञ्चिनीति नाम। त्वामिद्धि हवामह इत्येतस्यामृच्युत्पन्नं साम बृहत्। तृतीयमन्त्रपाठस्तु "विराजमातिष्ठ जगती त्वा छन्दसामवतु सप्तदशस्तोमो वैरूपꣳ साम मरुतो देवता विट् द्रविणं" इति। जलाधिपेन वरुणेन पालिता सती सम्यक् फलितैः सस्यैर्विशेषेण राजत

इति विराट् प्रतीची दिक्। सप्तदशस्तोम एवमाम्नातः 'पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स एकया पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स एकया सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिरिति दशसप्ता सप्तदशस्य विष्टुतिः' इति। प्रथमपर्याये प्रथमामृचं त्रिर्गायेत्। द्वितीयपर्याये मध्यमां त्रिर्गायेत्। तृतीयपर्याये मध्यमामुत्तमाञ्च त्रिर्गायेत्, सेयं सप्तदशस्तोमसम्बन्धिनी विष्टुतिर्दशसप्तेत्यभिधीयते। यद्याव इन्द्रेत्यस्यामृच्युत्पन्नं साम वैरूपं। चतुर्थमन्त्रपाठस्तु "उदीचीमातिष्ठानुष्टुप् त्वा छन्दसामवत्वेकविंशस्तोमो वैराजꣳ साम मित्रावरुणौ देवता बलं द्रविणं" इति। एकविंशस्तोम एवमाम्नातः 'सप्तभ्यो हिङ्करोति स तिसृभिः स तिसृभिः स एकया सप्तभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिः सप्तभ्यो हिङ्करोति स तिसृभिः स एकया स तिसृभिः सप्तसप्तिन्येकविंशस्य विष्टुतिः' इति। प्रथमपर्याये उत्तमां सकृद्गायेत्, द्वितीयपर्याये प्रथमां, तृतीयपर्याये मध्यमां सकृद्गायेत्, सेयमेकविंशस्तोमसम्बन्धिनी विष्टुतिरिति सप्तसप्तिनीत्यभिधीयत इत्यर्थः। पिबा सोममिन्द्र मन्दतु त्वेत्यस्यामृच्युत्पन्नं साम वैराजं। पञ्चममन्त्रपाठस्तु "ऊर्द्ध्वामातिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रिꣳशौ स्तोमौ शाक्वररैवते सामनी बृहस्पतिर्देवता वर्चो द्रविणं" इति। त्रिणवस्तोम एवमाम्नातः 'नवभ्यो हिङ्करोति स तिसृभिः स पञ्चभिः स एकया नवभ्यो हिङ्करोति स

एकया स तिसृभिः स पञ्चभिः नवभ्यो हिङ्करोति स पञ्चभिः स एकया स तिसृभिः वज्रो वै त्रिणव' इति। प्रथमपर्याये प्रथमां त्रिर्गायेत्, मध्यमां पञ्चकृत्वो गायेत्, उत्तमां सकृद्गायेत्। द्वितीयपर्याये प्रथमां सकृद्गायेत्, मध्यमां त्रिर्गायेत्, उत्तमां पञ्चकृत्वो गायेत्। तृतीयपर्याये प्रथमां पञ्चकृत्वो गायेत्, मध्यमां सकृद्गायेत्, उत्तमां त्रिर्गायेत्, सोऽयं त्रिरावृत्तनवसङ्ख्योपेतत्वात् त्रिणवनामको वज्रसमानः। त्रयस्त्रिंशस्तोम एवमाम्नातः 'एकादशभ्यो हिङ्करोति स तिसृभिः स सप्तभिः स एकया एकादशभ्यो हिङ्करोति स एकया स तिसृभिः स सप्तभिः एकादशभ्यो हिङ्करोति स सप्तभिः स एकया स तिसृभिरन्तो वै त्रयस्त्रिꣳशः' इति। प्रथमपर्याये प्रथमां त्रिर्गायेत्, मध्यमां सप्तकृत्वः, उत्तमां सकृत्। द्वितीयपर्याये प्रथमां सकृत्, द्वितीयां त्रिस्तृतीयां सप्तकृत्वः। तृतीयपर्याये प्रथमां सप्तकृत्वः, द्वितीयां सकृत्, तृतीयां त्रिरिति। सोऽयं त्रयस्त्रिंशः स्तोमानामन्तः। यत्तु वाजपेय उज्जित्यनुवाके त्रयोदशस्तोमश्चतुर्दशस्तोम इत्यादिकमाम्नातं तत्सर्वमुन्नयस्तोमाभिप्रायेणेति द्रष्टव्यं। उन्नयनप्रकारस्तु सामसूत्रे द्रष्टव्यः। प्रो ष्वस्मै पुरोरथमित्यस्यामृच्युत्पन्नं साम शाक्वरं, रेवतीर्नः सधमाद इत्यस्यामृच्युत्पन्नं साम रैवतं। त्रिषु मन्त्रेषु ब्राह्मणक्षत्रियवैश्याः द्रव्यरक्षका उक्ताः। चतुर्थे शारीरबलस्य तद्रक्षकत्वं। पञ्चमे वर्षसः प्रख्यातशूरनामकृतस्य तेजसो धनरक्षकत्वं। विधत्ते "दिशो व्याख्यापयति। दिशाम-

भिजित्यै" (ब्रा०१का०।७प्र०।७अ०) इति। यजमानं दिक्षु प्रस्थापितवतोऽध्वर्योर्मानसमनुक्रमणं विधातुं प्रस्तौति "यदनुप्रक्रामेत्। अभि दिशो जयेत्। उन्मु माद्येत्" (ब्रा०) इति। यद्यध्वर्युर्यजमानमनु पादेन प्रक्रामेत् दिशामभिजयो भवेत् किन्तु उन्माद्येत् बुद्धिभ्रमं प्राप्नुयात्। विधत्ते "मनसानुप्रक्रामति। अभि दिशो जयति। नोन्माद्यति" (ब्रा०) इति। प्रक्रमणस्य कृतत्वात् दिग्विजयः, पादेन तदकरणात् उन्मादाभावः। समिदादीनि दिशां नामानि प्रशंसति "समिधमातिष्ठेत्याह। तेज एवावरुन्धे। उग्रामातिष्ठेत्याह। इन्द्रियमेवावरुन्धे। विराजमातिष्ठेत्याह। अन्नाद्यमेवावरुन्धे। उदीचीमातिष्ठेत्याह। पशूनेवावरुन्धे। ऊर्द्धामातिष्ठेत्याह। सुवर्गमेव लोकमभिजयति" (ब्रा०) इति। समिच्छब्दस्य दीप्तिप्रतिपादकतया तेजःप्राप्तिः। उग्रशब्द इन्द्रियबलोपेतत्वमाचष्ट इतीन्द्रियप्राप्तिः। अन्नं वै विराडिति श्रुत्यनुसारेणान्नप्राप्तिः। यर्हि पशुमाप्रीतमुदञ्चं नयन्तीति पशोरुत्तरदिक्सम्बन्धश्रवणात्पशुप्राप्तिः। स्वर्गलोकस्योर्द्धभावित्वादभिजयः। विहितं मानसमनुक्रमणं प्रशंसति "अनूज्जिहीते। सुवर्गस्य लोकस्य समष्ट्यै" (ब्रा०) इति। कल्पः। मारुतमेकविंशतिकपालं निर्वपति वैश्वदेवीमामिक्षां तस्यारण्येऽनुवाक्यहतीयैर्गणैः कपालान्युपदधाति ईदृङ् चान्यादृङ् चेत्येताभ्यां मध्येऽरण्येऽनुवाक्येनेति। पाठस्तु "ईदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च सम्मितश्च सभराः। शुक्रज्योतिश्च

चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्यश्चर्तपाश्चात्यꣳ-हाः” इति। ईदृङ्ङित्यादीनि मरुद्विशेषाणां नामधेयानि तद्रूपेण भावितत्वात्कपालानामपि तन्नाम। हे प्रथमकपाल त्वमीदृङ् चासि एतन्नामकमेवासि। एवमन्यत्रापि योज्यं। विधत्ते “मारुत एष भवति। अन्नं वै मरुतः। अन्नमेवावरुन्धे” (ब्रा०) इति। एषः पुरोडाश इत्यर्थः। तस्मिन् गुणं विधत्ते “एकविꣳशतिकपालो भवति प्रतिष्ठित्यै” (ब्रा०) इति। एक-विंशस्तोमानां प्रतिष्ठेत्युक्तत्वात् प्रतिष्ठाहेतुत्वं। कपालोप-धानमन्त्राणां शेषं पूरयितुं विधत्ते “योऽरण्येऽनुवाक्यो गणः। तं मध्यत उपदधाति। ग्राम्यैरेव पशुभिरारण्यान् पशून् परिगृह्णाति। तस्माद्ग्राम्यैः पशुभिरारण्याः पशवः परिगृही-ताः” (ब्रा०) इति। अत्राम्नातः ईदृङ् चेत्यादिः सप्तसङ्ख्या-युक्त एको गणः, शुक्रज्योतिश्चेत्यादिः सप्तसङ्ख्यायुक्तोऽपरो गणः। तयोर्गणयोर्मध्ये गणान्तरं प्रक्षेपणीयं। अरण्ये गत्वा-ध्येतव्यो योऽनुवाकः तस्मिन्ननुवाके स गण आम्नातः। तथा हि ‘धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयꣳश्च निलिम्पश्च विलिम्पश्च विक्षिपः’ इति। एतस्य गणस्य मध्यत उपधाने सत्युभयतोऽव-स्थितैर्ग्राम्यैः पशुभिः परितोऽवबध्यारण्यान् पशून् गृह्णाति। यस्मादत्रारण्यगणो मध्ये प्रक्षिप्तः तस्माल्लोकेऽप्यरण्यवासिनो हरिणादय आनीयमानाः पलायनं वारयितुं ग्रामे परि-चयवद्भिर्हरिणादिभिरुभयत एकपाशेन बध्वा परिगृहीता भवन्ति। कल्पः। अग्नये स्वाहेति षट् पार्थानि पुरस्तादभिषेकस्य

जुहोतीति। इन्द्राय स्वाहेति षट् पार्थान्युपरिष्टादभिषेकस्य जुहोतीति च। पृथिव्यै स्वाहेति षड्भूतानामवेष्टीरिति च। अद्भ्यः स्वाहेति षड्भूतानामवेष्टीरिति च। एतस्मिन्नवेष्टिविनियोगेऽप्यभिषेकात् पूर्वं षट्कमेकं तत ऊर्द्धमपरं षट्कमिति द्रष्टव्यं। पाठस्तु "अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहाऽंशाय स्वाहा भगाय स्वाहा क्षेत्रस्य पतये स्वाहा पृथिव्यै स्वाहान्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहाद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा" इति। अत्र चतुर्थ्यन्तोक्ताः सर्वे देवताविशेषा द्रष्टव्याः। तत्र पार्थानि विधातुं प्रस्तौति "पृथिर्वैन्यः। अभ्यषिच्यत। स राष्ट्रं नाभवत्। स एतानि पार्थान्यपश्यत्। तान्यजुहोत्। तैर्वै स राष्ट्रमभवत्" (ब्रा०) इति। वेनस्य पुत्रः पृथिनामा कश्चिद्राजा राजसूये पार्थहोमं विनैवाभ्यषिच्यत ततः स राष्ट्रं न प्राप्नोत्। अतः राष्ट्रप्राप्तये पार्थसञ्ज्ञकानि अग्नये स्वाहेत्यादीनि मन्त्रवाक्यानि अपश्यत् तैर्हुत्वा राष्ट्रं प्राप्नोत्। विधत्ते "यत् पार्थानि जुहोति। राष्ट्रमेव भवति" (ब्रा०) इति। भवत्येव प्राप्नोत्येव। षष्ठसप्तममन्त्रौ प्रशंसति "बार्हस्पत्यं पूर्वेषामुत्तमं भवति। ऐन्द्रमुत्तरेषां प्रथमं। ब्रह्म चैवास्मै क्षत्रञ्च समीची दधाति। अथो ब्रह्मन्नेव क्षत्रं प्रतिष्ठापयति" (ब्रा०) इति। बृहस्पतये

स्वाहेत्येतन्मन्त्रवाक्यं पूर्वेषां षण्णां मन्त्राणां चरमं। इन्द्राय स्वाहेत्येतद्वाक्यमुत्तरेषां षण्णां प्रथमं। तथा सति बृहस्पतेरिन्द्रस्य च ब्राह्मणक्षत्रियाभिमानिदेवत्वादस्मै यजमानाय तज्जातिद्वयं समीचो दधाति परस्परस्नेहयुक्तं करोतीत्यर्थः। किञ्च तयोर्मन्त्रयोः पूर्वोत्तरभावेन ब्राह्मणे क्षत्रियं प्रतिष्ठापयति ब्राह्मणानुकूलं करोतीत्यर्थः। विधत्ते "षट् पुरस्तादभिषेकस्य जुहोति। षडुपरिष्टात्। द्वादश सम्पद्यन्ते। द्वादश मासाः संवत्सरः। संवत्सरः खलु वै देवानां पूः। देवानामेव पुरं मध्यतो व्यवसर्पति। तस्य न कुतश्चनोपाव्याधो भवति" (ब्रा०) इति। वसन्ते देवैः सोमस्य पोयमानत्वात् भोगस्थानत्वेन संवत्सरो देवानां पुरमिव भवति, यथा पुरे पण्यवीथी व्यवस्थिताभ्यामुभयतो वाटिकाभ्यां युक्ता भवति तस्यां गच्छन् पुरुषः चोरैरविद्धो भवति तद्वत् पार्श्वयोः षट्कयोर्मध्ये अभिषेकाय यजमानो देवपुरमध्ये प्रविशति तस्य कुतोऽप्यन्यस्माद् बाधो न भवति। विधत्ते "भूतानामवेष्टीर्जुहोति। अत्रात्र वै मृत्युर्जायते। यत्र यत्रैव मृत्युर्जायते। तत एवैनमवयजते। तस्माद्राजसूयेनेजानः सर्वमायुरेति। सर्वे ह्यस्य मृत्यवोऽवेष्टाः। तस्माद्राजसूयेनेजानो नाभिचरितवै। प्रत्यगेनमभिचारः स्तृणुते" (ब्रा०) इति। भूतानां यक्षराक्षसपिशाचादीनां मृत्युहेतूनामवयजनस्य विनाशस्य हेतव आहुतयः, पृथिव्यै स्वाहेत्यादिद्वादशमन्त्रसाध्या आहुतयः भूतानामवेष्टयः ताः जुहुयात्, अत्रात्र सन्ध्याकाले मध्यरात्रे निर्जनदेशे उच्छिष्ट-

देशे बाल्याद्यवस्थायाञ्च भूतोपद्रवरूपो मृत्युरुत्पद्यते, अनेन तु होमेन तत एव देशात् कालात् अवस्थाविशेषाच्चैनं मृत्युमवयजते नाशयति। यस्मात् मृत्युर्नाशितः तस्माद्राजसूयेनेष्टवतो यजमानस्यापमृत्युपरिहारेण कृत्स्नायुःप्राप्तिर्भवति। यस्मादेरिभिरापादितो भूताद्युपद्रवो राजसूययाजिनं न प्राप्नोति, तस्मादयं नाभिचरितवै नाभिचरणीयः, स च परैः कृतोऽभिचारः प्रत्यक् कर्तुरेवाभिमुखो भूत्वा तमेनमभिचारकर्तारं स्तृणुते हिनस्ति।

अत्र विनियोगसङ्ग्रहः।

"दिशो व्यास्थापयेद्रूपमध्वर्युः समि पञ्चभिः।
मारुतस्य कपालानि दध्यादीदृङ् चतुर्दश॥
अग्नाभिषेकतः पूर्वं षट् पार्थान्युत्तराणि षट्।
पृथि षड्द्वयं तन्तं स्तृभूतानामवेष्टयः॥
त्रयोदशेऽनुवाकेऽस्मिंस्त्रिचत्वारिंशदीरिताः"। इति।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डेऽष्टमप्रपाठके त्रयोदशोऽनुवाकः॥ * ॥

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादमृतमसि मृत्योर्मा पाहि दिद्योन्मा पाह्यवेष्टा दन्दशूका निर्-

स्तं नमुचेः शिरः। सोमो राजा वरुणो देवा धर्मसुवश्च ये। ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तां ते ते चक्षुः सुवन्तां ते ते श्रोत्रꣳ सुवन्ताꣳ सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेः ॥ १ ॥

तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा क्षत्राणां क्षत्रपतिरस्यति दिवस्पाहि समाववृत्रन्नधरागुदीचीरहिं बुध्नियमनुसञ्चरन्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयानाः। रुद्र यत्ते क्रयी* परं नाम तस्मै हुतमसि यमेष्टमसि। प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणां ॥ २ ॥

अग्नेस्त्रैकादश च ॥ १४ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डे ऽष्टमप्रपाठके चतुर्दशोऽनुवाकः ॥ * ॥

त्रयोदशेऽनुवाके दिग्व्यास्थापनमुक्तं। चतुर्दशेऽभिषेक उच्यते। कल्पः। अग्रेण प्रशास्तुर्धिष्ण्यं खादिरीमौदुम्बरीं

* क्रयि। इति पदपाठः।

वा आमन्द्यां प्रतिष्ठाप्य सोमस्य त्विषिरसीति तस्यां शार्दूल-चर्म प्राचीनग्रीवमुत्तरलोमास्तीर्येति। पाठस्तु "सोमस्य त्वि-षिरसि तवेव मे त्विषिर्भूयात्" इति। हे शार्दूलचर्म त्वं सो-मस्य दीप्तिरसि अतस्तवेव मे दीप्तिर्भूयात्। विधत्ते "सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयादिति शार्दूलचर्मोपस्तृणाति। यैव सोमे त्विषिः। या शार्दूले। तामेवावरुन्धे" (ब्रा०१का०। ७प्र०।८अ०) इति। शार्दूलचर्मगतां दीप्तिं दृष्ट्वा सोमदीप्ति-त्वेन भावनात् उभयावरोधः। कल्पः। अमृतमसीति तस्मिन् शतमानं हिरण्यं निधायेति। तस्मिन् शार्दूलचर्मणि। पाठस्तु "अमृतमसि मृत्योर्मा पाहि" इति। हिरण्यस्यामृतत्वमस-कृत्पूर्वमुक्तं। हिरण्यस्य स्थापनं तत्प्रमाणञ्च क्रमेण विधत्ते "मृत्योर्वा एष वर्णः। यच्छार्दूलः। अमृतꣳ हिरण्यं। अमृ-तमसि मृत्योर्मा पाहीति हिरण्यमुपास्यति। अमृतमेव मृ-त्योरन्तर्धत्ते। शतमानं भवति। शतायुः पुरुषः शतेन्द्रियः। आयुष्येवेन्द्रिये प्रतितिष्ठति" (ब्रा०) इति। वर्णो देहः। कल्पः "दिद्योन्मा पाहि" इति सौवर्णेन शतमानेन शतक्षरेण शतकृष्णलेन यजमानस्य शीर्षन्नधि निधत्त इति। हे दिद्योत् द्योतनात्मक शिरस्यभिषेकजलसेचनार्थं स्थापित शतच्छिद्रयुक्त सुवर्णपात्र त्वं मां रक्ष। विधत्ते "दिद्योन्मा पाहीत्युपरिष्टा-दधि निदधाति। उभयत एवास्मै शर्म दधाति" (ब्रा०) इति। उभयतः अधस्तादुपरिष्टाच्चामृतरूपस्य सुवर्णस्य स्थितत्वात् सुखं भवति। कल्पः "अवेष्टा दन्दशूकाः" इति दक्षिणत आ-

सीसं क्लीबं सीसेन विध्यतीति। दन्दशूकाः सर्पाः, अवेष्टा विनाशिताः। विधत्ते "अवेष्टा दन्दशूका इति क्लीबꣳ सीसेन विध्यति। दन्दशूकानेवावयजते। तस्मात् क्लीबं दन्दशूका दꣳशुकाः" (ब्रा०) इति। यस्मात् सर्पत्वेन भावितं सीसं क्लीबे पातितं तस्माल्लोकेऽपि क्लीबं पुंस्त्वरहितं पलायनाद्यक्षमं बहुवल्मीकोपेतेऽरण्ये गच्छन्तं सर्पा दन्दशूका दंशुका भवन्ति दंशशीला इत्यर्थः। कल्पः। सव्येन पदा लोहितायसं निरस्यति "निरस्तं नमुचेः शिरः" इति। लोहितायसं ताम्रं पूर्वं फेनेन पातितं यन्नमुचेः शिरः तदिदं ताम्ररूपं सन्निरस्तं परित्यक्तं, एतच्च ताम्रं नापि तस्योपरि प्रक्षेप्तव्यं। अत एवापस्तम्ब आह 'तामारोहन् यजमानोऽवेष्टा दन्दशूका इति दक्षिणेन पदा सीसं षण्डकाय प्रत्यस्यति, निरस्तं नमुचेः शिर इति सव्येन लोहितायसं केशवापीय तौ बहिर्वेदि निरस्यते' इति। विधत्ते "निरस्तं नमुचेः शिर इति लोहितायसं निरस्यति। पाप्मानमेव नमुचिं निरवदयते" इति। कल्पः। ऊर्ध्वबाहुं तिष्ठन्तं माहेन्द्रस्य स्तोत्रं प्रत्यभिषिञ्चति सोमो राजेत्यभिमन्त्र्य सोमस्य त्वा द्युम्नेनाभिषिञ्चामीति पालाशेन पुरस्तादध्वर्युरेवमितरत्रौदुम्बरेण दक्षिणतो ब्रह्मा राजन्यो वाश्वत्थेन पश्चाद्वैश्यो नैयग्रोधेनोत्तरतो *जन्य इति। जन्यः सखा। अभिमन्त्रणमन्त्रपाठस्तु "सोमो राजा वरुणो देवा धर्मसुवश्च ये। ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तां

---

* अन्य इति तै०। तथा च अन्यः सखा इति।

ते ते चक्षुः सुवन्तां ते ते श्रोत्रꣳ सुवन्तां" इति। यः सोमो राजा वरुणो यो राजा ये चान्ये देवा गृहपत्यग्न्यादयो धर्मसुवो धर्ममनुजानन्तः सन्ति ते सर्वे तव वाचमनुजानन्तु। एवं प्राणादिषु योज्यं। अभिषेकमन्त्रपाठस्तु "सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेस्तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा" इति। हे यजमान त्वां सोमस्य द्युम्नेन दीप्त्याभिषिञ्चामि। एवमग्नेस्तेजसेत्यादौ योज्यं। अभिमन्त्रणमन्त्रस्य प्रयोजनं दर्शयति "प्राणा आत्मनः पूर्वेऽभिषिच्या इत्याहुः। सोमो राजा वरुणः। देवा धर्मसुवश्च ये। ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तामित्याह। प्राणानेवात्मनः पूर्वानभिषिञ्चति" (ब्रा०) इति। आत्मनो यजमानस्य प्राणा वागादयो ये सन्ति ते यजमानाभिषेकात् पूर्वमभिषिच्या इत्याहुरभिज्ञाः। युक्तो हि तेषाममूर्तानां मन्त्रपाठमात्रेणाभिषेकः, मन्त्रे हि सोमादयो देवा वागादीनभिषिक्ताननुजानन्त्वित्येवावबुध्यते तस्मात्तत्पाठ एवाभिषेकः, स च पाठः प्रथमतः कृत इत्यसौ पूर्वाभिषेकः। अभिषेकमन्त्रे प्रथमभागस्य शाखान्तरपाठं निराकृत्यात्रत्यं पाठं विधत्ते "यद्ब्रूयात्। अग्नेस्त्वा तेजसाभिषिञ्चामीति। तेजस्व्येव स्यात्। दुश्चर्मा तु भवेत्। सोमस्य त्वा द्युम्नेनाभिषिञ्चामीत्याह। सौम्यो वै देवतया पुरुषः। स्वयैवैनं देवतयाभिषिञ्चति" (ब्रा०) इति। सोमो वै रेतोधा इत्यादौ रेतोधारिणः पुरुषस्य सोमत्वनिरूपणात् पुरुषः सोमदेवत्यः, सोमदेवतयाभिषेके सति

लावण्यलाभात् दुश्चर्मत्वं न भवेत्। उक्तभागानां पाठं तत्त-न्माष्या प्रशंसति "अग्नेस्तेजसेत्याह। तेज एवास्मिन्दधाति। सूर्यस्य वर्चसेत्याह। वर्च एवास्मिन्दधाति। इन्द्रस्येन्द्रियेणे-त्याह। इन्द्रियमेवास्मिन्दधाति। मित्रावरुणयोर्वीर्येणेत्याह। वीर्यमेवास्मिन्दधाति। मरुतामोजसेत्याह। ओज एवास्मि-न्दधाति" (ब्रा०) इति। कल्पः "क्षत्राणां क्षत्रपतिरसि" इत्यभिषिच्यमानमभिमन्त्रयत इति। हे यजमान त्वं क्षत्रि-याणां पतिरसि, नात्र केषाञ्चित्पतिः किन्तु सर्वेषां क्षत्रिया-णामनेनैवाभिप्रायेण क्षत्रशब्दस्य द्विरुक्तिः। मन्त्रसामर्थ्याद-शेषक्षत्रियपतित्वसिद्धिं दर्शयति "क्षत्राणां क्षत्रपतिरसीत्याह। क्षत्राणामेवैनं क्षत्रपतिं करोति" (ब्रा०) इति। कल्पः। कृष्ण-विषाणया वासांसि विवृत एकं द्वे सर्वाणि वा एतान्युत्कर उदस्यति "अति दिवस्पाहि" इति। यान्यभिषेककाले लेप-लिप्तानि वस्त्राणि तेषामेष त्यागः। हे यजमान दिवो द्यो-तमानानन्यान् पार्थिवानतिक्रम्य त्वमेव सर्वां भूमिं पाहि। द्युशब्दस्येतरपुरुषपरत्वं दर्शयति "अति दिवस्पाहीत्याह। अ-त्यन्यान् पाहीति वावैतदाह" (ब्रा०) इति। कल्पः। समाव-वृत्रन्निति येऽभिषिच्यमानस्य लेपा व्यवस्रवन्ति तान् पात्रेण-न्मार्ष्टीति। पाठस्तु "समाववृत्रन्नधरागुदीचीरहिं बुध्नियमनु-सञ्चरन्तीस्ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयाना:" इति। या आपो लेपरूपेण स्रवन्ति अधरागधो गताः, उदीचीरूर्ध्वं गताः, समाववृत्रन् सम्यगावृत्य स्थिताः, न हीयत

इत्यहिः उत्तमाङ्गं, बुभस्य पादस्याग्रभागो बुध्नियः। शिरःप्रभृतिपादाग्रपर्यन्तमनुक्रमेण सञ्चरन्त्यस्ता आपः पर्वतस्य वृषभस्य पृष्ठे पर्वतसदृशस्य वर्षणक्षमस्य मेघस्योपरि नद्यां नाव इव चरन्ति, यद्वा नावो नौयोग्या बहुलाश्चरन्ति। कीदृश्यः स्वसिचः स्वमात्मीयं यजमानक्षेत्रं सिञ्चन्तीति स्वसिचः, इयानाः आगच्छन्त्यः बाहुल्येन सर्वत्र प्रभवन्त्य इत्यर्थः। वस्त्रनिरसनमन्त्रः पूर्वमाम्नातोऽपि सामर्थ्यात् पश्चात् प्रयोक्तव्यः। लेपोदकानामूर्द्धाधोभागयोः सम्यगावृत्य स्थित्या राष्ट्रध्रौव्यसम्पत्तिं दर्शयति "समावव्रृत्रन्नधरागुदीचीरित्याह। राष्ट्रमेवास्मिन् ध्रुवमकः" (ब्रा०) इति। कल्पः। आग्नीध्रे प्ररेकं जुहोति "रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि यमेष्टमसि स्वाहा" इति। अत्र स्वाहाकारोऽध्याहृतः। हे रुद्र यत्तव परमुत्कृष्टं नाम शर्वादिकं नमः शिवाय पशुपतय इत्यादिश्रुतिप्रसिद्धं, क्रयी जयपरान् पुरुषान् फलप्रदानेन क्रीणाति वशीकरोति क्रयि, तस्मै नाम्ने हुतमसि अभिषेकशेषभूतं पात्रस्थं जलं हुतमस्तु, तच्च यमस्येष्टमस्तु। विधत्ते "उच्छेषणेन जुहोति। उच्छेषणभागो वै रुद्रः। भागधेयेनैव रुद्रं निरवदयते" (ब्रा०) इति। यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रꣳ समर्धयतीति श्रुतत्वाद्रुद्रस्योच्छेषणभागत्वं। तत्रैव कञ्चिद्विशेषं विधत्ते "उदङ् परेत्याग्नीध्रे जुहोति। एषा वै रुद्रस्य दिक्। स्वायामेव दिशि रुद्रं निरवदयते" (ब्रा०) इति। नाम्न आहुतिप्रदानेन प्रयोजनं दर्शयति "रुद्र

यत्ते क्रयी परं नामेत्याह। यद्वा अस्य क्रयी परं नाम। तेन वा एष हिनस्ति। यꣳ हिनस्ति। तेनैवैनꣳ सह शमयति" (ब्रा०) इति। एष रुद्रस्तेनैव शर्वादिनाम्ना स्वक्रोधविषयं पुरुषं हिनस्ति, तथा सति यो वध्योऽस्ति तमेनं पुरुषं तेनैव घातकेन नाम्ना सह शमयति, आहुतिदानेन घातकं नाम शाम्यति, तदानीमेव वध्योऽपि शाम्यति वध्यत्वं निवर्तत इत्यर्थः। यमेष्टमित्यस्य पदस्य तात्पर्यं दर्शयति "तस्मै कृतमसि यमेष्टमसीत्याह। यमादेवास्य मृत्युमवयजते" (ब्रा०) इति। यमस्येष्टमिष्टौ तदनुग्रहादेव यजमानस्यापमृत्युं विनाशयति। कल्पः। अत्रैतेषामभिषेकाणां मुख्यपात्रे संस्रावान्त्समवनीय प्रतिहितस्य गृहामेत्याग्वारभ्येयोः प्रतिहिते च महिष्याश्च जुहोति प्रजापते न त्वदेतान्यन्य इति। प्रतिहितोऽस्यन्तप्रियपुत्रः तश्च महिषीश्च स्पर्शयित्वा जुहुयात्। पाठस्तु "प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव। यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳ स्याम पतयो रयीणां" इति। हे प्रजापते त्वदन्यः कोऽपि पुरुष उत्पन्नानि तान्येतानि विश्वानि न परिबभूव परिभवितुं समर्थो नाभूत् परिभवः सृष्टेरप्युपलक्षणं सृष्टिसंहारयोरशक्त इत्यर्थः। अतस्ते तव वयं यत्कामा जुहुमस्तत्फलमस्माकमस्तु वयं धनानां पतयः स्याम। विधत्ते "प्रजापते न त्वदेतान्यन्य इति तस्य गृहे जुहुयात्। यं कामयेत राष्ट्रमस्य प्रजा स्यादिति। राष्ट्रमेवास्य प्रजा भवति" (ब्रा०) इति। अस्य प्रजा राष्ट्रं स्यात्, प्रियाया भार्यायाः

पुत्रो राष्ट्रं पालयितुं समर्थो भूयादित्यर्थः। विधत्ते "पर्ण-मयेनाध्वर्युरभिषिञ्चति। ब्रह्मवर्चसमेवास्मिन् त्विषिं दधाति। औदुम्बरेण राजन्यः। ऊर्जमेवास्मिन्नन्नाद्यं दधाति। आश्वत्थेन वैश्यः। विशमेवास्मिन् पुष्टिं दधाति। नैयग्रोधेन जन्यः। मित्राण्येवास्मै कल्पयति। अथो प्रतिष्ठित्यै" (ब्रा०) इति। ब्रह्मवर्चसमेव त्विषिमध्ययनादिकृतमुत्कर्षं, ऊर्जमेवान्नाद्यं बल-प्रदमन्नं प्रियस्वाद्यं, विशमेव पुष्टिं करप्रदाढ्यप्रजासम्पत्तिं।

अत्र विनियोगसङ्ग्रहः।

"सोमामन्त्र्यां व्याघ्रचर्मास्तीर्यास्मत्स्वर्णकं क्षिपेत्।
दिव्योद्राजा स्वर्णपात्रं दध्यान्मूर्ध्नि शतक्षरं॥
अवे रोहन्निषामन्त्रीं क्लीबं सीसेन विध्यति।
निरस्तं केशवापाय निरस्येल्लोहितायसं॥
सोमोऽध्वर्युर्मन्त्रयेत सोमस्येत्यभिषिञ्चति।
क्षत्राभिषिक्तं समस्य त्यजेद्दस्तमतीत्यतः॥
समा लेपान्मार्जनं स्याद्रुद्र श्रेष्ठं जुहोति हि।
प्रजापते काम्यहोमो मन्त्रा द्वादश वर्णिताः" इति।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथम-काण्डेऽष्टमप्रपाठके चतुर्दशोऽनुवाकः॥ * ॥

इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यान्मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेन विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि मरुतां प्रसवे जेषमाप्तं मनः समहमिन्द्रियेण वीर्येण पशूनां मन्युरसि तवेव मे मन्युर्भूयान्नमो मात्रे पृथिव्यै माहं मातरं पृथिवीꣳ हिꣳसिषं मा ॥ १ ॥

मां माता पृथिवी हिꣳसीदियदस्यायुरस्यायुर्मे धेह्यूर्गस्यूर्जं मे धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेह्यग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहेन्द्रस्य बलाय स्वाहा मरुतामोजसे स्वाहा हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥ २ ॥

हिꣳसिषं मर्तजास्त्रीणि च ॥ १५ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके पञ्चदशोऽनुवाकः ॥ ० ॥

चतुर्दशेऽभिषेक उक्तः। पञ्चदशे रथेन विजयोऽभिधीयते। कल्पः। इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति रथमुपावहृत्येति।

पाठस्तु "इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्त्वयायं वृत्रं वध्यात्" इति। व्याख्यातो वाजपेये। विधत्ते "इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति रथमुपावहरति विजित्यै" (ब्रा०१का०।७प्र०।८अ०) इति। कल्पः। अथ दक्षिणं योग्यं युनक्ति "मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मि यज्ञस्य योगेन" इति। हे दक्षिणाश्व त्वां प्रशास्त्रोराज्ञापयित्रोर्मित्रावरुणयोः प्रशिषा प्रशासनेन यज्ञसम्बन्धिनिमित्तं रथे युनज्मि। मित्रावरुणपदाभिप्रायं दर्शयति "मित्रावरुणयोस्त्वा प्रशास्त्रोः प्रशिषा युनज्मीत्याह। ब्रह्मणैवैनं देवताभ्यां युनक्ति" (ब्रा०) इति। ब्रह्मणा मन्त्रेण प्रतिपादिताभ्यां मित्रावरुणदेवताभ्यां प्रशासिता युनक्ति। रथस्याश्वत्रयोपेतत्वं विधत्ते "प्रष्टिवाहिनं युनक्ति। प्रष्टिवाही वै देवरथः। देवरथमेवास्मै युनक्ति" (ब्रा०) इति। तादृशं रथं प्रकारान्तरेण प्रशंसति "त्रयोऽश्वा भवन्ति। रथश्चतुर्थः। द्वौ सव्येष्ठसारथी। षट्सम्पद्यन्ते। षड्वा ऋतवः। ऋतुभिरेवैनं युनक्ति" (ब्रा०) इति। सव्येष्ठेत्यत्र दक्षिणस्येत्यध्याहार्यं ततः पार्श्वद्वयवर्तिनौ द्वौ सारथी सम्पद्येते। कल्पः। विष्णोः क्रमोऽसीति रथं यजमानोऽभ्येतीति। पाठस्तु "विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि" इति। एते त्रयो मन्त्रा वाजपेये व्याख्याताः। विधत्ते "विष्णुक्रमान् क्रमते। विष्णुरेव भूत्वेमाँल्लोकानभिजयति" (ब्रा०) इति। प्रियपुत्रस्यान्वारम्भणं विधत्ते "यः क्षत्रियः प्रतिहितः। सोऽन्वारभेत। राष्ट्रमेव भवति" (ब्रा०) इति। प्राप्नोतीत्यर्थः।

प्र सम्राहिष इत्येतामृचं विधत्ते "त्रिष्टुभान्वारभते। इन्द्रियं वै त्रिष्टुक्। इन्द्रियमेव यजमाने दधाति" (ब्रा०) इति। सेयमृगुपानुवाक्याकाण्डे चतुर्थप्रपाठकान्ते त्वमग्ने बृहद्वय इत्यस्मिन्ननुवाके समाम्नातेति तत्रैव व्याख्यास्यते। कल्पः "मरुतां प्रसवे जेषं" इति प्रयातीति। मरुत्संज्ञकानां देवानामनुज्ञायां सत्यामहं जेष्यामि। तदनुज्ञायां जयहेतुतां दर्शयति "मरुतां प्रसवे जेषमित्याह। मरुद्भिरेव प्रसूत उज्जयति" (ब्रा०) इति। कल्पः। सधनू राजन्यः पुरस्तादुत्तरतो वावस्थितो भवति तस्मा एतानिषून्नस्यति "आप्तं मनः" इति। मनोऽभिमतमाप्तं प्राप्तं। अमुमेवार्थं दर्शयति "आप्तं मन इत्याह। यदेव मनसैप्सीत्। तदापत्" (ब्रा०) इति। ऐप्सीत् आप्तुमिष्टवान् आपत् प्राप्नोति। विधत्ते "राजन्यं जिनाति। अनाक्रान्त एवाक्रमते" (ब्रा०) इति। बाणविमोकेन राजन्ये जिते सति स्वयं शत्रुणानुपक्रान्त एव सन् शत्रुमाक्रान्तवान् भवति। कल्पः। तं जित्वा "समहमिन्द्रियेण वीर्येण" इति प्रदक्षिणमावर्तत इति। हस्तादीन्द्रियगतेन सामर्थ्येनाहं सङ्गतोऽभूवं। मन्त्रपाठेन वीर्यसङ्गतिं दर्शयति "वि वा एष इन्द्रियेण वीर्येणर्ध्यते। यो राजन्यं जिनाति। समहमिन्द्रियेण वीर्येणेत्याह। इन्द्रियमेव वीर्यमात्मन्धत्ते" (ब्रा०) इति। कल्पः। पशूनां मन्युरसीति वाराही उपानहावुपमुञ्चेति। पाठस्तु "पशूनां मन्युरसि तवेव मे मन्युर्भूयात्" इति। हे वराहचर्मनिर्मिते उपानत् त्वं पशूनां मन्युरूपासि अतो यथा तव

मन्युरूपत्वं तदस्ममापि वैरिषु मन्युर्भूयात्। विधत्ते "पशूनां मन्युरसि तवेव मे मन्युर्भूयादिति वाराही उपानहावुपमुञ्च-ते। पशूनां वा एष मन्युः। यद्वराहः। तेनैव पशूनां मन्यु-मात्मन्धत्ते" (ब्रा०) इति। वराहस्याभिनिवेशाधिक्यं मन्यु-रूपत्वं। वाराहत्वं प्रशस्य उपानह उपमोकं प्रशंसति "अभि वा इयꣳ सुषुवाणं कामयते। तस्येश्वरेन्द्रियं वीर्यमादातोः। वाराही उपानहावुपमुञ्चते। अस्या एवान्तर्धत्ते। इन्द्रियस्य वीर्यस्यानात्यै" (ब्रा०) इति। इयं भूमिः सुषुवाणं अभिषिक्त-मभिलक्ष्य तदीयमिन्द्रियं वीर्यमादातुं कामयते कामयित्वा च तस्येन्द्रियं वीर्यमादातुं ईश्वरा शक्ता भवति। उपानदुप-मोकेन भूम्याः सकाशात् अन्तर्धानं कृतवान् भवति। तस्या-न्तर्धानमनात्यै भूम्या वीर्यस्याखीकाराय भवति। कल्पः। नमो मात्र इत्यवरोहन् पृथिवीमभिमन्त्रयेति। पाठस्तु "नमो मात्रे पृथिव्यै माहं मातरं पृथिवीꣳ हिꣳसिषं मा मां माता पृ-थिवी हिꣳसीत्" इति। अन्योन्यहिंसाभावप्रार्थनं विस्पष्टं। एतदेव दर्शयति "नमो मात्रे पृथिव्या इत्याहाꣳहिंसायै"(ब्रा०) इति। कल्पः। अवरुह्य मणीन् प्रतिमुञ्चते इयदसीति राजतं ऊर्गसीत्यौदुम्बरं युङ्ङसीति सौवर्णमिति। औदुम्बरं ताम्रमयं। पाठस्तु "इयदस्यायुरस्यायुर्मे धेह्यूर्गस्यूर्जं मे धेहि युङ्ङसि वर्चोऽसि वर्चो मयि धेहि" इति। हे राजतमणे त्वमियदसि एतावत्परिमाणोऽसि, अत्र तत्परिमाणं हस्तेनाभिनीयते, परिमितत्वादेवायुःस्वरूपोऽसि तस्मादायुर्मे प्रयच्छ। हे ताम्र-

मणे ऊर्गसि बलरूपोऽसि अतो बलं मे प्रयच्छ। हे सौवर्ण-मणे युङ्ङसि धारयितुं योग्योऽसि धारिते सति च वर्चोऽसि तेजस्वी भवसि अतो मे कान्तिं प्रयच्छ। मन्त्राणां पाठादेव तदुक्तफलसिद्धिं दर्शयति "इयदस्यायुरस्यायुर्मे धेहीत्याह। आयुरेवात्मन्धत्ते। ऊर्गस्यूर्जं मे धेहीत्याह। ऊर्जमेवात्मन्धत्ते। युङ्ङसि वर्चोऽसि वर्चो मयि धेहीत्याह। वर्च एवात्मन्धत्ते" (ब्रा०) इति। विधत्ते "एकधा ब्रह्मण उपहरति। एकधैव यजमान आयुरूर्जं वर्चो दधाति" (ब्रा०) इति। तदिदं सूत्रकारेण स्पष्टीकृतं 'उपहूतायामिडायामुन्मुच्य मणीन् ब्र-ह्मणे ददाति' इति। कल्पः। अग्नये गृहपतये स्वाहेति रथ-विमोचनीयान् होमान् जुहोति। पाठस्तु "अग्नये गृहपतये स्वाहा सोमाय वनस्पतये स्वाहेन्द्रस्य बलाय स्वाहा मरुता-मोजसे स्वाहा" इति। स्पष्टोऽर्थः। विधत्ते "रथविमोचनीया जुहोति प्रतिष्ठित्यै" (ब्रा०) इति। पाठप्राप्तामाहुतिसङ्ख्यां प्रशंसति "चयोऽश्वा भवन्ति। रथश्चतुर्थः। तस्माच्चतुर्जुहोति" (ब्रा०) इति। कल्पः। हंसः शुचिषदिति सव्यं सङ्गृहीता रथवाहने रथमत्यादधातीति। अश्वस्य प्रग्रहं सम्यक् गृह्णा-तीति सङ्गृहीता। पाठस्तु "हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्" इति। हन्ति पृथिवीमिति हंसो रथः। शुचौ देवयजने रथवाहने च सीदतीति शुचिषत्, स्वस्योपरि यजमानं वासयतीति वसुः, तद्गुणायमवदद्धेऽन्तरिक्षे

सीदतीत्यन्तरिक्षसत्, होता होमकर्ता होतृसमानः, तदेव कथमित्युच्यते, वेद्यां सीदतीति वेदिषत्, अतिथिसदृशश्च, तदपि कथमित्युच्यते, दुरोणेषु गृहेषु सीदतीति दुरोणसत्, यो यस्तमारोढुं नयति तस्य तस्य गृहे सीदति, नृषु मनुष्येषूपकारं कर्तुं सीदतीति नृषत्, वरे श्रेष्ठे राजादिगृहे सीदतीति वरसत्, ऋते यज्ञे वाजपेयादौ सीदतीत्यृतसत्, सूर्यं वोढुं व्योमन्याकाशे सीदतीति व्योमसत्, अप्सु योनिर्वा अश्व इति श्रुतेरब्जा जातेरश्वैरुपेतत्वादब्जाः, गोशब्दवाच्याद्वज्राज्जायत इति गोजाः, एतच्च स्फ्यस्तृतीयꣳ रथस्तृतीयमित्याम्नातं, ऋतजाः पृष्ठिवाहिन ऋतार्थं यज्ञार्थं जातत्वात्, अद्रिभ्यः पाषाणसदृशेभ्यः दृढेभ्यः काष्ठेभ्यो जातत्वादद्रिजाः। ईदृशो रथो बृहत् प्रौढं राजसूयाख्यमृतं यज्ञं सम्पादयत्विति शेषः। विधत्ते "यदुभौ सहावतिष्ठेतां। समानं लोकमियातां। सह सङ्गृहीत्रा रथवाहने रथमादधाति। सुवर्गादेवैनं लोकादन्तर्दधाति" (ब्रा०) इति। अश्वप्रग्रहधारी यः सङ्गृहीता यश्च रथादवरूढो यजमानः तावुभौ सह स्वर्गरूपायां वेद्यां यद्यवतिष्ठेतां तदानीं यज्वा चेतरश्च सदृशं लोकं प्राप्नुयातां तच्चायुक्तं तस्माद्रथ एवावस्थितेन सङ्गृहीत्रा सह तं रथं रथवाहने काष्ठे स्थापयेत् तथा सति सङ्गृहीता वेदिरूपात् स्वर्गादन्तर्हितो भवति। मन्त्रं विनियुङ्क्ते "हꣳसः शुचिषदित्यादधाति। ब्रह्मणैवैनमुपावहरति। ब्रह्मणा दधाति" (ब्रा०) इति। पूर्वमिन्द्रस्य वज्रोऽसीति मन्त्रेणैवैनं रथमुपावहृतवान् तस्मादिदा-

नीमपि हꣳस इति मन्त्रेण रथमाधातुं युक्तं। मन्त्रगतच्छन्दो-विशेषं प्रशंसति "अतिच्छन्दसा दधाति। अतिच्छन्दा वै सर्वाणि छन्दाꣳसि। सर्वेभिरेवैनं छन्दोभिरादधाति। वर्ष्म वा एषा छन्दसां। यदतिच्छन्दाः। यदतिच्छन्दसा दधाति। वर्ष्मैवैनꣳ समानानां करोति" (ब्रा०) इति। हंसमन्त्रस्य छन्दोऽति-जगती सा च गायत्र्यादीन्यल्पच्छन्दांस्यतिक्रम्य वर्त्तत इति तस्या अतिच्छन्दस्त्वं, अत एव छन्दसां तत्रान्तर्भावात् सर्व-च्छन्दोरूपत्वं, तया सत्यनया रथ आहिते सति सर्वैश्छन्दोभि-राहितो भवति। किञ्च एषातिजगती सर्वेषां छन्दसां शरीरं अवत्यैरचरैः कैश्चित् क्वचित् कस्यचिच्छन्दसः सम्पादयितुं शक्यत्वात्, तया सत्यनया रथाधाने यजमानः सर्वेषां समा-नानां शरीरस्थानीयो भवति।

अत्र विनियोगसंग्रहः।

"इन्द्रेति रथमाहृत्य मित्रेत्येतं युनक्ति हि।
विष्णोस्त्रिभी रथं गत्वा सर्वारुह्य प्रयाति सः॥
आप्तं चत्र इषुं मुक्त्वा सं प्रदक्षिणमाव्रजेत्।
पश्चित्युपानहौ धृत्वा नमो भूम्यभिमन्त्रणं॥
इयन्मणिं राजतं चोरर्वष्मात्यौदुम्बरं मणिं।
युङ् सौवर्णश्चात्र कृत्वा चतस्रो रथमोचनीः॥
हंसो रथं स्थापयीत मन्त्रा अष्टादशेरिताः"। इति॥

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथम-काण्डेऽष्टमप्रपाठके पञ्चदशोऽनुवाकः॥ * ॥

मित्रोऽसि वरुणोऽसि समहं विश्वैर्देवैः क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि स्योनामासीद सुषदामासीद मा त्वा हिꣳसीन्मा मा हिꣳसीन्निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुर्ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि सवितासि सत्यसवो ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासीन्द्रोऽसि सत्यौजाः ॥ १ ॥

ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि मित्रोऽसि सुशेवो ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि वरुणोऽसि सत्यधर्मेन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तेन मे रध्य दिशोऽभ्ययꣳ राजाभूत् सुश्लोकां३ सुमङ्गलां३ सत्यराजा३न्। अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाग्नये गृहपतये स्वाहा ॥ २ ॥

सत्यौजाश्चत्वारिꣳशच्च ॥ १६ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डेऽष्टमप्रपाठके षोडशोऽनुवाकः ॥ * ॥

पञ्चदशे दिग्विजयोऽभिहितः। षोडशे विजयादूर्द्ध्वमासन उपविश्य सर्वैः सेव्यत्वं वर्ण्यते। कल्पः "मित्रोऽसि" इति दक्षिणं बाहुं यजमान उपावहरते "वरुणोऽसि" इति सव्यमिति। पूर्वं हिरण्यवर्णावुषसामिति मन्त्रेण यजमानस्य बाहू उद्गृहीतौ

तयोरिदानीमधस्तादुपावहरणमुच्यते। हे दक्षिणबाहो त्वं मित्रोऽसि मित्रवद्भोजनादाविष्टार्थप्रापकत्वात्। हे वामबाहो त्वं वरुणोऽसि शौचादावनिष्टनिवारकत्वात्। कल्पः "समहं विश्वैर्देवैः" इति वैश्वदेव्यामिक्षायां हस्तावुपावहरत इति। अहं सर्वैर्देवैः सङ्गच्छेयं। (मित्रशब्दस्य सूर्यवाचित्वात् तन्नाम्ना व्यवहृतस्य दक्षिणबाहोरहोरूपत्वं।) वरुणशब्दस्यान्धकारवदावरकवाचित्वात् तन्नाम्ना व्यवहृतस्य रात्रिरूपत्वमिति व्याचष्टे "मित्रोऽसि वरुणोऽसीत्याह। मैत्रं वा अहः। वारुणी रात्रिः। अहोरात्राभ्यामेवैनमुपावहरति" (ब्रा०१का०७प्र०१०अ०) इति। मित्रावरुणयोरनेकदेवरूपत्वात् सर्वदेवसम्बन्धिन्यामामिक्षायां मित्रावरुणात्मत्वेन निरूपितयोर्हस्तयोरुपावहरणं युक्तमित्येतद्दर्शयति "मित्रोऽसि वरुणोऽसीत्याह। मैत्रो वै दक्षिणः। वारुणः सव्यः। वैश्वदेव्यामिक्षा। स्वमेवैनौ भागधेयमुपावहरति" (ब्रा०) इति। विश्वैर्देवैरितिपदोच्चारणेन तत्सम्बन्धिनीनां प्रजानां यजमानभोग्यत्वं सम्पद्यत इत्यभिप्रेत्य व्याचष्टे "समहं विश्वैर्देवैरित्याह। वैश्वदेव्यो वै प्रजाः। ता एवाद्याः कुरुते" (ब्रा०) इति। कल्पः। खादिरीमासन्दीं प्रतिष्ठाप्य क्षत्रस्य नाभिरसीति तस्यां क्षत्त्यधीवासमास्तीर्यैति। क्षत्त्यधीवासं चर्मपटः। पाठस्तु "क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसि" इति। हे क्षत्त्यधीवास क्षत्रस्योपवेशनाय त्वं नाभिवन्मध्यस्थानमसि, मातृवद्धारकत्वेन क्षत्रस्य योनिः कारणमसि। विधत्ते "क्षत्रस्य नाभिरसि क्षत्रस्य योनिरसीत्यधीवासमा-

स्तृणाति सयोनिलाय" (ब्रा०) इति। योनिरसीति चर्मपटस्य कारणत्वेन भावनया सकारणत्वं चत्तस्य सम्पद्यते। कल्पः "स्योनामासीद सुषदामासीद" इति तामासाद्य यजमानो "मा त्वा हिꣳसीन्मा मा हिꣳसीत्" इत्युपविशतीति। हे मदीयशरीर स्योनां सुखकरीमेनामासन्दीं प्रत्यासीद समीपस्थं भव, सुषदां सुखेनोपवेष्टुं योग्यामासीद। इयमासन्दी त्वां शरीरं मा हिंसीत् मामपि शरीरस्वामिनं मा हिंसीत्। मन्त्रद्वयार्थस्य विस्पष्टतां दर्शयति "स्योनामासीद सुषदामासीदेत्याह। यथायजुरेवैतत्। मा त्वा हिꣳसीन्मा मा हिꣳसीदित्याहाहिꣳसायै" (ब्रा०) इति। कल्पः। निषसाद धृतव्रत इत्यासीनमनुमन्त्रयत इति। पाठस्तु "निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुः" इति। अयं यजमानो धृतव्रतः स्वीकृतयज्ञः वरुणोऽनिष्टनिवारको भूत्वा निषसाद अस्यामासन्द्यामुपविवेश पस्त्यासु बह्वषु वैरिगृहेषु आगत्य साम्राज्यं कर्तुं सुक्रतुः शोभनसङ्कल्पो भवतु। साम्राज्यमुद्दिश्य सम्यक् सङ्कल्पसिद्धिमेव दर्शयति "निषसाद धृतव्रतो वरुणः पस्त्यास्वा साम्राज्याय सुक्रतुरित्याह। साम्राज्यमेवैनꣳ सुक्रतुं करोति" (ब्रा०) इति। कल्पः। तमृत्विजो रत्निनश्च सर्वतः पर्युपविशन्ति पुरस्तादध्वर्युर्दक्षिणतो ब्रह्मा पश्चाद्धोतोत्तरत उद्गाता, उपविष्टेषु ब्रह्मा३न् ॐमित्यध्वर्यु राजा मन्त्रयते त्वꣳ राजन् ब्रह्मासीतीतरः प्रत्याहैवं ब्रह्माणं होतारमुद्गातारं चोत्तरोत्तरेणेतरे प्रत्याहुरिति। एतेषाम-

ष्टानां मन्त्राणां पाठस्तु "ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि सवितासि सत्यसवो ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासीन्द्रोऽसि सत्यौजाः ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि मित्रोऽसि सुशेवो ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि वरुणोऽसि सत्यधर्मा" इति। दूरादाह्वातुं प्लुतिः, हे राजन् त्वमेव ब्रह्मासि ब्राह्मणोऽसि न त्वहं, कुतः, यतः त्वमेव सवितासि ब्राह्मणधर्मान् पालयन्नस्माकमनुष्ठानायानुज्ञातासि, सत्यसवस्त्वममोघानुज्ञः अतो ब्राह्मणवर्णाश्रमधर्माणां त्वदधीनत्वात् त्वमेव ब्रह्मा। तथा इन्द्रोऽसि परमैश्वर्यवानसि, सत्यौजा अमोघवीर्योऽसि। तथा मित्रोऽसि शिष्टपरिपालनाय देवनामासि, सुशेवः सुष्ठु सेवितुं योग्योऽसि। तथा वरुणोऽसि अनिष्टनिवारकोऽसि, सत्यधर्मा शास्त्रीयधर्मयुक्तोऽसि। यथा लोके परराष्ट्रं जित्वा समागत्य सिंहासने समासीनं राजानमध उपविष्टाः पुरोहितादयो बहुभिराशीर्भिः स्तुतिभिश्च स्तुवन्ति तद्वदत्रापि सेवोपचारः क्रियते। एतयाशीर्वादरूपया सेवया ब्राह्मणेषु यत् सामर्थ्यं शापानुग्रहरूपं तद्राजनि प्रतिष्ठापितं भवति। तदेतदभिप्रेत्य वाजसनेयिनो बृहदारण्यके क्षत्रियसृष्टिप्रस्तावे समामनन्ति 'क्षत्रात्परं नास्ति तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति' इति। यथोक्तार्थपरत्वेन मन्त्रान् व्याचष्टे "ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि सवितासि सत्यसव इत्याह। सवितारमेवैनꣳ सत्यसवं करोति। ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासीन्द्रोऽसि सत्यौजा इत्याह। इन्द्रमेवैनꣳ सत्यौ-

जसं करोति। ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि मित्रोऽसि सुशेव इत्याह। मित्रमेवैनꣳ सुशेवं करोति। ब्रह्मा३न् त्वꣳ राजन् ब्रह्मासि वरुणोऽसि सत्यधर्मेत्याह। वरुणमेवैनꣳ सत्यधर्माणं करोति" (ब्रा०) इति। सवितेन्द्रो मित्र इति देवतापदाना-मुच्चारणेन तद्देवताप्रियाणां छन्दसामुच्चारणं सम्पद्यत इति दर्शयति "सवितासि सत्यसव इत्याह। गायत्रीमेवैतेनाभि-व्याहरति। इन्द्रोऽसि सत्यौजा इत्याह। त्रिष्टुभमेवैतेनाभिव्या-हरति। मित्रोऽसि सुशेव इत्याह। जगतीमेवैतेनाभिव्याहर-ति। सत्यमेता देवताः। सत्यमेतानि छन्दाꣳसि। सत्यमेवाव-रुन्धे" (ब्रा०) इति। एता इन्द्रादयो देवताः सत्यं पालयन्ति एतानि गायत्र्यादिछन्दांसि च सत्यममोघं फलं प्रयच्छन्ति, अत उभयोः सत्यरूपत्वात् इन्द्रादिपदोच्चारणेन गायत्र्याद्यु-च्चारणसिद्धिः, तेन यजमानः सत्यवादित्वमेव सर्वतः सम्पा-दयति। वरुणपदोच्चारणेनानुष्टुबुच्चारणसिद्धिं दर्शयति "वरु-णोऽसि सत्यधर्मेत्याह। अनुष्टुभमेवैतेनाभिव्याहरति। सत्यानृते वा अनुष्टुप्। सत्यानृते वरुणः। सत्यानृते एवावरुन्धे" (ब्रा०) इति। विश्वो देवस्य नेतुरित्यस्यामनुष्टुभि प्रथमपादः सप्ताक्षर इत्यनृतत्वं, उत्तरे त्रयः पादा अष्टाक्षरा इति सत्यत्वं। एतच्च एकस्मादक्षरादनाप्तं प्रथमं पदमित्यादिब्राह्मणेनैव दर्शितं। वरुणोऽपि क्वचिदनिष्टकारित्वादनृतरूपः क्वचित्तन्निवर्तकत्वात् सत्यरूपः, एतच्च वरुणो वा एतं गृह्णाति। योऽश्वं प्रतिगृह्णाति। यावतोऽश्वान् प्रतिगृह्णीयात्। तावतो वारुणाञ्चतुष्कपालान्

निर्वपेत्। वरुणमेव स्वेन भागधेयेनोपधावति। स एवैनं वरुणपाशान्मुञ्चतीत्यादिषु ब्राह्मणेषु स्पष्टं द्रष्टव्यं। अत उभयरूपत्वसाम्याद्वरुणपदोच्चारणेनानुष्टुबुच्चारिता भवति। तेन च यजमानोऽनृतं त्यक्तुं सत्यं वक्तुञ्च समर्थत्वात् सत्यानृते स्वाधीने करोति। वेदनं प्रशंसति "नैनꣳ सत्यानृते उदिते हिꣳस्तः। य एवं वेद" (ब्रा०) इति। कल्पः। इन्द्रस्य वज्रोऽसीति स्फ्यं ब्रह्मा राज्ञे प्रयच्छतीति। पाठस्तु "इन्द्रस्य वज्रोऽसि वार्त्रघ्नस्तेन मे रध्य" इति। हे स्फ्य वज्रतृतीयांशत्वात् त्वं वज्रोऽसि। स्फ्यस्तृतीयमिति श्रुतेः। यतो विरोधिघाती त्वं तेन कारणेन मे मदर्थं रध्य द्यूतस्थानपरिलेखनरूपं कार्यं साधय। विधत्ते "इन्द्रस्य वज्रोऽसि वार्त्रघ्न इति स्फ्यं प्रयच्छति। वज्रो वै स्फ्यः। वज्रेणैवास्मा अवरपरꣳ रन्धयति। एवꣳ हि तच्छ्रेयः। यदस्मा एते रध्येयुः" (ब्रा०) इति। रध्येत्युच्चारणेनास्मै यजमानायावरं परं चापेक्षितं सर्वकार्यं रन्धयति साधयति। यद् यदि यजमानायैते कार्यविशेषा रध्येयुः सिध्येयुः एवं सति श्रेयो हि तत् प्रशस्ततरं खलु। कल्पः। "दिशोऽभ्ययꣳ राजाभूत्" इति पञ्चाक्षान् राज्ञे प्रयच्छतीति। अयं यजमान ऊर्द्ध्वदिक्सहिताः पञ्चदिशोऽभिलक्ष्य राजाभूत्। विधत्ते "दिशोऽभ्ययꣳ राजाभूदिति पञ्चाक्षान् प्रयच्छति। एते वै सर्वेऽयाः। अपराजायिनमेवैनं करोति" इति। अक्षाः कपर्दकाः सुवर्णनिर्मिताः, विभीतकफलानि सौवर्णानीत्येके, ते चाक्षा द्यूतस्थाने निवपनीयाः।

तथा चापस्तम्बेन दर्शितं 'अत्रावापेऽधिदेवनमुद्धुत्यावोक्ष्याक्षान्निवपेत् सौवर्णान् परःशतान् परःसहस्रान् वा' इति। तेभ्यः पञ्चाक्षानुद्धृत्य जितवानयं राजेत्यभिप्रायेण तस्मै राज्ञे दद्यात् एत एव पञ्चाक्षा अयाः सर्वे सम्पद्यन्ते। अयशब्दोऽक्षवाची, पञ्चदिग्वर्त्यक्षाभिप्रायेण पञ्चाक्षाणां दत्तत्वात् राशिस्थाः सर्वेऽप्यक्षा दत्ता भवन्ति, तथा सत्येनं यजमानमपराजायिनं कदाचिदपि पराजयरहितमेव करोति। विधत्ते "ओदनमुद्भुवते। परमेष्ठी वा एषः। यदोदनः। परमामेवैनꣳ श्रियं गमयति" (ब्रा०) इति। अधिदेवनकाले ओदनं पणत्वेन सर्वे परस्परं ब्रूयुः, अन्नाद्वै प्रजाः प्रजायन्त इति श्रुतेरोदनः परमेष्ठिरूपः, तथा सत्योदनपणप्रतिज्ञया परमां श्रियं यजमानः प्राप्नोति। कल्पः। मङ्गल्यनाम्नो राजाह्वयति "सुश्लोकां३" इति सङ्ग्रहीतारं "सुमङ्गलां३" इति भागदुघं "सत्यराजा३न्" इति क्षत्तारमिति। शोभनः श्लोकः स्तुतिर्यस्यासौ सुश्लोकः, कोशाध्यक्षोऽश्वप्रग्रहधारी वा तावुभावपि स्वस्वकार्यं सम्यगनुतिष्ठन्तौ शोभनस्तुतियुक्तौ भवतः। शोभनं मङ्गलं मर्यादानुल्लङ्घनेन प्रजाभ्यः करादानरूपं यस्य भागदुघस्य सोऽयं सुमङ्गलः। सत्यस्यावश्यंभाविनोऽन्तःपुररक्षणस्य स्वामी क्षत्ता सत्यराजा। एतेषां सम्बोधनानि प्लुतयश्च दूराद्द्वानार्थाः। द्वयोः सानुनासिकत्वं साम्प्रदायिकं। स्वकीयाः सङ्ग्रहीत्रादयः सुश्लोकादयो भूयासुरित्येवमाशीःपरतया व्याचष्टे "सुश्लोकां३ सुमङ्गलां३ सत्यराजा३नित्याह। आशिष-

मेवैतामाशास्ते" (ब्रा०) इति । विधत्ते "शौनःशेपमाख्याप-
यते । वरुणपाशादेवैनं मुञ्चति" (ब्रा०) इति । शुनःशेपेन
दृष्टं शस्त्रं शौनःशेपं, तदध्वर्युर्होतारं वाचयेत् तेन यजमानं
वरुणपाशान्मोचयतीति । तत्र ऋक्संख्यां विधत्ते "परःशतं भव-
ति । शतायुः पुरुषः शतेन्द्रियः । आयुष्येवेन्द्रिये प्रतितिष्ठति" इति।
परःशतं शतादधिकं । ऋक्संख्या चापस्तम्बेन स्पष्टीकृता 'शौनः-
शेपमाख्यापयते ऋचो गाथामिश्राः परःशता परःसहस्रा
वा' इति । विधत्ते "मारुतस्य चैकविꣳशतिकपालस्य वैश्वदेव्यै
चामिक्षाया अग्नये स्विष्टकृते समवद्यति । देवताभिरेवैनमुभ-
यतः परिगृह्णाति" (ब्रा०) इति। समवद्यति समस्यैकीकृत्या-
वद्येत् । तेनोभयतः कर्मद्वयेऽवस्थिताभिर्देवताभिरेवैनं यज-
मानमुभयोः पार्श्वयोः पालितवान् भवति । कल्पः । अवभृथेन
प्रचर्य "अपां नप्त्रे स्वाहा" इत्यप्सु जुहोति "ऊर्जो नप्त्रे स्वाहा"
इत्यन्तरा दर्भस्तम्बे स्थाणौ वल्मीकवपायां वा हुत्वा "अग्नये
गृहपतये स्वाहा" इति प्रत्येत्य गार्हपत्ये हुत्वेति। अपां नप्त्रे न
पातयित्रे विनाशमकुर्वते वह्नये, न खल्वग्निरपो नाशयति
किन्तूत्पादयति, अग्नेराप इति सृष्टिप्रकरणे श्रवणात्। ऊर्जो
बलस्य न पातयित्रे वह्नये ऊर्जो नप्त्रे, उदराग्निना भुक्तेऽन्ने
जीर्णे सति बलं वर्धते न तद्विनाश्यते । विधत्ते "अपां नप्त्रे
स्वाहोर्जो नप्त्रे स्वाहाग्नये गृहपतये स्वाहेति तिस्र आहुती-
र्जुहोति । त्रय इमे लोकाः । एष्वेव लोकेषु प्रतितिष्ठति"
(ब्रा०) इति ।

अत्र विनियोगसङ्ग्रहः।

"बाहू अधो हरेद्द्वाभ्यां मित्रेति वरुणेति च।

स्वाम्युपाहृत्य बाहू सं वैश्वदेव्यां प्रसादयेत्॥

चत्वारस्त्र्यां तु खादिर्यां कृत्यधीवाससंस्तुतिः।

स्योना स्वामी समागत्य मा त्वा तत्रोपसीदति॥

निषोपविष्टं सम्राज्ञं ब्रह्मा३नध्वर्युमीरयेत्।

प्रत्याह सोऽपि त्वमिति ब्रह्मा होता च सामगः॥

राज्ञोक्ता उत्तरं प्राङ्गरिन्द्र स्फ्यं स्वामिनेऽर्पयेत्।

दिशोऽत्वान् दापयेत् पञ्च सुश्लोका इति च क्रमात् *॥

सङ्ग्रहीता भागदुघः क्षत्ता चाहूयते त्रिभिः।

अपां जुहोत्यप्सु दर्भे गार्हपत्ये त्रिभिः क्रमात्॥

अनुवीके षोडशेऽस्मिन् त्रयोविंशतिरीरिताः" इति।

अथ मीमांसा। तृतीयाध्यायस्य तृतीयपादे चिन्तितं।

"राजसूयेऽभिषेचाख्ये यागे ये देवनादयः।

तच्छेषास्तेऽखिलार्था वा तच्छेषास्तस्य सन्निधेः॥

राजसूयकथभावानुवृत्तेः सर्वशेषता।

कल्प्याकाङ्क्षाभिषेचस्य प्रक्रिया प्रबला ततः"॥

राजसूये पश्विष्टिसोमयागा बहवः प्रधानभूताः तत्राभिषेचनीयाख्यः कश्चित्सोमयागः तत्सन्निधौ देवनादयः श्रूयन्ते 'अक्षैर्दीव्यति राजन्यं जिनाति शौनःशेपमाख्यापयते' इति। जिनाति जयति। बह्वृचब्राह्मणे समाम्नातं शुनःशेप-

* दिशोऽस्त्वान्पञ्च राजेभ्यो दद्यात् सुश्लोक ईरित इति का०।

विषयमुपाख्यानं शौनःशेपं। तत्र सन्निधिबलाद्देवनादयो- ऽभिषेचनीयाङ्गमिति चेन्नैवं। राजसूयस्य कथम्भावाकाङ्क्षा- यामनुवृत्तायां विहिता देवनादयः प्रकरणेन राजसूयशेषाः राजसूयस्य बहुयागात्मक इत्यत्र सर्वशेषत्वं। न चाभिषेच- नीयस्य काचिदाकाङ्क्षा देवनादिष्वस्ति ज्योतिष्टोमविकृतित्वे- नातिदिष्टैः प्राकृताङ्गैरेव तदाकाङ्क्षानिवृत्तेः। सन्निहितविधि- बलादाकाङ्क्षोत्थाप्यत इति चेत्। अत एवाकाङ्क्षारूपमवान्तर- प्रकरणमादौ परिकल्प्य तद्द्वारा वाक्यलिङ्गश्रुतिकल्पनया सन्निधिर्विप्रकृष्यते राजसूयाकाङ्क्षारूपन्तु महाप्रकरणं क्लृप्त- त्वादेकया कल्पया सन्निकृष्यते। तस्मात्प्रकरणेन सन्निधिबाधात् सर्वशेषा देवनादयः।

पञ्चमाध्यायस्य द्वितीयपादे चिन्तितं।

"अभिषेच्यप्राकृताङ्गसमाप्तौ देवनादिकं।
मध्ये वा पूर्ववत्सर्वसमाप्तौ देवनादयः॥
अभिषेकोऽपकृष्टोऽस्मात् पूर्वं प्रत्यक्षपाठतः।
देवनाद्यास्ततो मध्ये माहेन्द्रस्तोत्रतः पुरा"॥

राजसूये सोमयागस्याभिषेचनीयस्य सन्निधौ देवनशौनः- शेपोपाख्यानाभिषेकाः क्रमेणाम्नाताः, तत्राभिषेचनीये चोदक- प्राप्तमङ्गजातं सारिष्ट्न्यायेन प्रथमं सम्पाद्य पश्चाद्देवनादयः कार्याः इति प्राप्ते ब्रूमहे। माहेन्द्रस्य स्तोत्रं प्रत्यभिषिच्यत इति वाक्येन तस्य सोमयागस्य मध्येऽभिषेकोऽपकृष्टः। अभिषेकात् पूर्व- भावित्वं विदेवनादीनां प्रत्यक्षपाठप्राप्तं, ततो माहेन्द्रस्तोत्रादपि